॥१॥इतिश्रीविष्णुपुराणस्यप्रथमांशस्य॥१॥
॥प्रारंभः श्रीरस्तु॥१॥

DR. BHAU DAJI
डाक्टर भाऊ दाजी स्मारकम्
MEMORIAL

विष्णुपु० १ ॥श्रीवरदमूर्तिर्जयति॥ सूतउवाच॥सदेस्वरंब्रह्मयईश्वरः पुमानगुणोर्मिमैंतैसृष्टिस्थितिकालसंलयः॥प्रधानबु
ध्यादिजगत्प्रपंचसूःसवोस्तुविष्णुर्मतिभूतिमुक्तिदः॥१॥प्रणम्यविष्णुंविश्वेशंब्रह्मादीन्प्रणिपत्यच॥गुरुंप्रणम्य
वक्ष्यामिपुराणंविष्णुसंज्ञितं॥२॥इतिहासपुराणज्ञंवेदवेदांगपारगं॥धर्मशास्त्रार्थतत्त्वज्ञंवसिष्ठतनयात्मजं॥३॥परा
शरंमुनिवरंकृतपूर्वाह्निकक्रियं॥मैत्रेयःपरिपप्रछप्रणिपत्याभिवाद्यच॥४॥त्वत्तोहिवेदाध्ययनमधीतमखिलंगुरोः॥ध
र्मशास्त्राणिसर्वाणितथांगानियथाक्रमं॥५॥त्वत्प्रसादान्मुनिश्रेष्ठमामा कृतश्रमं॥वक्ष्यंतिसर्वशास्त्रेषुप्रायसोयेऽपि
विद्विषः॥६॥सोऽहमिच्छामिधर्मज्ञश्रोतुंत्वत्तोयथाजगत्॥बभूवभूयश्चयथामहाभाग ति८जन्मयंचजगद्
ह्मन्यतश्चैतच्चराचरं॥लीनमासीत्तथायत्रलयमेष्यतिय ९यत्प्रमाणानिभूतानिदेवादीनांचसंभवं॥समुद्रपर्वता
दीनांसंस्थानंचतथाभुवः॥९॥सूर्यादीनांचसंस्थानंप्रमाणंमुनिसत्तम॥देवादीनांतथावंशान्मनून्मन्वंतराणिच॥१०॥
कल्पान्कल्पविभागांश्चचतुर्युगविकल्पितान्॥कल्पांतस्यस्वरूपंचयुगधर्माश्चकृत्स्नशः॥११॥देवर्षिपार्थिवानां
चचरितंयन्महामुने॥वेदशाखाप्रणयनंयथाव्यासकर्तृकं॥धर्माश्चब्राह्मणादीनांतथाश्रमनिवासिनां॥श्रोतुमि
च्छाम्यहंसर्वंत्वत्तोवासिष्ठनंदन॥ब्रह्मन्प्रसादप्रवणंकुरुष्वमयिमानसं॥येनाहमेतज्जानीयांत्वत्प्रसादान्महामुने॥१४॥ प्र० १
श्रीपराशरउवाच॥साधुमैत्रेयधर्मज्ञस्मारितोस्मिपुरातनं॥पितुःपितामेभगवान्वसिष्ठोयदुवाचह॥१५॥विश्वा

मित्रप्रयुक्तेनराक्षसाभक्षितोमया॥श्रुतस्तातस्ततःक्रोधोमैत्रेयाभून्ममातुलः॥१६॥ ततोहंरक्षसांसत्रंविनाशायसमा
रभं॥भस्मीकृताश्चशतशस्तस्मिन्सत्रेनिशाचराः॥१७॥ततःसंक्षीयमाणेषुरक्षस्वशेषतः॥मामुवाचमहाभागोवसि
ष्ठोमत्पितामहः॥१८॥अलमत्यंतकोपेनतातमन्युममुंजहि॥राक्षसानापराध्यंतेपितुस्तेविहितंतथा॥१९॥मूढाना
मेवभवतिक्रोधोज्ञानवतांकुतः॥हन्यतेतातकःकेनयतःस्वकृतभुक्पुमान्॥संचितस्यापिमहतोवत्सक्लेशेनमानवैः॥य
शसस्तपसश्चैवक्रोधोनाशकरःपरः॥२१॥स्वर्गापवर्गव्यासेधकारणंपरमर्षयः॥वर्जयंतिसदाक्रोधंतातमातद्
शोभव॥अलंनिशाचरैर्दग्धैर्दीनैरनपकारिभिः॥सत्रंतेविरमत्वेतत्क्षमासाराहिसाधवः॥२३॥एवंतातेनतेनाहं
मनुनीतोमहात्मना॥उपसंहृतवान्सत्रंसद्यस्तद्वाक्यगौरवात्॥२४॥ततःसभगवान्प्रीतोवसिष्ठोमुनिसत्तमः॥संप्राप्त
श्चतदातत्रपुलस्त्योब्रह्मणःसुतः॥२५॥पितामहेनदत्तार्घ्यःकृतासनपरिग्रहः॥मामुवाचमहाभागोमैत्रेयपुलहाग्र
जः॥२६॥वैरेमहतियद्वाक्याद्गुरोरस्याश्रिताक्षमा॥त्वयातस्मात्समस्तानिभवान्शास्त्राणिवेत्स्यति॥२७॥संततेर्न
ममोच्छेदःक्रुद्धेनापियतःकृतः॥त्वयातस्मान्महाभागददाम्यन्यंमहावरं॥२८॥पुराणसंहिताकर्त्ताभवान्वत्सभवि
ष्यति॥वेदानांपरमार्थंचयथावद्वेत्स्यतेभवान्॥२९॥प्रवृत्तेचनिवृत्तेचकर्मण्यस्तमलामतिः॥मत्प्रसादादसंदिग्ध
सतत्त्वसभविष्यति॥३०॥ततश्चभगवान्प्राहवसिष्ठोमेपितामहः॥पुलस्त्येनयदुक्तंतेसर्वमेतद्भविष्यति॥३१॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिपूर्ववसिष्ठेनपुलस्त्येनचधीमता॥यदुक्तंततस्मृतिंयातंत्वत्प्रश्नादखिलंमम॥३२॥सोऽहंवदाम्यशेषंतेमै
त्रेयपरिपृच्छते॥पुराणसंहितासम्यक्तांनिबोधयथातथं॥३३॥विष्णोःसकाशादुद्भूतंजगत्तत्रैवसंस्थितं॥स्थिति
संयमकर्त्तासौजगतोऽस्यजगच्चसः॥३४॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेप्रथमोध्यायः॥अविकारायशुद्धायनि
त्यायपरमात्मने॥सदैकरूपरूपायविष्णवेसर्वजिष्णवे॥१॥नमोहिरण्यगर्भायहरयेशंकरायच॥वासुदेवायतारा
यसर्गस्थित्यंतकारिणे॥२॥एकानेकस्वरूपायस्थूलसूक्ष्मात्मनेनमः॥अव्यक्तव्यक्तरूपायविष्णवेमुक्तिहेतवे॥
॥३॥सर्गस्थितिविनाशानांजगतोयजगन्मयः॥मूलभूतोनमस्तस्मैविष्णवेपरमात्मने॥४॥आधारभूतंविश्वस्याप्य
णीयांसमणीयसां॥प्रणम्यसर्वभूतस्थमच्युतंपुरुषोत्तमं॥५॥ज्ञानस्वरूपमत्यंतनिर्मलंपरमार्थतः॥६॥तमेवार्थ
स्वरूपेणभ्रांतिदर्शनतःस्थितं॥६॥विष्णुंग्रसिष्णुंसर्वस्यस्थितिसर्गेतथाप्रभुं॥प्रणम्यजगतामीशमजमक्षयमव्ययं
॥७॥कथयामियथापूर्वंदक्षाद्यैर्मुनिसत्तमैः॥पृष्टःप्रोवाचभगवानब्जयोनिःपितामहः॥८॥तैश्चोक्तंपुरुकुत्साय
भूभुजेनर्मदातटे॥सारस्वतायतेनापिममसारस्वतेनच॥९॥परःपरेभ्यःपरमःपरमात्मात्मसंस्थितः॥रूपवर्ण
नामादिनिर्देशविशेषगुणवर्ज्जितः॥१०॥अपयक्षविनाशाभ्यांपरिणामर्द्धिजन्मभिः॥वर्जितःशक्यतेवक्तुंयःसदास्ती
तिकेवलं॥११॥सर्वत्रासौसमस्तांचवसत्यत्रचवैयतः॥ततःसवासुदेवेतिविद्वद्भिःपरिपच्यते॥१२॥तद्ब्रह्मपरमंनित्य

मजमक्षयमव्ययं॥एकस्वरूपंनसदाहेयाभावाच्चनिर्मलं॥१३॥तदेवसर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत्॥तथापुरुषरूपेणका
लरूपेणचस्थितं॥१४॥परस्यब्रह्मणोरूपंपुरुषःप्रथमंद्विज॥व्यक्ताव्यक्तेतथैवान्येरूपेकालस्तथापरं॥१५॥प्रधानपुरुष
व्यक्तकालानांपरमंहियत्॥पश्यंतिसूरयःशुद्धंतद्विष्णोःपरमंपदं॥१६॥व्यक्तंविष्णुस्तथाव्यक्तंप्रधानपुरुषव्यक्तकालांस्तु
प्रविभागशः॥रूपाणिस्थितिसर्गांतव्यक्तिसद्भावहेतवः॥१७॥व्यक्तंविष्णुस्तथाव्यक्तंपुरुषःकालएवच॥क्रीडतोबालक
स्येवचेष्टांतस्यनिशामय॥१८॥अव्यक्तंकारणंयत्तत्प्रधानमृषिसत्तमैः॥प्रोच्यतेप्रकृतिःसूक्ष्मानित्यंसदसदात्मिका॥१९॥
अव्ययंनान्यदाधारममेयमजरंध्रुवं॥शब्दस्पर्शविहीनंतद्रूपादिभिरसंगतं॥२०॥त्रिगुणंतज्जगद्योनिरनादिप्रभवाव्य
यं॥तेनाग्रसर्वमेवासीद्व्याप्तंवैप्रलयादनु॥२१॥वेदवादविदोविद्वन्नियताब्रह्मवादिनः॥पठंतिवैतमेवार्थंप्रधानप्रतिपा
दकं॥२२॥नाहोनरात्रिर्ननभोनभूमिर्नासीत्तमोज्योतिरभून्नचान्यत्॥श्रोत्रादिबुद्ध्यानुपलभ्यमेकंप्राधानिकंब्रह्मपु
मांस्तदासीत्॥२३॥विष्णोःस्वरूपात्परतोहितेन्येरूपेप्रधानंपुरुषश्चविप्र॥तस्यैवतेऽन्येनधृतेवियुक्तेरूपादियत्तद्द्विजका
लसंज्ञं॥२४॥प्रकृतौसंस्थितंव्यक्तमतीतप्रलयेतुयत्॥तस्मात्प्राकृतसंज्ञोयमुच्यतेप्रतिसंचरः॥२५॥अनादिर्भ
गवान्कालोनांतोऽस्यद्विजविद्यते॥अव्युच्छिन्नास्ततस्त्वेतेसर्गस्थित्यंतसंयमाः॥२६॥गुणसाम्येततस्मिन्पृथक्
पुंसिव्यवस्थिते॥कालस्वरूपंरूपंतद्विष्णोर्मैत्रेयवर्त्तते॥ततस्तुतत्परंब्रह्मपरमात्माजगन्मयः॥सर्वगःसर्वभूतेशः

परमात्मापरेश्वरः॥२८॥प्रधानपुरुषंचापिप्रविश्यात्मेछयाहरिः॥क्षोभयामाससंप्राप्तेसर्गकालेव्ययाव्ययो॥२९॥यथासंनि
धिमात्रेणगंधःक्षोभयजायते॥मनसोनोपकर्तृत्वात्तथासौपरमेश्वरः॥३०॥सएवक्षोभकोब्रह्मन्क्षोभ्यश्चपुरुषोत्तमः॥
ससंकोचविकाशाभ्यांप्रधानत्वेव्यवस्थितः॥३१॥विकाशोणुस्वरूपश्चब्रह्मरूपादिभिस्तथा॥व्यक्तस्वरूपश्चतथाविष्णुःस
र्वेश्वरेश्वरः॥३२॥गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने॥गुणव्यंजनसंभूतिःसर्गकालेद्विजोत्तमे॥प्रधानतत्वमु
द्भूतंमहांतंतत्समावृणोत्॥सात्विकोराजसश्चैवतामसश्चत्रिधामहान्॥३४॥प्रधानतत्वेनसमंत्वयाबीजमिवावृतं॥वै
कारिकस्तैजसश्चभूतादिश्चैवतामसः॥३५॥त्रिविधोऽयमहंकारोमहत्तत्वादजायत॥भूतेंद्रियाणांहेतुःसत्रिगुणत्वान्म
हामुने॥३६॥यथाप्रधानेनमहान्महतासतथावृतः॥भूतादिस्तुविकुर्वाणःशब्दतन्मात्रकंततः॥३७॥ससर्ज्जशब्दतन्मा
त्रादाकाशंशब्दलक्षणं॥शब्दमात्रंतथाकाशंभूतादिःससमावृणोत्॥३८॥आकाशस्तुविकुर्वाणःस्पर्शमात्रंससर्ज्ज
ह॥बलवानभवद्वायुस्तस्यस्पर्शोगुणोमतः॥३९॥आकाशंशब्दमात्रंतुस्पर्शमात्रंसमावृणोत्॥ततोवायुर्विकुर्वाणो
रूपमात्रंससर्जह॥४०॥ज्योतिरुत्पद्यतेवायोस्तद्रूपगुणमुच्यते॥स्पर्शमात्रंतुवैवायुरूपमात्रंसमावृणोत्॥४१॥ज्योतिश्चा
पिविकुर्वाणंरसमात्रंससर्जथह॥संभवंतिततोंभांसिरसाधाराणितानितु॥४२॥रसमात्राणिचांभांसिरूपमात्रंसमावृ
णोत्॥विकुर्वाणानिचांभांसिगंधमात्रंससर्ज्जिरे॥४३॥संघातोजायतेतस्मात्तस्यगंधोगुणोमतः॥तस्मिंस्तस्मिंस्तुतन्मात्रा

स्तेनतन्मात्रकाःस्मृताः॥४४॥तन्मात्राण्यविशेषाण्यविशेषास्ततोहिते॥नशांतानापितेघोरानमूढाश्चाविशेषिणः॥४५॥भू
ततन्मात्रसर्गोयमहंकारात्तुतामसात्॥तैजसानींद्रियाण्याहुर्देवावैकारिकादश॥४६॥एकादशंमनश्चात्रदेवावैकारिकाःस्मृताः
॥त्वक्चक्षुर्नासिकाजिह्वाश्रोत्रमत्रचपंचमं॥४७॥शब्दादीनामवाप्त्यर्थंबुद्धियुक्तानिवैद्विज॥पायूपस्थंकरौपादौवाक्चमैत्रे
यपंचमी॥४८॥विसर्गशिल्पगत्युक्तिकर्मतेषांचकथ्यते॥आकाशवायुतेजांसिसलिलंपृथिवीतथा॥४९॥शब्दादिभिर्गुणैर्ब्र
ह्मन्संयुक्तान्युत्तरोत्तरैः॥शांताघोराश्चमूढाश्चविशेषास्तेनतेस्मृताः॥५०॥नानावीर्याःपृथग्भूतास्ततस्तेसंहतिंविना॥ना
शक्नुवन्प्रजाःस्रष्टुमसमागम्यकृत्स्नशः॥५१॥समेत्यान्योन्यसंयोगंपरस्परसमाश्रयात्॥एकसंघातलक्ष्याश्चसंप्रा
प्यैक्यमशेषतः॥५२॥पुरुषाधिष्ठितत्वाच्चप्रधानानुग्रहेणच॥महदादयोविशेषांतास्त्वंडमुत्पादयंतिते॥५३॥तत्क्रमेणप्रवृ
द्धंतुजलबुद्बुदवत्समं॥भूतेभ्योंडंमहाबुद्धेबृहत्तदुदकेशयं॥५४॥प्राकृतंब्रह्मरूपस्यविष्णोःस्थानमनुत्तमं॥तत्राव्यक्तस्व
रूपोसौव्यक्तरूपीजगत्पतिः॥५५॥विष्णुर्ब्रह्मस्वरूपेणस्वयमेवव्यवस्थितः॥मेरुरुल्वमभूत्तस्यजरायुश्चमहीधराः॥
५६॥गर्भोदकंसमुद्राश्चतस्यासन्सुमहात्मनः॥साद्रिद्वीपसमुद्राश्चसज्योतिर्लोकसंग्रहः॥५७॥तस्मिन्नंडेभवद्विप्रसदेवा
सुरमानुषं॥वारिवह्न्यनिलाकाशैस्ततोभूतादिनाबहिः॥५८॥वृतंदशगुणैरंडंभूतादिर्महतातथा॥अव्यक्तेनावृतोब्रह्मं
स्तैःसर्वैःसहितोमहान्॥५९॥एभिरावरणैरंडंसप्तभिःप्राकृतैर्वृतं॥नालिकेरफलस्यांतर्बीजंबाह्यदलैरिव॥६०॥

विष्णु० ४

जुषन्रजोगुणंतत्रस्वयंविश्वेश्वरोहरिः॥ब्रह्माभूत्वास्यजगतोसृष्टौसंप्रवर्त्तते॥६१॥सृष्टंचपात्यनुयुगंयावत्कल्पविक
ल्पना॥सत्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः॥६२॥तमोद्रेकीचकल्पांतेरुद्ररूपीजनार्दनः॥मैत्रेयाखिलभूतानिभक्षय
त्यतिभीषणः॥६३॥संभक्षयित्वाभूतानिजगत्येकार्णवीकृते॥नागपर्यंकशयनेशेतेसपरमेश्वरः॥६४॥प्रबुद्धश्चपुनःसृ
ष्टिंकरोतिब्रह्मरूपधृक्॥सृष्टिस्थित्यंतकरणीब्रह्मविष्णुशिवात्मिकां॥६५॥ससंज्ञांयातिभगवानेकएवजनार्दनः॥स्रष्टा
सृजतिचात्मानंविष्णुःपाल्यंचपातिच॥६६॥उपसंह्रियतेचांतेसंहर्त्ताचस्वयंप्रभुः॥पृथिव्यापस्तथातेजोवायुराकाशमेव
च॥६७॥सर्वेंद्रियांतःकरणंपुरुषाख्यंहियज्जगत्॥सएवसर्वभूतेशोविश्वरूपोयतोव्ययः॥६८॥सर्गादिकंततोस्यैवभू
तस्थमुपकारकं॥सएवसृज्यःसचसर्गकर्त्तासएवपात्यत्तिचपाल्यतेऽसौ॥ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो
वरदोवरेण्यः॥७०॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंशेद्वितीयोध्यायः॥ ॥मैत्रेयउवाच॥निर्गुणस्याप्रमेयस्यशुद्ध
स्याप्यमलात्मनः॥कथंसर्गादिकर्तृत्वंब्रह्मणोभ्युपपद्यते॥पराशरउवाच॥शक्तयःसर्वभावानामचिंताज्ञानगोचराः॥
यतोतोब्रह्मणस्तास्तुसर्गाद्याभावशक्तयः॥२॥भवंतितपतांश्रेष्ठपावकस्ययथोष्णता॥निर्गुणोपितथासर्गेतन्निभ
गवान्संप्रवर्त्तते॥३॥नारायणाख्योविश्वात्माब्रह्मालोकपितामहः॥उत्पन्नःप्रोच्यतेविद्वन्नित्यएवोपचारतः॥४॥निजे
नतस्यमानेनआयुर्वर्षशतंस्मृतं॥तत्पराख्यंतदर्द्धंचपरार्द्धमभिधीयते॥५॥कालःस्वरूपंविष्णोश्चयन्मयोक्तंतवान

प्र० ४

घ॥तेनतस्यनिबोधत्वंपरिमाणोपपादनं॥६॥अन्येषांचैवजंतूनांचराणामचराश्चये॥भूभूभृत्सागरादीनांअशेषाणांच
सत्तम॥७॥काष्ठापंचदशाख्यातानिमेषामुनिसत्तम॥काष्ठास्त्रिंशत्कलास्त्रिंशत्कालोमौहूर्त्तिकोविधिः॥८॥तावत्संख्यैरहो
रात्रंमुहूर्त्तैर्मानुषंस्मृतं॥अहोरात्राणितावंतिमासःपक्षद्वयात्मकः॥तैःषड्भिरयनंवर्षंद्वेयनेदक्षिणोत्तरे॥अयनंदक्षिणं
रात्रिर्देवानामुत्तरंदिनं॥१०॥दिव्यैर्वर्षसहस्रैस्तुकृतत्रेतादिसंज्ञितं॥चतुर्युगंद्वादशभिस्तद्विभागंनिबोधमे॥११॥चत्वारि
त्रीणिद्वेचैकंकृतादिषुयथाक्रमं॥दिव्याब्दानांसहस्राणियुगेष्वाहुःपुराविदः॥१२॥तत्प्रमाणैःशतैःसंध्यापूर्वातत्राभिधीयते
संध्यांशकश्चतत्तुल्योयुगस्यानंतरोहिसः॥१३॥संध्यासंध्यांशयोरंतर्यःकालोमुनिसत्तम॥युगाख्यःसतुविज्ञेयःकृतत्रेता
दिसंज्ञितः॥१४॥कृतंत्रेताद्वापरंचकलिश्चैवचतुर्युगं॥प्रोच्यतेतत्सहस्रंतुब्रह्मणोदिवसोमुने॥१५॥ब्रह्मणोदिवसे
ब्रह्मन्मनवश्चचतुर्दश॥भवंतिपरिमाणंतुतेषांकालकृतंशृणु॥१६॥सप्तर्षयःसुराःशक्रोमनुस्तत्सूनवोनृपाः॥एक
कालेतुसृज्यंतेसंह्रियंतेचपूर्ववत्॥१७॥चतुर्युगानांसंख्यातासाधिकाह्येकसप्ततिः॥मन्वंतरंमनोःकालःसुरादीनांच
सत्तम॥१८॥अष्टौशतसहस्राणिदिव्यायासंख्ययास्मृतं॥द्विपंचाशत्तथान्यानिसहस्राण्यधिकानितु॥१९॥त्रिंशत्को
ट्यस्तुसंपूर्णाःसंख्याताःसंख्ययामुने॥सप्तषष्टिस्तथान्यानिनियुतानिमहामुने॥२०॥विंशतिश्चसहस्राणिकालोयं
साधिकंविना॥मन्वंतरस्यसंख्येयंमानुषैर्वत्सरैर्द्विज॥२१॥चतुर्दशगुणोह्येषकालोब्राह्ममहःस्मृतं॥ब्राह्मोनैमित्ति

कोनामतस्यांतेप्रतिसंचरः॥२२॥तदाहिदह्यतेसर्वंत्रैलोक्यंभूर्भुवादिकं॥जनंप्रयांतितापार्त्तामहर्लोकनिकासिनः॥२३॥
एकार्णवेतुत्रैलोक्येब्रह्मानारायणात्मकः॥भोगिशय्यागतःशेतेत्रैलोक्यग्रासबृंहित॥२४॥जनस्थैर्योगिभिर्देवश्चिंत्य
मानोब्जसंभवः॥तत्प्रमाणांहितांरात्रिंतदंतेसृजतेपुनः॥२५॥एवंतुब्रह्मणोवर्षमेवंवर्षशतंतुयत्॥शतंहितस्यवर्षाणां
परमायुर्महात्मनः॥२६॥तदेकंसंव्यतीतंतुपरार्द्धंब्रह्मणोनघ॥तस्यांतेभून्महाकल्पपद्मइत्यभिविश्रुतः॥२७॥द्वितीय
स्यपरार्द्धस्यवर्त्तमानस्यवैद्विज॥वराहइतिकल्पोयंप्रथमःपरिकीर्त्तितः॥२८॥ ॥इतिश्रीविष्णुपुराणेतृतीयोऽध्यायः॥
मैत्रेयउवाच॥ब्रह्मानारायणाख्योसौकल्पादौभगवान्यथा॥ससर्ज्जसर्वभूतानितदाचक्ष्वमहामते॥१॥श्रीपराशर
उवाच॥प्रजाःससर्ज्जभगवान्ब्रह्मानारायणात्मकः॥प्रजापतिःपतिर्देवोयथातन्मेनिशामय॥२॥अतीतकल्पावसा
नेनिशासुप्तोत्थितःप्रभुः॥सत्वोद्रिक्तस्तदाब्रह्माशून्यंलोकमवैक्षत॥३॥नारायणःपरोचिंत्यःपरेषामपिसप्रभुः॥ब्रह्म
स्वरूपीभगवाननादिःसर्वसंभवः॥४॥इमंचोदाहरंत्यत्रश्लोकंरायणंप्रति॥ब्रह्मस्वरूपिणंदेवंजगतःप्रभवाव्ययं॥
॥५॥आपोनाराइतिप्रोक्ताआपोवैनरसूनवः॥तायदस्यायनंपूर्वंतेननारायणःस्मृतः॥६॥तोयांतःसमहींज्ञात्वाजग
त्येकार्णवेप्रभुः॥अनुमानात्तदुद्धारंकर्त्तुकामःप्रजापतिः॥७॥अकरोत्सतनूमन्यांकल्पादिषुयथापुरा॥मत्स्यकूर्मादि
कांतद्वद्वाराहंरूपमास्थितः॥८॥वेदयज्ञमयंरूपमशेषजगतःस्थिते॥स्थिरात्मासर्वात्मापरमात्माजनार्दनः॥९॥जनलो

कगतैःसिद्धैःसनकाद्यैरभिष्टुतः॥प्रविवेशतदातोयमात्माधारोधराधरः॥१०॥निरीक्ष्यतंतदादेवीपातालतल
मागतं॥तुष्टावप्रणताभूत्वाभक्तिनम्रावसुंधरा॥११॥पृथिवीउ०॥नमस्तेसर्वभूतायचक्रशंखगदाधर॥मामु
द्धरास्मादद्यत्वंत्तोहंपूर्वमुत्थिता॥१२॥त्वत्तोहमुद्धृतापूर्वंत्वन्मयाहंजनार्दन॥यथान्यानिचभूतानिगगनादीन्यशे
षतः॥१३॥नमस्तेपरमात्मात्मन्पुरुषात्मन्नमोस्तुते॥प्रधानव्यक्तरूपायकालरूपायतेनमः॥१४॥त्वंकर्त्तासर्वभूता
नांपातात्वंचविनाशकृत्॥सर्गादिषुप्रभोब्रह्मविष्णुरुद्रात्मरूपधृक्॥१५॥संभक्षयित्वासकलंजगत्येकार्णवीकृते॥शे
षेत्वमेवगोविंदचिंत्यमानोमनीषिभिः॥१६॥भवतोयत्परंरूपंतन्नजानातिकश्चन॥अवतारेषुयद्रूपंतदर्चंतिदिवौ
कसः॥त्वामाराध्यपरंब्रह्मयातामुक्तिंमुमुक्षवः॥वासुदेवमनाराध्यकोमोक्षंसमवाप्स्यति॥१८॥यत्किंचिन्मनसा
ग्राह्यंयद्ग्राह्यंचक्षुरादिभिः॥बुद्ध्यातुयत्परिच्छेद्यंतद्रूपमखिलंतव॥१९॥त्वन्मयाहंत्वदाधारात्वत्सृष्टात्वामुपाश्रि
ता॥माधवीमितिलोकोयमभिधत्तेततोहिमां॥जयाखिलज्ञानमयजयस्थूलमयाव्यय॥जयानंतजयाव्यक्त
परावरात्मन्विश्वात्मन्जययज्ञपतेनघ॥त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारस्त्वमग्नयः॥२२॥त्वंवेदास्त्वंतदंगानित्वंय
ज्ञपुरुषोहरे॥सूर्यादयोग्रहास्तारानक्षत्राण्यखिलंजगत्॥२३॥मूर्त्तामूर्त्तमदृश्यंचदृश्यंचपुरुषोत्तम॥यच्चोक्तंय
च्चनैवोक्तंमयात्रपरमेश्वर॥तत्सर्वंत्वंनमस्तुभ्यंभूयोभूयोनमोनमः॥२४॥एवंसंस्तूयमानस्तुपृथिवीधरः॥सा

वराहः

विष्णु०
६

मस्वनध्वनिंश्रीमानजगर्ज्जपरिघर्घरं॥२५॥ततःसुमुक्षिप्यधरांस्वदंष्ट्र्यामहावराहःस्फुटपद्मलोचनः॥रसातलादुत्
लसपत्रसन्निभः॥२६॥समुत्थितोनीलइवाचलोमहान्॥२६॥उत्तिष्ठतातेनमुखानिलाहतेतत्संप्लवेभोजनलोकसं
श्रयान्॥सनंदनादीनपकल्मषान्मुनीन्चकारभूयोतिपवित्रतास्पृ॥२७॥प्रयांतितोयानिखुराग्रविक्षतेरसातले
धःकृतशब्दसंततो॥श्वासानिलास्ताःपुरतःप्रयांतिसिद्धाजनेयेनियतंवसंति॥२८॥उत्तिष्ठतस्तस्यजलार्द्रकुर्महाव
राहस्यमहींविधृत्य॥विधुन्वतोवेदमयंशरीरंरोमांतरस्थामुनयःस्तुवंति॥२९॥तंतुष्टुवुस्तोषपरीतचेतसोलोकेजने
येनिवसंतियोगिनः॥सनंदनाद्यानतिनम्रकंधराधराधरंधीरतरोद्धतेक्षणं॥३०॥जयेश्वराणांपरमेशकेशवप्र
भोगदाशंखधरासिचक्रधृक्॥प्रसूतिनाशस्थितिहेतुरीश्वरःत्वमेवनान्यःपरमंचयत्पदं॥३१॥पादेषुवेदास्तवयूपदं
ष्ट्रादंतेषुयज्ञाश्चितयश्चवक्त्रे॥हुताशजिह्वोसितनूरुहाणिदर्भाःप्रभोयज्ञपुमांस्त्वमेव॥३२॥विलोचनेरात्र्यहनीम
हात्मनःसर्वास्पदंब्रह्मपरंशिरस्ते॥सूक्तानिसर्वाणिसटाकलापोघ्राणंसमस्तानिहवींषिदेव॥३३॥स्रुक्तुंडसामस्व
रधीरनादप्राग्वंशकायोखिलसत्रसंधिः॥पूर्त्तेष्टधर्मश्रवणोसिदेवसनातनात्मन्भगवन्प्रसीद॥३४॥पदक्रमा
क्रांतमनंतमादिस्थितंत्वमेवाक्षरविश्वमूर्त्ते॥विश्वस्यवंद्यःपरमेश्वरोसिप्रसीदनाथोसिचराचरस्य॥३५॥दंष्ट्राग्र
विन्यस्तमशेषमेतद्भूमंडलंनाथविभाव्यतेते॥विगाहतःपद्मवनंविलग्नंसरोजिनीपत्रमिवोढपंकं॥३६॥द्यावा

प्र०
६

पृथिव्योरतुलप्रभावयदंतरंतद्वपुषातवैव॥व्याप्तंजगद्व्यापिसमस्तमूर्त्तिर्हितायविश्वस्यविभोभवत्वं॥३७॥परमार्थ
स्त्वमेवैकोनान्योस्तिजगतःपतिः॥तवैषमहिमायेनव्याप्तमेतच्चराचरं॥३८॥यदेतद्दृश्यतेमूर्त्तिमेतत्ज्ञानात्मनस्तव॥
भ्रांतिज्ञानेनपश्यंतिजगद्रूपमयोगिनः॥३९॥ज्ञानस्वरूपमखिलंजगदेतदबुद्धयः॥अर्थस्वरूपंपश्यंतोभ्राम्यंतेमो
हसंप्लवे॥४०॥येतुज्ञानविदःशुद्धचेतसस्तेखिलंजगत्॥ज्ञानात्मकंप्रपश्यंतित्वद्रूपंपरमेश्वर॥४१॥प्रसीदसर्वस
र्वात्मन्भवयज्ञगतामिमां॥समुद्धउद्धरोर्वीशममेयात्मन्शंनोदेह्यब्जलोचन॥४२॥सत्वोद्रिक्तोसिभगवन्गोविंदपृ
थिवीमिमां॥समुद्धरभवायेहशंनोदेह्यब्जलोचन॥सर्गप्रवृत्तिर्भवतोजगतामुपकारिणी॥भवत्वेषानमस्तेस्तुशंनोदेह्य
ब्जलोचन॥४४॥एवंसंस्तूयमानस्तुपरमात्मामहीधरः॥उज्जहारमहींक्षिप्रंन्यस्तवान्समहार्णवे॥४५॥तस्योपरि
जलौघस्यमहतीनौरिवस्थिता॥विततत्वात्तुदेहस्यनमहीयातिसंप्लवं॥४६॥ततःक्षितिंसमांकृत्वापृथिव्यांसोचिनो
गिरीन्॥यथाविभागंभगवाननादिपरमेश्वरः॥४७॥प्राक्सर्गदग्धनखिलान्पर्वतान्पृथिवीतले॥अमोघेनप्रभावेन
ससर्जामोघवांछितः॥४८॥भूविभागंततःकृत्वासप्तद्वीपंयथातथं॥भूराद्यांश्चतुरोलोकान्पूर्ववत्समकल्पयत्॥
॥४९॥ब्रह्मरूपधरोदेवस्ततोसौरजसावृतः॥चकारसृष्टिंभगवांश्चतुर्वक्त्रधरोहरिः॥५०॥निमित्तमात्रमेवासौस
ज्यानांसर्ज्यकर्मणि॥प्रधानकारणीभूतायतोवैसृज्यशक्तयः॥५१॥निमित्तमात्रंमुक्त्वैकंनान्यत्किंचिदपेक्ष

ने॥ नीयतेतपसाश्रेष्ठस्त्वशावसुवस्तुता॥५२॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेचतुर्थोध्यायः॥ ॥मैत्रेयउवाच॥ यथास
सर्ज्जदेवेशोदेवर्षिपितृदैवानू॥ मनुष्यतिर्यग्वृक्षादीनूभूव्योमसलिलौकसः॥१॥ यद्गुणंयत्स्वभावंचयद्रूपंचजगद्द्विज॥
सर्गादौसृष्टवान्ब्रह्मातन्ममाचक्ष्वविस्तरात्॥२॥ श्रीपराशरउवाच॥ मैत्रेयकथयामेषशृणुष्वसुसमाहितः॥ यथा
ससर्ज्जदेवेशोदेवादीनखिलानूविभुः॥३॥ सृष्टिंचिंतयतस्तस्यकल्पादिषुयथापुरा॥ अबुद्धिपूर्वकःसर्गःप्रादुरासीत्तमो
मयः॥४॥ तमोमोहोमहामोहस्तामिश्रोह्यंधसंज्ञितः॥ अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनः॥५॥ पंचधावस्थितःसर्गो
ध्यायतोप्रतिबोधवानू॥ बहिरंतश्चाप्रकाशःसंवृतात्मानगात्मकः॥६॥ मुख्यानगायतःप्रोक्तामुख्यसर्गस्ततस्त्वयं॥ तं
दृष्ट्वासाधकंसर्गममन्यदपरंपुनः॥७॥ तस्याभिध्यायतःपौक्तामुख्यसर्गतिर्यक्श्रोतोभ्यवर्त्तत॥ यस्मात्तिर्यक्प्रवृत्तः
सतिर्यक्श्रोतःस्मृतस्ततः॥८॥ पश्वादयस्तेविख्यातास्तमःप्रायाह्यवेदिनः॥ उत्पथग्राहिणश्चैवातेज्ञानेज्ञानमानिनः॥
॥९॥ अहंकृताअहंमानाअष्टाविंशद्विधात्मका॥ अंतःप्रकाशास्तेसर्वेआवृताश्चपरस्परं॥१०॥ तमप्यसाधकंदृष्ट्वा
ध्यायतोन्यस्ततोभवत्॥ ऊर्द्ध्वश्रोतस्तृतीयस्तुसात्विकोर्द्ध्वप्रवर्त्तते॥११॥ तेसुखप्रीतिबहुलाबहिरंतश्चनावृताः॥ प्रका
शाबहिरंतश्चऊर्ध्वश्रोतोभवाःस्मृताः॥१२॥ तुष्ट्यात्मकस्तृतीयस्तुदेवसर्गस्तुसस्मृतः॥ अस्मिन्सर्गेभवत्प्रीतिर्निष्प
न्नोब्रह्मणस्तदा॥१३॥ ततोन्यंसतदादध्यौसाधकंसर्गमुत्तमं॥ असाधकांस्तुतानूज्ञात्वामुख्यसर्गादिसंभवान्॥

॥१४॥ तदाभिध्यायतस्तस्यसत्याभिध्यायिनस्ततः॥ प्रादुर्भूतस्तदाव्यक्तादर्वाक्श्रोतस्तुसाधकः॥१५॥ यस्मादर्वाक्प्रवृ
त्तःसततोर्वाक्श्रोतउच्यते॥ तेचप्रकाशबहुलास्तमोद्रिक्तारजोधिका॥१६॥ तस्मात्तेदुःखबहुलाभूयश्चकारिणः॥ प्रका
शाबहिरंतश्चमनुष्याःसाधकास्तुते॥१७॥ इत्येतेकथिताःसर्गाःसप्तात्रमुनिसत्तम॥ प्रथमोमहतःसर्गोविज्ञेयोब्रह्मणा
स्तुतः॥१८॥ तन्मात्राणांद्वितीयस्तुभूतसर्गोहिसस्मृतः॥ वैकारिकस्तृतीयस्तुसर्गऐंद्रियकास्मृतः॥१९॥ इत्येषप्राकृतः
सर्गःसंभूतोबुद्धिपूर्वकः॥ मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः॥२०॥ तिर्यक्श्रोतस्तुयःप्रोक्तस्तैर्यग्योन्यः
सउच्यते॥ तथोर्द्ध्वश्रोतसांषष्ठोदेवसर्गस्तुसस्मृतः॥२१॥ ततोर्वाक्श्रोतसांसर्गःसप्तमःसतुमानुषः॥ अष्टमोनुग्रहः
सर्गोसात्विकस्तामसश्चयः॥२२॥ पंचैतेविकृताःसर्गाःप्राकृतास्तुत्रयःस्मृताः॥ प्राकृतोवैकृतश्चैवकौमारोनवमःस्मृ
तः॥२३॥ इत्येतेवैसमाख्यातानवसर्गाःप्रजापतेः॥ प्राकृतावैकृताश्चैवजगतोमूलहेतव॥२४॥ सृजतोजगदीशस्यकिं
मन्यच्छ्रोतुमर्हसि॥ मैत्रेयउवाच॥ संक्षेपात्कथिताःसर्गादेवादीनांमुनेत्वया॥ विस्तरांच्छ्रोतुमिच्छामित्वत्तोमुनिवरोत्त
म॥२६॥ श्रीपराशरउवाच॥ कर्मभिर्भाविताःपूर्वैःकुशलाकुशलैस्तथा॥ ख्यातातथाह्यनिर्मुक्ताःसंसारेह्युपसंहृताः
॥२७॥ स्थावरांताःसुराद्यास्तुप्रजाब्रह्मंश्चतुर्विधः॥ ब्रह्मणःकुर्वतःसृष्टिंजज्ञिरेमानसाःसुताः॥२८॥ ततोदेवासुरपि
तॄनूमानुषांश्चचतुष्टयं॥ सिसृक्षुरंभांस्येतानिस्वमात्मातमयूयुजत्॥२९॥ युक्तात्मनस्तमोमात्राउद्रिक्ताभूत्प्रजायते॥

वि॰पु॰
८

सिसृक्षोर्जघनात्पूर्वमसुरा जज्ञिरे ततः॥३०॥ उत्ससर्ज ततस्तां तु तमोमात्रात्मिकां तनुं॥ सा तु त्यक्ता तनुस्तेन मैत्रेयाभू
द्विभावरी॥३१॥ सिसृक्षोरन्यदेहस्थ प्रीतिमाप ततः सुराः॥ सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज॥३२॥ त्यक्ता सापि
तनुस्तेन सत्त्वप्रायमभूद्दिनं॥ ततो हि बलिनो रात्रावसुरा देवता दिवा॥३३॥ सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुं॥ पितृ
वन्मन्यमानस्य पितरस्तस्य जज्ञिरे॥३४॥ उत्ससर्ज पितॄन्सृष्ट्वा ततस्तामपि स प्रभुः॥ सा चोत्सृष्टाभवत्संध्या दिननक्तांत
रस्थितिः॥३५॥ रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः॥ रजोमात्रोत्कटा जाता मानुषा द्विजसत्तम॥३६॥ तामप्येवं स
तत्याज तनुं सद्यः प्रजापतिः॥ ज्योत्स्ना समभवत्सापि प्राक्संध्या याभिधीयते॥३७॥ ज्योत्स्नोद्गमे सुबलिनो मनुष्याः पि
तरस्तथा॥ ३ मैत्रेय संध्यासमये तस्मादेते भवंति वै॥३८॥ ज्योत्स्ना रात्र्यहनी संध्या चत्वार्येतानि वै विभोः॥ ब्रह्मणस्तु
शरीराणि त्रिगुणोपाश्रयाणि तु॥३९॥ रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुं॥ ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपस्त
या ततः॥४०॥ क्षुत्क्षामानंधकारे च सोऽसृजद्भगवांस्ततः॥ विरूपाः श्मश्रुला जाता धावंस्ते ततः प्रभुं॥४१॥ मैवं भो र
क्ष्यतामेष यैरुक्तं राक्षसास्तु ते॥ ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात्॥४२॥ अप्रियेणास्य तान्दृष्ट्वा के
शाः शीर्यंत वेधसः॥ हीनाश्च शिरसो भूयः समारोहत तेस्ततः शिरः॥ सर्पणात्तेऽभवन्सर्पा हीनत्वादहयः स्मृताः॥
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मानो विनिर्ममे॥४४॥ वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः॥ ध्यायतो गां समुत्प

प्र॰
८

न्ना गंधर्वास्तस्य तत्क्षणात्॥४५॥ पिबंतो जज्ञिरे वाचं गंधर्वास्तेन ते द्विज॥ एतानि सृष्ट्वा भगवान्ब्रह्मा तच्छक्तिनोदितः॥
ततः स्वच्छंदतोऽन्यानि वयांसि यसोऽसृजत्॥ अवयो वक्षसश्चक्रे मुखतोऽजान्स सृष्टवान्॥४७॥ सृष्टवानुदराद्गाश्च पार्श्वा
भ्यां च प्रजापतिः॥ पद्भ्यां चाश्वान्समातंगान्रासभान्गवयान्मृगान्॥४८॥ उष्ट्रानश्वतरांश्चैव पशूनन्यांश्च जात
यः॥ ओषध्यः फलमूलादि रोमभ्यस्तस्य जज्ञिरे॥४९॥ त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तमः॥ सृष्ट्वा पश्वोषधीः सम्य
ग्युयोज स तदाध्वरे॥५०॥ गौरजः पुरुषो मेषो अश्वाश्वतरगर्दभाः॥ एतान्ग्राम्यान्पशूनाहुरारण्यांश्च निबोध मे॥५१॥
श्वापदा द्विखुरा हस्ती वानराः पक्षिपंचमाः॥ उदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः॥५२॥ गायत्रं च ऋचश्चैव त्रिवृत्सामर
थंतरं॥ अग्निष्टोमं च यज्ञानां प्रथमान्निर्ममे मुखात्॥५३॥ सामानिज्ञ यजूंषि त्रैष्टुभं छंदः स्तोमं पंचदशं तथा॥ बृह
त्साम तथोक्थं च दक्षिणादसृजन्मुखात्॥५४॥ सामानि जगतीछंदः स्तोमं सप्तदशं तथा॥ वैरूपमतिरात्रं च पश्चिमा
दसृजन्मुखात्॥५५॥ एकविंशमथर्वाणमाप्तोर्यामाणमेव च॥ अनुष्टुभं स वैराजमुत्तरादसृजन्मुखात्॥५६॥ उच्चा
वचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे॥ देवासुरपितॄन्सृष्ट्वा मनुष्यांश्च प्रजापतिः॥५७॥ ततः पुनः ससर्जादौ संकल्प
त्स पितामहः॥ यक्षान्पिशाचान्गंधर्वान्तथैवाप्सरसां गणान्॥५८॥ नरकिन्नररक्षांसि वयःपशुमृगोरगान्॥
अव्ययं चैव यदिदं स्थाणुजंगमं॥ तत्ससर्ज तदा ब्रह्मा भगवानादिकृद्विभुः॥ तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्र
चव्यये

विष्णु०
१

प्रतिपेदिरे॥६०॥ तान्येवप्रतिपद्यंतेसृज्यमानाःपुनःपुनः॥ हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मवृतानृते॥६१॥ तद्भाविताःप्रप
द्यंतेतस्मात्तत्तस्यरोचते॥ इंद्रियार्थेषुभूतेषुशरीरेषुचसप्रभुः॥६२॥ नानात्वंविनियोगंचधातैवव्यसृजत्स्वयं॥ नामरू
पंचभूतानांकृत्यानांचप्रवर्त्तनं॥६३॥ देवशब्देभ्यएवादौदेवादीनांचकारसः॥ ऋषीणांनामधेयानियथावेदश्रुतानिवै॥६४॥
यथानियोगयोग्यानिसर्वेषामपिसोकरोत्॥ यथार्त्तावृतुलिंगानिनानारूपाणिपर्यये॥ दृश्यंतेतानितान्येवतथाभा
वायुगादिषु॥ करोत्येवंविधासृष्टिंकल्पादौसपुनःपुनः॥६६॥ सिसृक्षाशक्तियुक्तोसौसृज्यशक्तिप्रचोदितः॥६७॥ ॥
इतिश्रीविष्णुपुराणेप्रथमेंऽशेपंचमोध्यायः॥ ॥मैत्रेयउवाच॥ अर्वाक्स्रोतस्तुकथितोभवतायस्तुमानुषः॥ ब्रह्मन्
विस्तरतोब्रूहिब्रह्मातमसृजद्यथा॥१॥ चतुर्वर्णानसृजद्यद्गुणांश्चमहामुने॥ यश्चतेषांस्मृतंकर्मविप्रादीनांतदु
ध्या च्यतां॥२॥ श्रीपराशरउवाच॥ सत्याभिध्यायिनःपूर्वंसिसृक्षोर्ब्रह्मणोजगत्॥ अजायंतद्विजश्रेष्ठसत्वोद्रिक्तामुखात्प्रजाः
॥३॥ वक्षसोरजसोद्रिक्तास्तथान्याब्रह्मणोभवन्॥ रजसातमसाचैवसमुद्रिक्तास्तथोरुतः॥४॥ पद्भ्यामन्याःप्रजा
ब्रह्माससर्ज्जद्विजसत्तम॥ तमःप्रधानास्ताःसर्वाश्चातुर्वर्ण्यमिदंचतत्॥५॥ ब्राह्मणाक्षत्रियावैश्याःशूद्राश्चद्विज
सत्तम॥ पादोरुवक्षःस्थलतोमुखतश्चसमुद्गताः॥६॥ यज्ञनिष्पत्तयेसर्वमेतद्ब्रह्माचकारवै॥ चातुर्वर्ण्यंमहाभाग प्र०
यज्ञसाधनमुत्तमं॥ यज्ञैराप्यायितादेवावृष्ट्युत्सर्गेणवैप्रजाः॥ आप्याययंतिधर्मज्ञयज्ञाःकल्याणहेतवः॥८॥ १

स्व
निष्पाद्यंतेनरैस्तैस्तुधर्माभिरतैःसदा॥ विरुद्धाचरणीयेतैःसद्भिःसन्मार्गगामिभिः॥ स्वर्गापवर्गौमानुष्यात्प्राप्नुवंतिनरामुने
यद्वाभिरुचितंस्थानंतद्यांतिमनुजाद्विज॥१०॥ प्रजास्ताब्रह्मणासृष्टाश्चातुर्वर्ण्यव्यवस्थितौ॥ सम्यक्श्रद्धासमाचारप्रव
णामुनिसत्तम॥११॥ यथेच्छावासनिरताःसर्वाबाधाविवर्ज्जिताः॥ शुद्धांतःकरणाःशुद्धाःसर्वानुष्ठाननिर्मलाः॥ शुद्धेचतासां
मनसिशुद्धेंतःसंस्थितेहरौ॥ शुद्धज्ञानंप्रपश्यंतिविष्ण्वाख्यंयत्परंपदं॥१३॥ ततःकालात्मकोयोसौसचांशःकथितोहरेः॥
सपातयत्यघंघोरमल्पमल्पाल्पसारवत्॥१४॥ अधर्मबीजभूतंतमोलोभसमुद्भवं॥ प्रजासुतासुमैत्रेयरागादिकमसा
धकं॥ ततःसासहजासिद्धिस्तेषांनातीवजायते॥ रसोल्लासादयश्चान्याःसिद्धयोष्टौभवंतिया॥१६॥ तासुक्षीणास्वशेषासुव
र्द्धमानेचपातके॥ द्वंद्वाभिभावदुःखार्त्तास्ताभवंतिततःप्रजाः॥१७॥ ततोदुर्गाणिताश्चक्रुर्धाध्वन्यंपार्वतमौदकं॥ कृत्रिमं
चतथादुर्गंपुरखर्वटकादियत्॥१८॥ गृहाणिचयथान्यायंतेषुचक्रुःपुरादिषु॥ शीतवातातपादीनांप्रशमायमहामते॥१९॥
प्रतिकारमिमंकृत्वाशीतादेस्ताःप्रजाःपुनः॥ वार्त्तोपायंततश्चक्रुर्हस्तसिद्धिंचकर्मजां॥२०॥ व्रीहयश्चयवाश्चैवगोधूमाअ
णवस्तिलाः॥ प्रियंगवाह्युदाराश्चकोरदूषाःसचीणकाः॥२१॥ माषामुद्गामसूराश्चनिष्पावाःसकुलत्थकाः॥ आढक्य
श्चणकाश्चैवसणाःसप्तदशस्मृताः॥२२॥ इत्येताओषधीनांतुग्राम्याणांजातयोमुने॥ ओषध्योयाज्ञियाश्चैवग्राम्यार
ण्याश्चतुर्द्दश॥२३॥ व्रीहयस्तुयवामाषागोधूमाअणवस्तिलाः॥ प्रियंगुसप्तमाह्येतेष्टमास्तुकुलत्थकाः॥२४॥

विं॰पु॰
१०

श्यामकास्त्वथनीवाराजर्त्तिलाःसगवेधुकाः॥तथावेणुयवाःप्रोक्तास्तद्वन्मर्कटकामुने॥२५॥ग्राम्यारण्याःस्मृताह्येतेउष
ध्यश्चचतुर्दश॥यज्ञनिष्पत्तयेयज्ञस्तथामांहेतुरुत्तमं॥२६॥एताश्चसहयज्ञेनप्रजानांकारणंपरं॥परापरविदःप्राज्ञा
स्ततोयज्ञान्वितन्वते॥२७॥अहन्यहनितुष्टानांयज्ञानांमुनिसत्तम॥उपकारपरंपुंसांक्रियमाणाघशांतिदं॥२८॥येषांतु
कालसृष्टोसौपापबिंदुर्महामते॥चेतस्सुववृधेचक्रुस्तेनयज्ञेषुमानसं॥२९॥वेदवादांस्तथादेवान्यज्ञकर्मादिकंचयत्॥
तत्सर्वंनिंदमानास्तेयज्ञव्याषेधकारिणः॥३०॥प्रवृत्तिमार्गव्युच्छित्तिकारिणोवेदनिंदकाः॥दुरात्मानोदुराचाराबभूवुःकु
टिलाशयाः॥३१॥संसिद्धायांतुवार्त्तायांप्रजाःसृष्ट्वाप्रजापतिः॥मर्यादांस्थापयामासयथास्थानंयथागुणं॥३२॥वर्णाना
माश्रयाणांचधर्मान्धर्मभृतांवर॥लोकांश्चसर्ववर्णानांसम्यक्धर्मानुपालिनां॥३३॥प्राजापत्यंब्राह्मणानांस्मृतंस्थानं
क्रियावतां॥स्थानमैंद्रंक्षत्रियाणांसंग्रामेष्वनिवर्त्तिनां॥३४॥वैश्यानांमारुतंस्थानंस्वधर्ममनुवर्तिनां॥गांधर्वंशूद्रजा
तीनांपरचर्यानुवर्त्तिनां॥३५॥अष्टाशीतिसहस्राणांमुनीनामूर्ध्वरेतसां॥स्मृतंतेषांतुयत्स्थानंतदेवगुरुवासिनां॥३६॥
सप्तर्षीणांतुयत्स्थानंस्मृतंतद्वैवनौकसां॥प्राजापत्यंगृहस्थानांन्यासिनांब्रह्मसंज्ञितं॥३७॥योगिनाममृतंस्थानंय
द्विष्णोःपरमंपदं॥एकांतिनःसदाब्रह्मध्यायिनोयोगिनोहिये॥३८॥तेषांतत्परमंस्थानंयत्तत्पश्यंतिसूरयः॥गत्वाग
त्वानिवर्त्तंतेचंद्रसूर्यादयोग्रहाः॥३९॥अद्यापिननिवर्त्तंतेद्वादशाक्षरचिंतकाः॥तामिस्रमंधतामिस्रंमहारौरवरौरवौ॥४०॥

प्र॰
१०

DR. BHAU DAJI MEMORIAL

अपियत्रवनंघोरंकालसूत्रमवीचियत्॥विनिंदकानांवेदस्ययज्ञव्याघातकारिणां॥४१॥स्थानमेतत्समाख्यातंस्वधर्म
त्यागिनश्चये॥४२॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेषष्ठोध्यायः॥ ॥श्रीपराशरउवाच॥ततोभिध्यायतस्तस्यजज्ञि
रेमानसीःप्रजाः॥तच्छरीरसमुत्पन्नैःकार्यैस्तैःकारणैःसह॥१॥क्षेत्रज्ञाःसमवर्त्तंतगात्रेभ्यस्तस्यधीमतः॥तेसर्वेसमवर्त्ततये
मयाप्रागुदाहृताः॥२॥देवाद्याःस्थावरांताश्चत्रैगुण्यविषयेस्थिताः॥एवंभूतानिसृष्टानिचराणिस्थावराणिच॥३॥यदा
स्यताःप्रजाःसर्वानव्यवर्द्धंतधीमतः॥अथान्यान्मानसान्पुत्रान्सदृशानात्मनोसृजत्॥४॥भृगुंपुलस्त्यंक्रतुमंगिरसंत पुलहं
था॥मरीचिंदक्षमत्रिंचवशिष्ठंचैवमानसान्॥५॥नवब्रह्मणइत्येतेपुराणेनिश्चयंगताः॥सनंदनादयोयेचपूर्वंसृष्टाश्च
वेधसा॥६॥नतेलोकेष्वसज्जंतनिरपेक्षाःप्रजासुते॥सर्वेतेआगतज्ञानावीतरागाविमत्सराः॥७॥तेष्वेवंनिरपेक्षेषु
लोकसृष्टौमहात्मनः॥ब्रह्मणोभून्महाकोपस्त्रैलोक्यदहनक्षमः॥८॥तस्यक्रोधात्समुत्पन्नंज्वालामालातिदीपितं॥
ब्रह्मणोभूत्तदासर्वंत्रैलोक्यमखिलंमुने॥९॥भ्रुकुटीकुटिलात्तस्यललाटात्क्रोधदीपितात्॥समुत्पन्नस्तदारुद्रोम
ध्यान्हार्कसमप्रभः॥१०॥अर्द्धनारीनरवपुःप्रचंडोतिशरीरवान्॥विभजात्मानमित्युक्त्वातंब्रह्मांतर्दधेपुनः॥११॥
तथोक्तासौद्विधास्त्रीत्वंपुरुषत्वंतदाकरोत्॥बिभेदपुरुषत्वंचदशधाचैकधाचसः॥१२॥सौम्यासौम्यैस्तथाशांताशां
तैःस्त्रीत्वंचसप्रभुः॥बिभेदबहुधादेवःस्वरूपैरसितैःसितैः॥१३॥ततोब्रह्मात्मसंभूतंपूर्वंस्वायंभुवंप्रभुः॥आत्मा

वि०पु० नमेवकृतवान्प्रजापाल्येमनुंद्विज॥१४॥शातरूपांचतांनारींतपोनिर्द्धूतकल्मषं॥स्वायंभुवोमनुर्देवःपत्नीत्वेजगृहेप्रभु
११ नः॥तस्माच्चपुरुषाद्देवीसतरूपाव्यजयत्॥प्रियव्रतोत्तानपादौप्रसूत्याकूतिसंज्ञितं॥१६॥कन्याद्वयंचधर्मज्ञरूपौ
दार्यसमन्वितं॥ददौप्रसूतिंदक्षायआकूतिंरुचयेपुरा॥१७॥प्रजापतिःसजग्राहतयोर्यज्ञःसदक्षिणः॥पुत्रोजज्ञेमहा
भागादंपत्योर्मिथुनंततः॥१८॥यज्ञस्यदक्षिणायांचपुत्राद्वादशजज्ञिरे॥यामाइतिसमाख्यातादेवाःस्वायंभुवोमनौ॥
॥१९॥प्रसूत्यांततोदक्षश्चतस्रोविंशतिंतथा॥ससर्जकन्यास्तासांतुसम्यग्नामानिमेशृणु॥२०॥श्रद्धालक्ष्मीर्धृति
स्तुष्टिपुष्टिर्मेधाक्रियातथा॥बुद्धिर्लज्जावपुःशांतिरृद्धिःकीर्त्तिस्त्रयोदशी॥२१॥पत्न्यर्थंप्रतिजग्राहधर्मोदाक्षायणीः
प्रभुः॥ताभ्यःशिष्टायवीयस्यएकादशसुलोचनाः॥२२॥ख्यातिःसत्यथसंभूतिःस्मृतिःप्रीतिःक्षमातथा॥संततिश्चानु
सूयाचऊर्ज्जास्वाहास्वधातथा॥२३॥भृगुर्भवोमरीचिश्चतथाचैवांगिरामुनिः॥पुलस्त्यःपुलहश्चैवक्रतुश्चार्षिवरस्तथा
॥२४॥अत्रिर्वशिष्ठोवह्निश्चपितरश्चयथाक्रमं॥ख्यात्याद्याजगृहुःकन्यामुनयोमुनिसत्तम॥२५॥श्रद्धाकामंतथाद
र्पंनियमंधृतिरात्मजं॥संतोषंचतथातुष्टिःपुष्टिर्लोभमसूयत॥२६॥मेधाश्रुतंक्रियादंडंनयंविनयमेवच॥बोधंबु
द्धिस्तथालज्जाविनयंवपुरात्मजं॥२७॥व्यवसायंप्रजज्ञेचक्षेमंशांतिरसूयत॥सुखमृद्धिर्यशःकीर्त्तिरित्येतेधर्मसून प्र०
वः॥२८॥कामान्नंदीसुतंहर्षंधर्मपौत्रमसूयत॥हिंसाभार्यात्वधर्मस्यतयोर्जज्ञेतथानृतं॥२९॥कन्याचनिकृतिस्ताभ्यां ११

भयंनरकमेवच॥मायाचवेदनाचैवमिथुनंद्वयमेवयोः॥३०॥तयोर्जज्ञेथवैमायामृत्युंभूतापहारिणं॥वेदनाचसुतंचापि
दुःखंजज्ञेथरौरवात्॥मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्चजज्ञिरे॥दुःखोत्तराःस्मृताह्येतेसर्वेचाधर्मलक्षणाः॥३२॥तेषांभा
र्यास्तिपुत्रोवातेसर्वेह्यूर्द्ध्वरेतसः॥रौद्राण्येतानिरूपाणिविष्णोर्मुनिवरात्मज॥३३॥नित्यप्रलयहेतुत्वंजगतोस्यप्रयांतिवै
दक्षोमरीचिरत्रिश्चभृग्वाद्याश्चप्रजेश्वराः॥३४॥जगत्यत्रमहाभागनित्यसर्गस्यहेतवः॥मनवोमनुपुत्राश्चभूपावीर्यध
राश्चये॥३५॥सन्मार्गाभिरताःशूरास्तेनित्यंस्थितिकारणं॥मैत्रेयउवाच॥येयंनित्यास्थितिर्ब्रह्मन्नित्यसर्गस्त्वयेरितः॥
नित्याभावश्चतेषांवैस्वरूपंममकथ्यतां॥३६॥श्रीपराशरउवाच॥सर्गस्थितिविनाशांस्तुभगवान्मधुसूदनः॥तैस्तैरूपै
रचिंत्यात्माकरोत्यव्याहतोविभुः॥३८॥नैमित्तिकःप्राकृतिकःतथाचात्यंतिकोद्विज॥नित्यश्चसर्वभूतानांप्रलयोयंचतु
र्विधः॥३९॥ब्रह्मानैमित्तिकस्तत्रयच्छेतेजगतःपतिः॥प्रयातिप्राकृतेचैवंब्रह्मांडंप्रकृतौस्वयं॥४०॥ज्ञानादात्यंतिकःप्रो
क्तोयोगिनःपरमात्मनि॥नित्यःसदैवभूतानांयोविनाशोदिवानिशं॥४१॥प्रसूतिःप्रकृतेर्यातुसासृष्टिःप्राकृतीस्मृता॥
दैनंदिनीतथाप्रोक्तायांतप्रलयादनु॥४२॥भूतान्यनुदिनंयत्रजायंतेमुनिसत्तम॥नित्यसर्गोहिसःप्रोक्तःपुराणार्थवि
चक्षणैः॥४३॥एवंसर्वशरीरेषुभगवान्भूतभावनः॥संस्थितःकुरुतेविष्णुरुत्पत्तिस्थितिसंयमान्॥४४॥सृष्टिस्थि
तिविनाशानांशक्तयःसर्वदेहिषु॥वैष्णव्यःपरिवर्त्तंतेमैत्रेयाहर्निशंसदा॥४५॥गुणत्रयमयंह्येतद्ब्रह्मन्शक्तित्रयंम

वि०पु०
१२

हव॥योऽतियातिसयातिवपरंयानावर्त्ततेपुनः॥४६॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेसप्तमोध्यायः॥ ॥श्रीपराशरउवाच॥
कथितस्तामसःसर्गोब्रह्मणस्तेमहामुने॥रुद्रसर्गंप्रवक्ष्यामितन्मेनिगदतःशृणु॥१॥कल्पादावात्मनस्तुल्यंसुतंप्रध्याय
तस्ततः॥प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितः॥२॥रुरोदसुस्वरंसोथद्रवंश्चमुनिसत्तम॥किंरोदिषीतितंब्रह्मारुदंतंप्र
त्युवाचवै॥३॥नामदेहीतितंसोथप्रत्युवाचप्रजापतिः॥रुद्रस्त्वंदेवनाम्नासिमारोदीर्धैर्यमावह॥४॥एवमुक्तस्ततःसोथस
प्तकृत्वोरुरोदवै॥ततोन्यानिददौतस्मैसप्तनामानिवैप्रभुः॥५॥भवंशर्वमथेशानंतथापशुपतिंद्विज॥भीममुग्रंमहादेव
मुवाचसपितामहः॥६॥चक्रेनामान्यथैतानिस्थानान्येषांचकारह॥सूर्योजलंमहीवायुर्वह्निराकाशमेवच॥७॥दीक्षि
तोब्रह्मणःसोमइत्येतास्तनवःक्रमात्॥सुवर्चलातथैवोषाविकेशीचापराशिवा॥८॥स्वाहादिशस्तथादीक्षारोहिणीच
यथाक्रमं॥सूर्यादीनांद्विजश्रेष्ठरुद्राद्यैर्नामभिःसह॥९॥पत्न्यःस्मृतामहाभागतदपत्यानिमेशृणु॥येषांसूत्याप्रसूत्या
चइदमापूरितंजगत्॥१०॥शनैश्चरस्तथाशुक्रोलोहितांगोमनोजवः॥स्कंदःस्वर्गोथसंतानोबुधश्चानुक्रमात्सुताः॥११॥
एवंप्रकारोरुद्रोसौसतीभार्यामनिंदितां॥उपयेमेदुहितरंदक्षस्यैवप्रजापतेः॥१२॥दक्षकोपाच्चतत्याजसासतीस्वंक
लेवरं॥हिमवद्दुहितासाभून्मेनायांद्विजसत्तम॥१३॥उपयेमेततश्चोमामनन्यांभगवान्भवः॥देवौधातृविधातारौ
भृगोःख्यातिरसूयत॥१४॥श्रियंचदेवदेवस्यपत्नीनारायणस्यया॥१५॥मैत्रेयउवाच॥क्षीराब्धौश्रीःसमुत्पन्नाश्रूय

प्र०
१२

तेऽमृतमंथने॥भृगोःख्यात्यांसमुत्पन्नेत्येतदाहकथंभवान्॥श्रीपराशरउवाच॥नित्यैवैषाजगन्माताविष्णोःश्रीरनपायि
नी॥यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तम॥१६॥अर्थोविष्णुरियंवाणीनीतिरेषानयोहरिः॥बोधोविष्णुरियंबुद्धिर्धर्मोसौसत्क्रि
यात्वियं॥१७॥स्रष्टाविष्णुरियंसृष्टिःश्रीर्भूमिर्भूधरोहरिः॥संतोषोभगवाँल्लक्ष्मीस्तुष्टिर्मैत्रेयशाश्वती॥१८॥इच्छाश्रीर्भगवान्
कामोयज्ञोसौदक्षिणात्वसौ॥आज्याहुतिरसौदेवीपुरोडाशोजनार्दनः॥१९॥गतिर्लक्ष्मीर्जगन्नाथोवायुःसर्वत्रगोहरिः॥
पत्नीशालामुनेलक्ष्मीःप्राग्वंशोमधुसूदनः॥२०॥चितिर्लक्ष्मीर्हरिर्यूपइध्माश्रीर्भगवान्कुशः॥सामस्वरूपीभगवानुद्गीतिः
कमलालया॥२१॥स्वाहालक्ष्मीर्जगन्नाथोवासुदेवोहुताशनः॥शंकरोभगवान्शौरिर्भूतिःगौरीद्विजोत्तम॥२२॥मैत्रेय
उवाच॥केशवःसूर्यस्तत्प्रभाकमलालया॥विष्णुःपितृगणःपद्मास्वधाशाश्वतपुष्टिदा॥द्यौःश्रीःसर्वात्मकोविष्णुरवकाशोऽ
तिविस्तरः॥शशांकःश्रीधरःकांतिःश्रीस्तस्यैवानपायिनी॥धृतिर्लक्ष्मीर्जगच्चेष्टावायुःसर्वत्रगोहरिः॥जलधिर्द्विजगोविंदस्त
द्वेलाश्रीर्महामुने॥२५॥लक्ष्मीरूपमिंद्राणीदेवेंद्रोमधुसूदनः॥यमश्चक्रधरःसाक्षात्धूमोर्णाकमलालया॥२६॥ऋद्धिःश्रीः
श्रीधरोदेवस्स्वयमेवधरेश्वरः॥गौरीलक्ष्मीर्महाभागाकेशवोवरुणःस्वयं॥२७॥श्रीरियंदेवसेनातुदेवसेनापतिर्हरिः॥
अवष्टंभोगदापाणिःशक्तिर्लक्ष्मीर्द्विजोत्तम॥२८॥काष्ठालक्ष्मीर्निमेषोसौमुहूर्त्तोऽसौकलातुसा॥ज्योत्स्नालक्ष्मीःप्रदी
पोसौसर्वःसर्वेश्वरोहरिः॥२९॥लताभूताजगन्माताश्रीर्विष्णुर्द्रुमसंस्थितः॥विभावरीश्रीर्दिवसोदेवश्चक्रगदाधरः॥३०॥

वरप्रदोवरोविष्णुर्वधूःपद्मवनालया॥नदस्वरूपीभगवान्श्रीर्नदीरूपसंस्थितिः॥३१॥ध्वजश्चपुंडरीकाक्ष्यपताकाकम
लालया॥तृष्णालक्ष्मीर्जगन्मातालोभोनारायणःस्मृतः॥३२॥रतिरागौतुमैत्रेयलक्ष्मीर्गोविंदएवच॥किंचातिबहुनोक्ते
नसंक्षेपेणैवदुच्यते॥३३॥देवतिर्यग्मनुष्येषुपुन्नाम्निभगवान्हरिः॥स्त्रीनाम्निलक्ष्मीर्मैत्रेयनानयोर्विद्यतेपरं॥३४॥
इतिश्रीविष्णुपुराणेप्रथमेंऽशेअष्टमोऽध्यायः॥श्रीपराशरउवाच॥इदंचविष्णुमैत्रेययस्त्रष्टोहमिहत्वया॥श्रीसंबंधे
मयाप्येतत्श्रुतमासीन्मरीचितः॥१॥दुर्वासाःशंकरस्यांशश्चचारपृथिवीमिमां॥सददर्शस्रजंदिव्यामृषिर्विद्याधरीक
रे॥२॥संतानकानामखिलंयस्यागंधेनवासितं॥अतिसेव्यमभूद्ब्रह्मंस्तद्वनंवनचारिणां॥३॥उन्मत्तव्रतधृग्विप्रःसदृष्ट्वा
शोभनांस्रजं॥तांययाचवरारोहांविद्याधरवधूंततः॥४॥याचितातेनतन्वंगीमालांविद्याधरांगना॥ददौतस्मैविशालला
क्षीसादरंप्रणिपत्यतं॥५॥तामादायात्मनोमूर्ध्निस्रजमुन्मत्तरूपधृक्॥कृत्वासविप्रोमैत्रेयपरिभ्राममेदिनीं॥६॥सद
दर्शसमायांतमुन्मत्तैरावतस्थितं॥त्रैलोक्याधिपतिंदेवंसहदेवैःशचीपतिं॥७॥तामात्मनःसशिरसःस्रजमुन्मत्तषट्प
दां॥आदायामरराजायचिक्षेपोन्मत्तवन्मुनिः॥८॥गृहीत्वामरराजेनमत्तैरावतमूर्द्धनि॥न्यस्ताराजतकैलासशिख
रेजान्हवीयथा॥९॥मदांधकारिताक्षोसौगंधकृष्टेनवारणः॥करेणादायचिक्षेपतांस्रजंधरणीतले॥१०॥ततश्चुक्रोधभ
गवान्दुर्वासामुनिसत्तमः॥मैत्रेयदेवराजंतंक्रुद्धश्चैतदुवाचह॥११॥ऐश्वर्यमददुष्टात्मन्नतिस्तब्धोसिवासव॥

श्रियोधामस्रजंयत्त्वंमद्दत्तांनाभिनंदसि॥१२॥प्रसादइतिनोक्तंतेप्रणिपातपुरस्सरं॥हर्षोत्फुल्लकपोलेननचापिशिरसाधृ
ता॥१३॥मयादत्तामिमांमालांयस्मान्नबहुमन्यसे॥त्रैलोक्यश्रीरतोमूढविनाशमुपयास्यति॥१४॥मामन्यसेऽन्यैःसदृ
शंनूनंशक्रेतरद्विजैः॥अतोवमानमस्मासुमानिनाभवताकृतं॥मद्दत्ताभवतामालाक्षिप्तायस्मान्महीतले॥तस्मात्प्रन
ष्टलक्ष्मीकंत्रैलोक्यंतेभविष्यति॥१६॥यस्यसंजातकोपस्यभयमेतिचराचरं॥तंत्वंमामतिगर्वेणदेवराजावमन्यसे॥
॥१७॥श्रीपराशरउवाच॥महेंद्रोवारणस्कंधादवतीर्यत्वरान्वितः॥मुनिंप्रसादयामासदुर्वाससमकल्मषं॥१८॥
प्रसाद्यमानःसतदाप्रणिपातपुरःसरं॥प्रत्युवाचसहस्राक्षंदुर्वासामुनिसत्तमः॥१९॥नाहंकृपालुहृदयोनचमांभ
जतेक्षमा॥अन्येतेमुनयःशक्रदुर्वाससमवेहिमां॥२०॥गौतमादिभिरन्यैस्त्वंगर्वमापादितोमुधा॥अक्षांतिसारस
र्वस्वंदुर्वाससमवेहिमां॥२१॥वसिष्ठाद्यैर्दयासारैःस्तोत्रंकुर्वद्भिरुच्चकैः॥गर्वंगतोऽसियेनैवंमामप्यद्यावमन्यसे॥२२॥
चलज्जटाकलापस्यभृकुटीकुटिलंमुखं॥निरीक्ष्यकस्त्रिभुवनेममयोनभयंगतः॥२३॥नाहंक्षमिष्येबहुनाकिमुक्तेन
शतक्रतो॥विडंबनामिमांभूयःकरिष्यनुनयात्मिकां॥२४॥श्रीपराशरउवाच॥इत्युक्त्वाप्रययौविप्रोदेवराजोपितंपु
नः॥आरुह्यैरावतंब्रह्मन्प्रययावमरावतीं॥ततःप्रभृतिनिःश्रीकंसशक्रंभुवनत्रयं॥मैत्रेयासीदपस्तंभंसंक्षीणोष
धिवीरुधं॥२६॥नयज्ञाःसंप्रवर्त्तंतेनतपस्यंतितापसाः॥नचदानानिधर्मेषुमनश्चक्रेतदाजनः॥२७॥निःसत्वाःसकला

लोकाल्लोभाद्युपहतेंद्रियाः॥ स्वल्पेपिहिबभूवुस्तेसाभिलाषाद्विजोत्तम॥२८॥ यतःसत्वंततोलक्ष्मीःसत्वंभूत्यनुसारिच॥ निः
श्रीकाणांकुतःसत्वंविनातेनगुणाःकुतः॥२९॥ बलशौर्याद्यभावश्चपुरुषाणांगुणैर्विना॥ लंघनीयःसमस्तस्यबलशौर्यवि
वर्जितः॥ भवत्यपध्वस्तमतिर्लंघितःप्रथितःपुमान्॥ एवमत्यंतनिःश्रीकेत्रैलोक्येसत्ववर्जिते॥३१॥ देवान्प्रतिबलोद्योगं
चक्रुर्दैतेयदानवाः॥ लोभाभिभूतानिःश्रीकादीनाःसत्वविवर्जिताः॥३२॥ श्रियाविहीनैर्निःश्रीकैर्देवैश्चक्रुस्ततोरणं॥ वि
जितास्त्रिदशादैत्यैरिंद्राद्याःशरणंययुः॥३३॥ पितामहंमहाभागंकुताशनपुरोगमाः॥ यथावत्कथितेदेवैर्ब्रह्माहत
तःसुरान्॥ परावरेशंशरणंव्रजध्वमसुरार्दनं॥ उत्पत्तिस्थितिनाशानामहेतुंहेतुमीश्वरं॥३५॥ प्रजापतिपतिंविष्णुं
सवःश्रेयोऽभिस्यति॥ एवमुक्त्वासुरान्सर्वान्ब्रह्मालोकपितामहः॥३६॥ क्षीरोदस्योत्तरंकूलंतैरेवसहितोययौ॥ सग
त्वात्रिदशैःसर्वैःसमवेतःपितामहः॥३७॥ तुष्टाववाग्भिरिष्टाभिःपरापतिपतिंहरिं॥३८॥ ब्रह्मोउ०॥ नमामिसर्वंसर्वेश
मनंतमजमव्ययं॥ लोकधामधराधारमप्रकाशमभेदिनं॥३९॥ नारायणमणीयांसमशेषाणामणीयसां॥ समस्ता
नांगरिष्ठंचभूरादीनांगरीयसां॥४०॥ यत्रसर्वंयतश्चैवदुत्पन्नंमत्पुरःसरं॥ सर्वभूतश्चयोदेवःपराणामपियःपरः॥
॥४१॥ परःपरस्मात्पुरुषात्परमात्मास्वरूपधृक्॥ योगिभिश्चिंत्यतेयोऽसौमुक्तिहेतुर्मुमुक्षुभिः॥४२॥ सत्वादयोनसंती
मेयत्रचप्राकृतागुणाः॥ सशुद्धःसर्वशुद्धेभ्यःपुमानाद्यःप्रसीदतु॥४३॥ कलाकाष्ठानिमेषादिकालसूत्रस्यगोचरे॥ य

स्यशक्तिर्विशुद्धस्यप्रसीदतुसनोहरिः॥ प्रोच्यतेपरमेशोयोयःशुद्धोप्युपचारतः॥ प्रसीदतुसनोविष्णुरात्मायःसर्वदेहिनां
॥४५॥ यःकारणंचकार्यस्यकारणस्यापिकारणं॥ कार्यस्यास्यचयःकार्यंप्रसीदतुसनोहरिः॥४६॥ कार्यकार्यस्ययत्कार्यंत
त्कार्यस्यापियत्स्वयं॥ तत्कार्यकार्यभूतोयःततश्चप्रणतोस्मितं॥ कारणंकारणस्यापितस्यकारणकारणं॥ तत्कारणानांहे
तुंतंप्रणतोस्मिपरेश्वरं॥४८॥ भोक्तारंभोज्यभूतंचस्रष्टारंसृज्यमेवच॥ कार्यकर्तृस्वरूपंचप्रणतोस्मिपरंपदं॥४९॥
विशुद्धंबोधनंनित्यमजमक्षयमव्ययं॥ अवक्तमधिकारंचविष्णोर्यत्परमंपदं॥५०॥ नस्थूलंनचसूक्ष्मंयन्नविशेषणगोच
रं॥ तत्पदंपरमंविष्णोःप्रणमामिसदामलं॥५१॥ यस्यायुतायुतांशांशेविश्वशक्तिरियंस्थिता॥ परंब्रह्मस्वरूपस्यप्रणमा
मितमव्ययं॥५२॥ यन्नदेवानमुनयोनचाहंनचशंकरः॥ जानंतिपरमेशस्यतद्विष्णोःपरमंपदं॥५३॥ यद्योगिनःसदायु
क्ताःपुण्यपापक्षये पश्यंतिप्रणवेचिंत्यंतद्विष्णोःपरमंपदं॥ शक्तयोयस्यदेवस्यब्रह्मविष्णुशिवात्मिकाः॥ भवंत्यभू
तपूर्वस्यतंविष्णुंप्रणमाम्यहं॥५५॥ सर्वेशसर्वभूतात्मन्सर्वसर्वाश्रयाच्युत॥ प्रसीदविष्णोभक्तानांव्रजनोदृष्टिगोच
रं॥५६॥ इत्युदाहृतमाकर्ण्यब्रह्मणस्त्रिदशास्ततः॥ प्रणम्योचुःप्रसीदेतिव्रजनोदृष्टिगोचरं॥५७॥ यन्नायंभगवान्ब्र
ह्माजानातिपरमंपदं॥ तन्नताःस्मजगद्धामतवसर्वगताच्युत॥५८॥ इत्यंतेवचसांतेषांदेवानांब्रह्मणस्तथा॥ ऊचु
र्देवर्षयःसर्वेबृहस्पतिपुरोगमाः॥५९॥ आद्योयज्ञपुमानीड्योयःसर्वेषांचपूर्वजः॥ तन्नताःस्मोजगत्स्रष्टुःस्र

ष्टारमविशेषणं॥६०॥भगवन्भूतभव्येश यज्ञमूर्त्तिधराव्यय॥प्रसीद प्रणतानां त्वं सर्वेषां देहि दर्शन॥६१॥एष ब्र
ह्मा तथैवायं सह रुद्रैस्त्रिलोचनः॥सर्वादित्यैः समं पूषा पावकोयं सहाग्निभिः॥६२॥अश्विनौ वसवश्चेमे सर्वे चै
ते मरुद्गणाः॥साध्या विश्वे तथा देवा देवेंद्रश्चायमीश्वरः॥६३॥प्रणामप्रवणा नाथ दैत्यसैन्यपराजिताः॥शरणं त्वा
मनुप्राप्ताः समस्ता देवतागणाः॥६४॥श्रीपराशर उ०॥एवं संस्तूयमानस्तु भगवान्शंखचक्रधृक्॥जगाम दर्शनं
तेषां मैत्रेय परमेश्वरः॥तं दृष्ट्वा ते ततो देवाः शंखचक्रगदाधरं॥अपूर्वरूपसंस्थानं तेजसां राशिमूर्जितं॥६६॥
प्रणम्य प्रणताः पूर्वं संक्षोभस्तिमितेक्षणाः॥तुष्टुवुः पुंडरीकाक्षं पितामहपुरोगमाः॥देवा ऊचुः॥नमो नमो विशेषस्त्वं
त्वं ब्रह्मा त्वं पिनाकधृक्॥इंद्रस्त्वमग्निः पवनो वरुणः सविता यमः॥६८॥वसवो मरुतः साध्या विश्वेदेवागणा भवान्
योयं तवागतो देव समीपे देवतागणः॥६९॥स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान्॥त्वं यज्ञस्त्वं वषट्कारस्त्वमोंका
रः प्रजापतिः॥७०॥विद्या वेद्यं च सर्वात्मन्त्वन्मयं चाखिलं जगत्॥त्वामार्त्ताः शरणं विष्णो प्रयाता दैत्यनिर्जिताः॥
॥७१॥वयं प्रसीद सर्वात्मन्तेजसाप्याययस्व नः॥तावदार्त्तिस्तथा वांछा तावन्मोहस्तथासुखं॥यावन्न याति शरणं त्वा
मशेषाघनाशनं॥तत्प्रसादं प्रसन्नात्मन्प्रपन्नानां त्वरुषनः॥७३॥तेजसा नाथ सर्वेषां स्वशक्त्याप्यायनं कुरु॥
एवं संस्तूयमानस्तु प्रणतैरमरैर्हरिः॥प्रसन्नदृष्टिर्भगवानिदमाह स विश्वधृक्॥तेजसा भवतां देवाः करिष्याम्यु

पबृंहणं॥वदाम्यहं यत्क्रियतां भवद्भिस्तदिदं सुराः॥७५॥आनीय सहिता दैत्यैः क्षीराब्धौ सकलौषधीः॥मंथानं मंदरं कृत्वा
नेत्रं कृत्वा च वासुकिं॥७६॥मथ्यताममृतं देवाः सहाये मय्यधिष्ठिते॥सामपूर्वं च दैत्यास्तत्र साहाय्यकर्मणि॥७७॥सा
मान्यफलभोक्तारो यूयं वाच्या भविष्यथ॥मथ्यमाने च तत्राब्धौ यत्समुत्पत्स्यतेऽमृतं॥तत्पानाद्बलिनो यूयममराश्च भ
विष्यथ॥तथाहं च करिष्यामि ते यथा त्रिदशद्विषः॥न प्राप्स्यंत्यमृतं देवाः केवलं क्लेशभागिनः॥८०॥श्रीपराशर उवाच॥
इत्युक्ता देवदेवेन सर्व एव ततः सुराः॥संधानमसुरैः कृत्वा यत्नवंतोऽमृते भवन्॥१॥नानौषधीः समानीय देवदैतेयदान
वाः॥क्षिप्त्वा क्षीराब्धिपयसि शरदभ्रामलत्विषि॥८२॥मंथानं मंदरं कृत्वा नेत्रं कृत्वा च वासुकिं॥ततो मथितुमारब्धा मै
त्रेय तरसामृतं॥८३॥विबुधाः सहिताः सर्वे यतः पुच्छं ततः कृताः॥कृष्णेन वासुकेर्दैत्याः पूर्वकाये निवेशिताः॥८४॥ते तस्य
फणनिश्वासवह्निनापहृतत्विषः॥निस्तेजसोऽसुराः सर्वे बभूवुरमितद्युते॥८५॥तेनैव मुखनिश्वासवायुनास्तब
लाहकैः पुच्छप्रदेशे वर्षद्भिस्तदा चाप्यायिताः सुराः॥८६॥क्षीरोदमध्ये भगवान्कूर्मरूपी स्वयं हरिः॥मंथानाद्रेरधि
ष्ठानं भ्रमतोऽभून्महामुने॥८७॥रूपेणान्येन देवानां मध्ये चक्रगदाधरः॥चकर्ष नागराजानं दैत्यमध्येऽपरेण च॥८८॥
उपर्याक्रांतवान्शैलं बृहद्रूपेण केशव॥तथापरेण मैत्रेय यन्न दृष्टं सुरासुरैः॥तेजसा नागराजं तं तथाप्यायितवान्
हरिः॥अन्येन तेजसा देवानुपबृंहितवान्प्रभुः॥९०॥मथ्यमाने ततस्तस्मिन्क्षीराब्धौ देवदानवैः॥हविर्धान्यऽभवत्

वैसुरभिःसुरपूजिता॥९१॥जग्मुर्मुदंततोदेवादानवाश्चमहामुने॥विक्षिप्तचेतसश्चैवबभूवुःस्तिमितेक्षणाः॥९२॥कि
मेतदितिसिद्धानांदिविचिंतयतांततः॥बभूववारुणीदेवीमदाघूर्णितलोचना॥९३॥कृतावर्त्तस्ततस्तस्मात्क्षीरोदाद्वा
सयन्जगत्॥गंधेनपारिजातोभूद्देवस्त्रीनंदनस्तरुः॥९४॥रूपौदार्यगुणोपेतस्तथाचाप्सरसांगणाः॥क्षीरोदधेःसमु
द्भूतोमैत्रेयपरमाद्भुतः॥९५॥ततःशीतांशुरभवज्जगृहेतंमहेश्वरः॥जगृहुश्चविषंनागाःक्षीरोदधिसमुत्थितं॥९६॥
ततोधन्वंतरिर्देवःश्वेतांबरधरःस्वयं॥बिभ्रत्कमंडलुंपूर्णममृतस्यसमुत्थितः॥९७॥ततःस्वस्थमनस्कास्तेसर्वे
दैतेयदानवाः॥बभूवुर्मुदिताःसर्वेमैत्रेयमुनिभिःसह॥९८॥ततस्स्फुरत्कांतिमतीविकासिकमलेस्थिता॥श्रीर्देवी
पयसस्तस्मात्उत्थिताधृतपंकजा॥९९॥तांतुष्टुवुर्मुदायुक्ताःश्रीसूक्तेनमहर्षयः॥विश्वावसुमुखास्तस्यागंध
र्वाःपुरतोजगुः॥१००॥घृताचीप्रमुखास्तत्रननृतुश्चाप्सरोगणाः॥गंगाद्याःसरितस्तोयैःस्नानार्थमुपतस्थिरे॥१॥
दिग्गजाहेमपात्रस्थमादायविमलंजलं॥स्नापयांचक्रिरेदेवींसर्वलोकमहेश्वरीं॥२॥क्षीरोदोरूपधृक्तस्यैमाला
मम्लानपंकजां॥ददौविभूषणान्यंगविश्वकर्माचकारच॥३॥दिव्यमाल्यांबरधरास्नाताभूषणभूषिता॥पश्यतां
सर्वदेवानांययौवक्षःस्थलंहरेः॥४॥ततोविलोकितोदेवाहरिवक्षःस्थलस्थया॥लक्ष्म्यामैत्रेयसहसापरांनिर्वृत्ति
मागताः॥५॥उद्वेगंपरमंजग्मुर्दैत्याविष्णुपराङ्मुखाः॥त्यक्तालक्ष्म्यामहाभागविप्रचित्तिपुरोगमाः॥६॥ततस्ते

जगृहुर्दैत्याधन्वंतरिकरेस्थितं॥कमंडलुंमहावीर्यायत्रास्तेतद्द्विजामृतं॥७॥माययामोहयित्वातान्विष्णुःस्त्रीरूपमास्थितः॥
दानवेभ्यस्तदादायदेवेभ्यःप्रददौप्रभुः॥८॥ततोपपुःसुरगणाःशक्राद्यास्तत्तदामृतं॥उद्यतायुधनिस्त्रिंशादैत्यास्ता
न्समभ्ययुः॥९॥पीतेमृतेचबलिभिर्देवैर्दैत्यचमूस्तदा॥वध्यमानादिशोभेजेपातालंचविवेशवै॥१०॥ततोदेवामु
दायुक्ताःशंखचक्रगदाभृतं॥प्रणिपत्ययथापूर्वमध्यासंतत्रिविष्टपं॥११॥ततःप्रसन्नभाःसूर्यःप्रययौस्वेनवर्त्मना॥
ज्योतींषिचयथामार्गंप्रययुर्मुनिसत्तम॥१२॥जज्वालभगवांश्चोच्चैश्चारुदीप्तिर्विभावसुः॥धर्मेचसर्वभूतानांतदामति
रजायत॥१३॥त्रैलोक्यंचश्रियाजुष्टंबभूवमुनिसत्तम॥शक्रश्चत्रिदशश्रेष्ठःपुनःश्रीमानजायत॥१४॥सिंहासनग
तःशक्रःसंप्राप्यत्रिदिवंपुनः॥देवराज्येस्थितोदेवींतुष्टावाब्जकरांतदा॥१५॥इंद्रउवाच॥नमस्येसर्वलोकानांजन
नीमब्धिसंभवां॥श्रियमुन्निद्रपद्माक्षींविष्णोर्वक्षस्थलेस्थितां॥१६॥त्वंसिद्धिस्त्वंस्वधास्वाहात्वंसुधात्वंलोकपावनि॥
संध्यारात्रिःप्रभाभूतिःश्रद्धामेधासरस्वती॥१७॥यज्ञविद्यामहाविद्यागुह्यविद्याचशोभने॥आत्मविद्याचदेवित्वंविमु
क्तिफलदायिनी॥१८॥आन्वीक्षिकीत्रयीवार्त्तादंडनीतिरितिश्रुता॥सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देविपूरितं॥१९॥का
त्वन्यात्वामृतेदेविसर्वयज्ञमयंवपुः॥अध्यास्तेदेवदेवस्ययोगिचिंत्यंगदाभृतः॥२०॥त्वयादेविपरित्यक्तंसकलंभु
वनत्रयं॥विनष्टप्रायमभवत्त्वयेदानींसमेधितं॥२१॥दाराःपुत्रास्तथागारंसुहृद्धनधनादिकं॥भवत्येतन्महाभा

गे नित्यं त्वद्वीक्षणान्नृणां ॥ शरीरारोग्यमैश्वर्यपरपक्षक्षयः सुखं ॥ देवि त्वदृष्टिदृष्टानां पुरुषाणां न दुर्लभं ॥२३॥
त्वमंबा सर्वभूतानां देवदेवो हरिः पिता ॥ त्वयैतद्विष्णुना चांब जगद्व्याप्तं चराचरं ॥२४॥ मा नः कोशं तथा कोष्ठं मा गृहं मा प
रिच्छदं ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ मा पुत्रान्मा सुहृद्वर्गं मा पशून्मा विभूषणं ॥ त्यजेथा मम देवस्य विष्णो
र्वक्षःस्थलाश्रये ॥ सत्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ॥ त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयामले ॥२७॥ त्व
यावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्यैश्च पूज्यंते पुरुषा निर्गुणा अपि ॥२८॥ स श्लाघ्यः स गुणी ध
न्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रांतो यस्त्वया देवि वीक्षितः ॥२९॥ सद्यो वैगुण्यमायांति शीलाद्यास्त्वखि
ला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥३०॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ॥ प्रसीद देवि
पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥३१॥ श्रीपराशर उवाच ॥ एवं श्रीः संस्तुता सम्यक् प्राह हृष्टा शतक्रतुं ॥३२॥ शृण्व
तां सर्वदेवानां सर्वभूतस्थिता द्विज ॥३२॥ श्रीरुवाच ॥ परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ॥ वरं वृणीष्व यस्त्विष्टं व
रदाहं त्वामागता ॥३३॥ इंद्र उवाच ॥ वरदा यदि मे देवि वरार्हो यदि वाप्यहं ॥ त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥
॥३४॥ स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसंभवे ॥ स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥३५॥ श्रीरुवाच ॥ त्रैलो
क्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ॥ दत्तो वरो मया यं ते स्तोत्राराधनतुष्टया ॥३६॥ यश्च सायं तथा प्रातः स्तोत्रेणा

नेन मानवः ॥ मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ श्रीपराशर उ० ॥ एवं ददौ वरं देवी देवराजाय वै पुरा ॥ मैत्रेय सा
महाभागा स्तोत्राराधनतोषिता ॥३८॥ भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ॥ देवदानवयत्नेन प्रसूतामृतमंथने
॥३९॥ एवं यदा जगत्स्वामी देवदेवो जनार्दनः ॥ अवतारान्करोत्येषा तदा श्रीस्तत्सहायिनी ॥४०॥ पुनश्च पद्मसंभूता आदि
त्योऽभूद्यदा हरिः ॥ यदा च भार्गवो रामस्तदाभूद्धरणी त्वयं ॥४१॥ राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि ॥ अन्येषु चा
वतारेषु विष्णोरेषात्मनस्तनुं ॥४२॥ देवितिर्यग्मनुष्येषु पुन्नाम्नि भगवान् हरिः ॥ स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते
परं ॥४३॥ यश्चैतच्छृणुयाज्जन्म लक्ष्म्या पठेन्नरः ॥ श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयं ॥ येषु चैवेयं गृहेषु
+ सहायिनी ॥ देवत्वे देवदेहेयं मानुषत्वेनु मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषा + श्रीस्तुतिर्मुने ॥ अलक्ष्मीः कल
हाधारा न तेष्वास्ते कदाचन ॥४६॥ एतन्मे कथितं ब्रह्मन्यन्मां त्वं परिपृच्छसि ॥ क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता
सती ॥४७॥ इति सकलविभूत्यवाप्तिहेतोः स्तुतिरियमिंद्रमुखोद्गता हि लक्ष्म्याः ॥ अनुदिनमिह पठ्यते नृभिर्यैर्वसति
न तेषु कदाचिदप्यलक्ष्मीः ॥४८॥ ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे नवमोऽध्यायः ॥ मैत्रेय उवाच ॥ कथितं मे त्वया
सर्वं यत्पृष्टोऽसि महामुने ॥ भृगुसर्गात्प्रभृत्येषां सर्गो मे कथ्यतां पुनः ॥१॥ पराशर उ० ॥ भृगोः ख्यात्यां समुत्पन्ना ल
क्ष्मीर्विष्णुपरिग्रहः ॥ तथा धातृविधातारौ ख्यात्यां जातौ सुतौ भृगोः ॥२॥ आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ॥

विं॰पु॰
१८

धाताविधात्रोस्तेभार्येतयोर्ज्जातौसुतावुभौ ॥३॥ प्राणश्चैवमृकंडश्चमार्कंडेयोमृकंडतः ॥ तयोर्वेदशिराजज्ञेप्राणस्या
पिसुतंशृणु ॥४॥ प्राणस्यद्युतिमान्पुत्रोराजवांश्चततोभवत् ॥ ततोवंशौमहाभागविस्तरंभार्गवागतः ॥५॥ पत्नीमरी
चेःसंभूतिःपूर्णमासमसूयत ॥ विरजापर्वतश्चैवतस्यपुत्रौमहात्मनः ॥६॥ वंशसंकीर्त्तनेपुत्रान्वक्ष्येतस्यततोद्वि
ज ॥ स्मृतिश्चांगिरसःपत्नीप्रसूतकन्यकास्तथा ॥७॥ सिनीवालीकुहूश्चैवराकाचानुमतिस्तथा ॥ अनुसूयातथैवात्रे
र्जज्ञेपुत्रानकल्मषान् ॥८॥ सोमंदुर्वाससंचैवदत्तात्रेयंचयोगिनं ॥ प्रीत्यांपुलस्त्यभार्यायांदत्तोनिस्तत्सुतोभवत् ॥९॥
पूर्वजन्मनिसोगस्त्यःस्मृतःस्वायंभुवेंतरे ॥ कर्मसश्चवरीयांश्चसहिष्णुश्चसुतत्रयं ॥१०॥ क्षमातुसुषुवेभार्यापुलह
स्यप्रजापतेः ॥ क्रतोश्चसंनतिर्भार्यावालखिल्यानसूयत ॥११॥ षष्टिर्यानिसहस्राणिऋषीणामूर्द्ध्वरेतसां ॥ तेषामं
गुष्ठमात्राणांज्वलद्भास्करतेजसां ॥ ऊर्जायांतुवशिष्ठस्यसप्ताजायंतवैसुताः ॥ रजोगात्रोर्द्ध्वबाहुश्चसवनश्चानघ
स्तथा ॥१३॥ सुतपाःशुक्रइत्येतेसर्वेसप्तर्षयोमलाः ॥ योसावग्निरभीमानीब्रह्मणस्तनयोग्रजः ॥१४॥ तस्मात्स्वा
हासुतांलेभेत्रीनुदारौजसोद्विज ॥ पावकंपवमानंचशुचिंचापिजलाशिनं ॥१५॥ तेषांचसंततावन्येचत्वारिंशाच्च
पंचच ॥ कथ्यंतेवह्नयश्चैतेपितापुत्रत्रयंचयत् ॥ एवमेकोनपंचाशद्वह्नयःपरिकीर्त्तिताः ॥ पितरोब्रह्मणासृष्टाव्या
ख्यातायेमयातव ॥ अग्निष्वात्ताबर्हिषदोनग्नयःसाग्नयश्चये ॥१७॥ तेभ्यःस्वधासुतेजज्ञेमेनांवैधरणींतथा ॥१८॥

प्र॰
१८

तेउभेब्रह्मवादिन्यौयोगिन्यौचाप्युभेद्विज ॥ उत्तमज्ञानसंपन्नेसर्वैःसमुदितेगुणैः ॥ इत्येषादक्षकन्यानांकथितापत्य
संततिः ॥ श्रद्धावान्संस्मरन्नेतामनपत्योभिजायते ॥२०॥ इतिश्रीविष्णुपुराणेप्रथमेंशेदशमोध्यायः ॥१०॥
श्रीपराशरउवाच ॥ प्रियव्रतोत्तानपादौमनोःस्वायंभुवस्यच ॥ द्वौपुत्रौतुमहावीर्यौधर्मज्ञौकथितौतव ॥१॥ तयोरु
त्तानपादस्यसुरुच्यामुत्तमःसुतः ॥ अभीष्टायामभूत्पुत्रःपितुरत्यंतवल्लभः ॥२॥ सुनीतिनाम्नीयाराज्ञस्तस्यासीन्म
हिषीद्विज ॥ सनातिप्रीतिमांस्तस्यामभूत्तस्याध्रुवःसुतः ॥३॥ राजासनस्थितस्यांकंपितुर्भ्रातरमाश्रितं ॥ दृष्ट्वोत्त
मंध्रुवश्चक्रेतमारोढुंमनोरथं ॥४॥ प्रत्यक्षंभूपतिस्तत्रसुरुच्यानाभ्यनंदत ॥ प्रणयेनागतंपुत्रमुत्संगारोहणोत्सु
कं ॥५॥ सपत्नीतनयंदृष्ट्वातमंकारोहणोद्यतं ॥ पुत्रंपितुस्तथारूढंसुरुचिर्वाक्यमब्रवीत् ॥६॥ क्रियतेकिंत्वयावत्स
महानेषमनोरथः ॥ अन्यस्त्रीगर्भजातेनअसंभूयममोदरे ॥७॥ उत्तमोत्तममप्राप्यमविवेकोभिवांछ
सि ॥ सत्यंसुतस्त्वमप्यस्यकिंतुनत्वंमयाधृतः ॥८॥ एतद्राजासनंसर्वभूभृत्संश्रयकेतनं ॥ योग्यंममैवपुत्रस्यकिम
स्मात्क्लिश्यतेत्वया ॥९॥ उच्चैर्मनोरथस्तेयंमत्पुत्रस्येवकिंवृथा ॥ सुनीत्यामात्मनोजन्मकिंत्वयानावगम्यते ॥१०॥
पराशरउवाच ॥ उत्सृज्यपितरंबालस्तच्छ्रुत्वान्भाषितं ॥ जगामकुपितोमातुर्निजायाद्विजमंदिरं ॥११॥ तंदृष्ट्वा
कुपितंपुत्रमीषत्प्रस्फुरिताधरं ॥ सुनीतिरंकमारोप्यमैत्रेयेदमभाषत ॥१२॥ वत्सकःकोपहेतुस्तेकश्चित्वांनाभिनंद

ति॥कोवज्ञानातिपितरंवत्सयस्तेपराधति॥१३॥पराशरउ० इत्युक्तःसकलंमात्रेकथयामासतत्तथा॥सुरुचिःप्राहभू
पालप्रत्यक्षमतिगर्विता॥१४॥निश्वस्यकथितेतस्मिन्सापुत्रेणदुर्मनाः॥श्वासक्षमेणादीनासुनीतिर्वाक्यमब्रवीत्
॥१५॥सुनीतिरुवाच॥सुरुचिःसत्यमाहेदंमंदभाग्योसिपुत्रक॥नहिपुण्यवतांवत्ससपत्नैरेवमुच्यते॥१६॥नोद्वेग
स्तातकर्त्तव्यःकृतंयद्भवतापुरा॥तत्कोपहर्त्तुंशक्नोतिदातुंयच्चाकृतंत्वया॥१७॥राजासनंतथाछत्रंवराश्वावरवा
रणाः॥यस्यपुण्यानितस्यैवमत्वैतच्छाम्यपुत्रक॥१८॥अन्यजन्मकृतैःपुण्यैःसुरुच्यांसुरुचिस्ततः॥भार्येतिप्रोच्य
तेचान्यामद्विधापुण्यवर्जिता॥१९॥पुण्योपचयसंपन्नस्तस्याःपुत्रस्तथोत्तमः॥ममपुत्रस्तथाजातःस्वल्पपुण्यो
ध्रु ध्रुवोभवान्॥२०॥तथापिदुःखंनभवान्कर्त्तुमर्हतिपुत्रक॥यस्ययावत्सतेनैवस्वेनतुष्यतिमानवः॥२१॥यदिते
दुःखमत्यर्थंसुरुच्यावचसाभवत्॥तत्पुण्योपचयेयत्नंकुरुसर्वफलप्रदे॥२२॥सुशीलोभवधर्मात्मामैत्रःप्राणि
हितेरतः॥निम्नंयथापःप्रवणाःपात्रमायांतिसंपदः॥२३॥ध्रुवउवाच॥अंबयत्त्वमिदंप्रात्थप्रशमायवचोमम॥
नैतद्दुर्वचसाभिन्नेहृदयेममतिष्ठति॥सोहंतथायतिष्यामियथासर्वोत्तमोत्तमं॥स्थानंप्राप्स्याम्यशेषाणांजग
तामभिपूजितं॥सुरुचिर्दयिताराज्ञस्तस्याजातोस्मिनोदरात्॥प्रभावंपश्यमेंबत्वंवृद्धस्यापितवोदरे॥२६॥ प्र०
उत्तमःसममभ्रातायोगर्भेणधृतस्तया॥सराजासनमाप्नोतुपित्रादत्तंतथास्तुतत्॥नान्यदत्तमभीप्स्यामिस्था १९

नमंबस्वकर्मणा॥इच्छामिसततंस्थानंयन्नप्रापपितामम॥२८॥पराशरउ०॥निर्जगाममृहान्मातुरित्युक्त्वामातरंध्रु
वः॥पुराच्चनिर्गम्यततस्तद्बाह्योपवनंययौ॥२९॥सददर्शमुनींस्तत्रसप्तपूर्वागतान्द्विजः॥कृष्णाजिनोत्तरीयेषुविष्टरे
षुसमास्थितान्॥३०॥सराजपुत्रस्तान्सर्वान्प्रणिपत्याभ्यभाषत॥प्रश्रयावनतःसम्यगभिवादनपूर्वकं॥३१॥
॥ध्रुवउ०॥उत्तानपादतनयंमांनिबोधतसत्तमाः॥जातंसुनित्यांनिर्वेदाद्युष्माकंप्रसमंतिकं॥३२॥ऋषयऊ०॥च
तुष्पंचाब्दसंभूतोबालस्त्वंनृपनंदन॥निर्वेदकारणंकिंचित्तवनाद्यापिवर्त्तते॥३३॥नचिंत्यंभवतःकिंचित्क्रिय
तेभूपतिःपिता॥नचैवेष्टवियोगादितवपश्यामिबालक॥३४॥शरीरेनचतेव्याधिरस्माभिरुपलक्ष्यते॥निर्वेदः
किंनिमित्तंतेकथ्यतांयदिविद्यते॥३५॥पराशरउ०॥ततःसकथयामाससुरुच्यायदुदाहृतं॥तन्निशम्यवचः
प्रोचुर्मुनयस्तेपरस्परं॥३६॥अहोक्षात्रंपरंतेजोबालस्यापियदक्षमा॥सपत्न्यामातुरुक्तंयद्धृदयान्नापसर्प्प
ति॥३७॥भोभोःक्षत्रियदायादनिर्वेदाद्यत्त्वयाधुना॥कर्त्तुंव्यवसितंतन्नःकथ्यतांयदिरोचते॥३८॥यच्चकार्यंत
वास्माभिःसाहाय्यममितद्युते॥तदुच्यतांविवक्षुस्त्वमस्माभिरुपलक्ष्यसे॥ध्रुवउवाच॥नाहमर्थमभीप्स्यामि
नराज्यंद्विजसत्तमाः॥स्थानंचमेकमिच्छामिभुक्तंनान्येनयत्पुरा॥४०॥एतन्मेकथ्यतांसम्यक्कथ्यतांप्राप्य
तेयथा॥स्थानमग्र्यंसमस्तेभ्यःस्थानेभ्योमुनिसत्तमाः॥४१॥मरीचिरु०॥अनाराधितगोविंदैर्नरैःस्थानंनृ

पात्मज॥नहिसंप्राप्यतेश्रेष्टंतस्मादाराधयाच्युतं॥अत्रिरुवाच॥परःपराणांपुरुषोयस्यतुष्टोजनार्दनः॥सप्राप्नो
त्यक्षयंस्थानंएतत्सत्यंमयोदितं॥४३॥अंगिराउ॰॥यस्यांतःसर्वमेवेदंअच्युतस्याव्ययात्मनः॥तमाराधयगोविं
दंस्थानमग्र्यंयदिच्छसि॥४४॥पुलस्त्यउ॰परंब्रह्मपरंधामयोसौब्रह्मतथापरं॥तमाराध्यहरिंजंतुर्मुक्तिमायाति
दुर्लभां॥४५॥पुलहउ॰॥ऐंद्रमिंद्रःपरंस्थानंयमाराध्यजगत्पतिं॥प्रापयज्ञपतिंविष्णुंतमाराधयसुव्रत॥४६॥क्र
तुरुवाच॥योयज्ञपुरुषोयज्ञेयोगेयःपरमःपुमान्॥तस्मिंस्तुष्टेयदप्राप्यंकिंतदस्तिजनार्दने॥४७॥वसिष्ठउ॰॥
प्राप्नोष्याराधितेविष्णौमनसायद्यदिच्छसि॥त्रैलोक्यांतर्गतंस्थानंकिमुतोत्तमोत्तमं॥४८॥ध्रुवउ॰॥आराध्यः
कथितोदेवोभवद्भिःप्रणतस्यमे॥मयातत्परितोषाययज्जप्तव्यंतदुच्यतां॥४९॥यथाचाराधनंतस्यमयाका
र्यंमहात्मनः॥प्रसादसुमुखास्तन्मेकथयंतुमहर्षयः॥५०॥ऋषयउ॰॥राजपुत्रयथाविष्णोराराधनपरैर्नरैः
कार्यमाराधनंतन्नोयथावच्छ्रोतुमर्हसि॥५१॥बाह्यार्थादखिलाच्चित्तंत्याजयेत्प्रथमंधिया॥तस्मिन्नेवजगद्धाम्नि
ततःकुर्वीतनिश्चलं॥५२॥एवमेकाग्रचित्तेनतन्मयेनधृतात्मना॥जप्तव्यंतन्निबोधैतत्त्वंनःपार्थिवनंदन
॥५३॥हिरण्यगर्भपुरुषप्रधानव्यक्तरूपिणे॥ॐनमोवासुदेवायशुद्धज्ञानस्वरूपिणे॥५४॥एतज्जजापभ
गवान्जप्यंस्वायंभुवोमनुः॥पितामहस्तवपुरातस्यतुष्टोजनार्दनः॥५५॥ददौयथाभिलषितांसिद्धिंत्रैलोक्य

दुर्लभां॥तथात्वमपिगोविंदंतोषयैतत्सदाजपन्॥५६॥ ॥श्रीविष्णुपुराणेप्रथमेंशेएकादशोध्यायः॥ पराशरउ॰॥
निशम्यैतदशेषेणमैत्रेयनृपतेःसुतः॥निर्जगामवनात्तस्मात्प्रणिपत्यसतानृषीन्॥१॥कृतकृत्यमिवात्मानंमन्यमा
नस्ततोद्विज॥मधुसंज्ञंमहापुण्यंजगामयमुनातटं॥२॥पुनश्चमधुसंज्ञेनदैत्येनाधिष्ठितंयतः॥ततोमधुवनंनाम्ना
ख्यातमत्रमहीतले॥३॥हत्वाचलवणंरक्षोमधुपुत्रंमहाबलं॥शत्रुघ्नोमधुरांनामपुरींयत्रचकारवै॥४॥यत्रवैदे
वदेवस्यसान्निध्यंहरिमेधसः॥सर्वपापहरेतस्मिंस्तपस्तीर्थेचकारसः॥५॥मरीचिमुख्यैर्मुनिभिर्यदादिष्टमभूत्त
दा॥आत्मन्यशेषंदेवेशंस्थितंविष्णुममन्यत॥६॥अनन्यचेतसस्तस्यध्यायतोभगवान्हरिः॥आत्मान्यशेषंदेवे
शंस्थितेसर्वभूतगतोविप्रसर्वभावगतोभवत्॥७॥मनस्यवस्थितेतस्यविष्णौमैत्रेययोगिनः॥नशशाकधराभा
रमुद्वोढुंभूतधारिणी॥८॥वामपादस्थितेतस्मिन्ननामार्द्धेनमेदिनी॥द्वितीयंचननामार्द्धंक्षितेर्दक्षिणसंस्थिते॥पा
दांगुष्ठेनसंपीड्ययदासवसुधांस्थितः॥तदासमस्तवसुधाचचालसहपर्वतैः॥१०॥नद्योनदाःसमुद्राश्चसंक्षो
भंपरमंययुः॥तत्क्षोभादमराःक्षोभंपरंजग्मुर्महामुने॥यामानामतदादेवामैत्रेयपरमाकुलाः॥११॥इंद्रेणसहस
मंत्र्यध्यानभंगप्रचक्रमुः॥१२॥कूष्मांडाविविधैरूपैःसहेंद्रेणमहामुने॥समाधिभंगमत्यंतमारब्धाःकर्तुमातु
राः॥१३॥सुनीतिर्नामतन्माताआहमायामयीतदा॥पुत्रेतिकरुणांवाचंसाम्रातत्पुरतःस्थिता॥१४॥पुत्रकास्मा

BHAU DAJI MEMORIAL

MEMORIAL

वि०पु० न्निवर्त्तस्वशरीरव्ययदारुणात्॥निर्बंधतोमयालब्धोबहुभिस्त्वंमनोरथैः॥१५॥दीनामेकांपरित्यमनाथांकथम
२१ र्हसि॥सपत्नीवचनाज्जातआगतस्त्वंगतिर्मम॥१६॥क्वचत्वंपंचवर्षीयःक्वचैतद्दारुणंतपः॥निवर्त्यतांमनःक
ष्टान्निर्बंधात्फलवर्जितात्॥कालःक्रीडनकानांयस्तवपुत्रस्यबालक॥तस्मिंस्त्वमिच्छंतपसिकिंनाशायात्म
नोरत॥१८॥मत्प्रीतिःपरमोधर्मोवयोवस्थाक्रियाक्रमः॥अनुवर्त्तस्वमामोहंनिवर्त्तोदधर्मतः॥१९॥परित्यज
तिवश्याद्ययद्येतन्नभवांस्तपः॥त्यक्ष्याम्यहमिहप्राणांस्ततोवैपश्यतस्तव॥२०॥पराशरउ०॥तांविलापवती
मेवंबाष्पाकुलविलोचनां॥समाहितमनाविष्णोपश्यन्नपिनदृष्टवान्॥२१॥वत्सवत्ससुघोराणिरक्षांस्येतानिभी
षणे॥वनेभ्युद्यतशस्त्राणिसमायांत्यपगम्यतां॥२२॥इत्युक्त्वाप्रययौसाथरक्षांस्याविर्बभुस्ततः॥अभ्यु
द्यतोग्रशस्त्राणिज्वालामालाकुलेमुखैः॥२३॥ततोनादानतीवोग्रान्राजपुत्रस्यतेपुरः॥मुमुचुर्दीप्तशस्त्राणिभ्रा
मयंतोनिशाचराः॥२४॥ततोनानाविधान्नादान्सिंहोष्ट्रशिवाश्वशतशोनेदुःसज्वालकवमुखैः॥त्रासायतस्यबा
लस्ययोगयुक्तस्यसर्वतः॥२५॥हन्यतांहन्यतामेषछिद्यतांछिद्यतामयं॥भक्ष्यतांभक्ष्यतांचायमित्यूचुस्तेनिशा
चराः॥२६॥ततोनानाविधान्नादान्सिंहोष्टमकराननाः॥त्रासायराजपुत्रस्यनेदुस्तेरजनीचराः॥२७॥रक्षांसि प्र०
तानितेनादाःशिवास्तान्यायुधानिच॥गोविंदासक्तचित्तस्यययुर्नेंद्रियगोचरं॥२८॥एकाग्रचेताःसततंविष्णुमे २१

वात्मसंश्रयं॥दृष्टवान्पृथिवीनाथपुत्रोनान्यत्कथंचन॥२९॥ततःसर्वासुमायासुविलीनासुपुनःसुराः॥संक्षोभंपरमंज
ग्मुःतत्पराभवशंकिनः॥३०॥तेसमेत्यजगद्योनिमनादिनिधनंहरिं॥शरण्यंशरणंयातास्तपसातस्यतापिताः॥३१॥
दिनेदिनेकलालेशैःशशांकःपूर्यतेयथा॥देवाऊचुः॥देवदेवजगन्नाथपरेशपुरुषोत्तम॥ध्रुवस्यतपसातप्तास्त्वांव
यंशरणंगताः॥३२॥दिनेदिनेकलालेशैःशशांकःपूर्यतेयथा॥तथायंतपसादेवप्रयात्यृद्धिमनुत्तमां॥३३॥उत्तानपा
दितपसावयमित्थंजनार्दन॥भीतास्त्वांशरणंयातास्तपसस्तंनिवर्त्तय॥३४॥नविद्मःकिंसशक्रत्वंसूर्यत्वंकिमभीप्सति॥
वित्तपांबुधिपामासंयाभिलाषःपदेषुकिं॥३५॥तदस्माकंप्रसीदेशहृदयाच्छल्यमुद्धर॥उत्तानपादतनयंतपसःसनिव
र्त्तय॥३६॥श्रीभगवानुवाच॥नेंद्रत्वंससूर्यत्वंनैवांबुपधनेशतां॥प्रार्थयत्येषकामंतंकरोम्यखिलंसुराः॥३७॥
यातदेवायथाकामंस्वस्थानंविगतज्वराः॥निवर्त्तयाम्यहंबालंतपस्यासक्तमानसं॥३८॥श्रीपराशरउवाच॥इ
त्युक्त्वादेवदेवेनप्रणम्यत्रिदशास्ततः॥प्रययुःस्वानिधिष्ण्यानिशतक्रतुपुरोगमाः॥३९॥भगवानपिसर्वात्मातन्मय
त्वेनतोषितः॥गत्वाध्रुवमुवाचेदंचतुर्भुजवपुर्हरिः॥४०॥उत्तानपादभद्रंतेतपसापरितोषितः॥वरदोहमनुप्राप्तोव
रंवरयसुव्रत॥४१॥बाह्यार्थनिरपेक्षंतेमयिचित्तंयदाहितं॥तुष्टोहंभवतस्तेनतद्वृणुष्ववरंपरं॥४२॥पराशरउ०॥
श्रुत्वेत्थंगदितंतस्यदेवदेवस्यबालकः॥उन्मीलिताक्षोददृशेध्यानदृष्टंहरिंपुरः॥४३॥शंखचक्रगदाशार्ङ्गधरा

सिधरमच्युतं॥किरीटिनंसमालोक्यजगामसिरसामहीं॥४४॥रोमांचितांगःसहसासाध्वसंपरमंगतः॥स्तवार्थंदेवदे
वस्यसचक्रेमानसंध्रुवं॥४५॥किंवदामिस्तुतावस्यकेनोक्तेनायसंस्तुतिः॥इत्याकुलमतिर्देवंतमेवशरणंययो॥४६॥
ध्रुवउवाच॥भगवन्यदिमेतोषंतपसापरमंगतः॥स्तोतुंतदहमिच्छामिवरमेनंप्रयच्छमे॥४७॥ब्रह्माद्यैर्यस्यवेदज्ञैर्ज्ञाय
तेयस्यनोगतिः॥तंत्वामहंकथंदेवस्तोतुंशक्नोमिबालकः॥४८॥त्वद्भक्तिप्रवणंत्वेतत्परमेश्वरमेमनः॥स्तोतुंप्रवृत्तंत्वत्पा
दौतत्रप्रज्ञांप्रयच्छमे॥४९॥पराशरउवाच॥शंखप्रांतेनगोविंदस्तंपस्पर्शकृतांजलिं॥उत्तानपादतनयंद्विजवर्यजगत्प
तिः॥५०॥अथप्रसन्नवदनस्तत्क्षणान्नृपनंदनः॥तुष्टावप्रणतोभूत्वाभूतधातारमच्युतं॥५१॥ध्रुवउ॰॥भूमिरापोनलो
वायुःखंमनोबुद्धिरेवच॥भूतादिरादिप्रकृतिर्यस्यरूपंनतोस्मितं॥५२॥शुद्धःसूक्ष्मोखिलव्यापीप्रधानात्परतःपुमान्॥
यस्यरूपंनमस्तस्मैपुरुषायाविनाशने॥५३॥भूरादीनांसमस्तानांगंधादीनांचशाश्वतः॥प्रपद्येशरणंशुद्धंत्वद्रूपं
परमेश्वर॥५४॥बृहत्वाद्बृंहणत्वाच्चयद्रूपंब्रह्मसंज्ञितं॥तस्मैनमस्तेसर्वात्मन्योगिचिंत्याविकारिणे॥५५॥सहस्रशी
र्षापुरुषःसहस्राक्षःसहस्रपात्॥सर्वव्यापीभुवःस्पर्शादत्यतिष्ठद्दशांगुलं॥५६॥यद्भूतंयच्चवैभाव्यंपुरुषोत्तमतद्भवा
न्॥त्वत्तोविराट्स्वराट्सम्राट्त्वत्तश्चाप्यधिपूरुषः॥५७॥अत्यरिच्यतसोधश्चतिर्यगूर्ध्वंचवैभुवः॥त्वत्तोयज्ञःसर्व
हुतःपृषदाज्यंपशुर्द्विधं॥५८॥त्वत्तऋक्चोप्यसामानित्वत्तःछंदांसिजज्ञिरे॥त्वत्तोयजूंष्यजायंतत्वत्तोश्वाश्चैकतोदतः॥

॥५९॥गावस्त्वत्तःसमुद्भूतास्त्वत्तश्चाजावयोमृगाः॥त्वन्मुखाद्ब्राह्मणाबाह्वोस्त्वत्तःक्षत्रमजायत॥६०॥वैश्यास्तवोरुजाःशूद्रा
स्तवपद्भ्यांसमुद्गताः॥अक्ष्णोःसूर्योनिलःश्रोत्राच्चंद्रमामनसस्तव॥६१॥प्राणोंतःसुषिराज्जातोमुखादग्निरजायत॥नाभि
तोगगनंद्यौश्चशिरसःसमवर्त्तत॥६२॥दिशःश्रोत्रात्क्षितिःपद्भ्यांत्वत्तःसर्वमभूदिदं॥न्यग्रोधःसुमहानल्पेयथाबीजेव्यव
स्थितः॥६३॥संयमेविश्वमखिलंबीजभूतेतथात्वयि॥बीजादंकुरसंभूतोन्यग्रोधःसुसमुच्छ्रितः॥विस्तारंचयथायातित्वत्तः
सृष्टौतथाजगत्॥यथाहिकदलीनान्यात्वक्पात्रान्नापदृश्यते॥एवंविश्वस्यनान्यस्त्वंत्वत्स्थायीश्वरदृश्यते॥ह्लादिनीसंधि
नीसंवित्त्वय्येकासर्वसंस्थितो॥६६॥ह्लादतापकरीमिश्रात्वयिनोगुणवर्जिते॥पृथग्भूतैकभूतायभूतभूतायतेनमः॥
॥६७॥प्रभूतभूतभूतायतुभ्यंभूतात्मनेनमः॥व्यक्तप्रधानपुरुषविराट्सम्राट्स्वराट्तथा॥६८॥विभाव्यतेंतःकरणपु
रुषेष्वक्षयोभवान्॥६९॥सर्वस्मिन्सर्वभूतस्त्वंसर्वःसर्वस्वरूपधृक्॥सर्वंत्वत्तस्ततश्चत्वंनमःसर्वात्मनेस्तुते॥६९॥सर्वात्म
कोसिसर्वेशसर्वभूतसमुद्भव॥सर्वभूतोभवान्वेत्तिसर्वसत्वमनोरथं॥७१॥योमेमनोरथोनाथसफलःसत्वयाकृतः॥
+स्थितोयतः॥कृपयामितनःकिंतेसर्वंवेत्सिहृदिस्थितं॥७०॥सर्वात्मन्सर्वभूतेशसर्वसर्व× तपश्चसफलंतप्तंयद्दृ
ष्टोसिजगत्पते॥७२॥श्रीभगवानुवाच॥तपसस्तत्फलंप्राप्तंयद्दृष्टोहंत्वयाध्रुव॥मद्दर्शनंहिविफलंराजपुत्रनजायते॥७३॥
वरंवरयतस्मात्त्वंयथाभिमतमात्मनः॥सर्वंसंपद्यतेपुंसांमयिदृष्टिपथंगते॥७४॥ध्रुवउ॰॥भगवन्सर्वभूतेशस

विं॰पु॰
२३

सर्वस्यात्माभवान्हृदि॥किमज्ञातंतवस्वामिन्मनसायन्मयेप्सितं॥तथापितुभ्यंदेवेशकथयिष्यामियन्मया॥प्रार्थ्यतेदुर्वि
नीतेनहृदयेनातिदुर्लभं॥७६॥किंवासर्वजगत्स्रष्टःप्रसन्नेत्वयिदुर्लभं॥त्वत्प्रसादफलंभुंक्तेत्रैलोक्यंमघवानपि॥७७॥
नैतद्राजासनंयोग्यमजातस्यममोदरात्॥इतिगर्वादवोचन्मांसपत्नीमातुरुच्चकैः॥७८॥आधारभूतंजगतःसर्वेषामुत्त
मोत्तमं॥प्रार्थयामिप्रभोस्थानंत्वत्प्रसादादतोव्ययं॥७९॥श्रीभगवानुउ॰॥यत्तत्वयाप्रार्थितंस्थानमेतत्प्राप्स्यतिवैभवा
न्॥त्वयाहंतोषितःपूर्वमन्यजन्मनिबालक॥८०॥त्वमासीर्ब्राह्मणःपूर्वंमय्येकाग्रमनाःसदा॥मातापित्रोश्चशुश्रूषुर्निज
धर्मानुपालकः॥८१॥कालेनगच्छतामित्रंराजपुत्रस्तवाभवत्॥यौवनेखिलभोगाढ्योदर्शनीयोज्वलाकृतिः॥तत्संगात्त
स्यातामृद्धिमवलोक्यातिदुर्लभां॥भवेयराजपुत्रोहमितिवांछात्वयाकृता॥८३॥ततोयथाभिलषिताप्राप्तातेराजपुत्रता॥
उत्तानपादस्यगृहेजातोसिध्रुवदुर्लभे॥८४॥अन्येषांतत्परंस्थानंकुलेस्वायंभुवस्यतु॥तस्यैतदपरंबालयेनाहंपरि
तोषितः॥८५॥मामाराध्यनरोमुक्तिमवाप्नोत्यविलंबितां॥मय्यर्पितमनोबुद्धिःकिमुस्वर्गादिकंपदं॥८६॥त्रैलोक्यादधि
केस्थानेसर्वताराग्रहाश्रयः॥भविष्यतिनसंदेहोमत्प्रसादाद्भवान्ध्रुवः॥८७॥सूर्यात्सोमात्तथाभौमात्सोमपुत्राद्बृह
स्पतेः॥सितार्कतनयादीनांसर्वर्क्षाणांतथाध्रुव॥८८॥सप्तर्षीणामशेषाणांयेचवैमानिकाःसुराः॥सर्वेषामुपरिस्थानंत
वदत्तंमयाध्रुव॥८९॥केचिच्चतुर्युगंयावत्केचिन्मन्वंतरंसुराः॥तिष्ठंतिभवतोदत्तामयावैकल्पसंस्थितिः॥९०॥सुनीतिरपि

प्र॰
२३

तेमातात्वदासन्नातिनिर्मला॥विमानेतारकाभूत्वातावत्कालंनिवत्स्यति॥९१॥येचत्वांमानवाःप्रातःसायंचसुसमाहिताः॥
कीर्त्तयिष्यंतितेषांचमहत्पुण्यंभविष्यति॥९२॥पराशरउवाच॥एवंपूर्वंजगन्नाथाद्देवदेवाज्जनार्दनात्॥वरंप्राप्यध्रुवःस्था
नमध्यास्तेसमहामुने॥९३॥तस्याभिमानमृद्धिंचमहिमानंनिरीक्ष्यहि॥देवासुराणामाचार्यःश्लोकमात्रोशनाजगौ॥९४॥
अहोस्यतपसोवीर्यमहोस्यतपसःफलं॥यदेनंपुरतःकृत्वाध्रुवंसप्तर्षयःस्थिताः॥९५॥ध्रुवस्यजननीयेयंसुनीतिर्नाम
सूनृता॥अस्याश्चमहिमानंकःशक्तोवर्णयितुंभुवि॥९६॥त्रैलोक्याश्रयतांप्राप्यपरंस्थानंस्थिरायति॥स्थानंप्रापपरंध
त्वायाकुक्षिविवरेध्रुवं॥९७॥यश्चैतत्कीर्त्तयेन्नित्यंध्रुवस्यारोहणंदिवि॥सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते॥९८॥
स्थानभ्रंशंनचाप्नोतिदिविवायदिवाभुवि॥सर्वकल्याणसंयुक्तःसर्वकालंसजीवति॥९९॥ ॥इतिश्रीविष्णुपुराणेप्रथ
मेंशेद्वादशोध्यायः॥७॥श्रीपराशरउवाच॥ध्रुवाच्छिष्टिंचभव्यंचभार्यायांभुव्यजायत॥श्लिष्टेराधत्तसुच्छायापंचपुत्रा
नकल्मषान्॥१॥रिपुंरिपुंजयंविप्रंवृकलंवृकतेजसं॥रिपोराधत्तबृहतीचाक्षुषंसर्वतेजसं॥२॥अजीजनत्पुष्करिण्यां
वारुण्यांचाक्षुषोमनुं॥प्रजापतेरात्मजायामनरण्यस्यधीमतः॥मनोरजायंतदशनड्वलायांमहौजसः॥कुरौरजनयत्पु
त्रान्षडाग्नेयीमहाप्रभान्॥अंगंसुमनसंख्यातिंक्रतुमंगिरसंशिवं॥अंगात्सुनीथापत्यंवैवेनमेकमजायत॥७॥
+ कन्यायांतपसांश्रेष्ठवैराजस्यप्रजापतेः॥४॥कुरुःपुरुःशतद्युम्नस्तपस्वीसत्यवाक्शुचिः॥अग्निष्टोमोतिरात्रश्चसुद्यु

म्नश्चेतितेनव॥५॥अभिमन्युश्चदशमोनड्वला
यांमहोजसः॥ ×

प्रजार्थमृषयस्तस्यममंथुर्दक्षिणंकरं॥वेनस्यपाणौमथितेसंबभूवमहामुने॥८॥वैन्योनाममहीपालोयःपृथुःपरिकीर्त्ति
ते॥येनदुग्धामहीपूर्वंप्रजानांहितकारणात्॥९॥मैत्रेयउवाच॥किमर्थंमथितःपाणिर्वेनस्यपरमर्षिभिः॥यत्रयज्ञेमहा
वीर्यःसपृथुर्मुनिसत्तम॥१०॥पराशरउवाच॥सुनीथानामकन्यायामृत्योःप्रथमजाभवत्॥अंगस्यभार्यासादत्तात
स्यांवेनोव्यजायत॥११॥समातामहदोषेणतेनमृत्योःसुतासुतः॥निसर्गादेवमैत्रेयदुष्टएवव्यजायत॥१२॥अभिषिक्तो
यदाराज्येसवेनःपरमर्षिभिः॥घोषयामाससतदापृथिव्यांपृथिवीपतिः॥१३॥नयष्टव्यंनहोतव्यंनदातव्यंकथंचन॥
भोक्तायज्ञस्यकस्त्वन्योह्यहंयज्ञपतिःप्रभुः॥१४॥ततस्तमृषयःपूर्वंसंपूज्यपृथिवीपतिं॥ऊचुःसामकलांसम्यक्मै
त्रेयसमुपस्थिताः॥१५॥ऋषयऊ०॥भोभोराजन्शृणुत्वंयद्वदाममहीपते॥राज्यदेहोपकारायप्रजानांचहितंपरं
॥१६॥दीर्घसत्रेणदेवेशंसर्वयज्ञेश्वरंहरिं॥पूजयिष्यामभद्रंतेतत्रांशस्तेभविष्यति॥१७॥यज्ञेनयज्ञपुरुषोविष्णुः
संप्रीणितोनृप॥अस्माभिर्भवतःकामान्सर्वादेवःप्रदास्यति॥१८॥यज्ञैर्यज्ञेश्वरोयेषांराष्ट्रेसंपूज्यतेहरिः॥तेषांस
र्वेप्सितावाप्तिंददातिनृपभूभुजां॥वेनउवाच॥मत्तःकोभ्यधिकोन्योस्तिकश्चाराध्योममापरः॥कोयंहरिरितिख्या
तोयोवोयज्ञेश्वरोमतः॥२०॥ब्रह्माजनार्दनःशंभुरिंद्रोवायुर्यमोरविः॥हुतभुग्वरुणोधातापूषाभूमिर्निशाकरः॥२१॥
एतेचान्येचयेदेवाःशापानुग्रहकारिणः॥नृपस्यैतेशरीरस्थाःसर्वदेवमयोनृपः॥२२॥एतज्ज्ञात्वायथाज्ञप्तं

मयातत्क्रियतांतथा॥नदातव्यंनयष्टव्यंनहोतव्यंचभोद्विजाः॥२३॥भर्तुःशुश्रूषणोधर्मोयथास्त्रीणांपरोमतः॥म
माज्ञापालनंधर्मोभवतांचतथाद्विजाः॥२४॥ऋषयऊचुः॥देह्यनुज्ञांमहाराजमाधर्मोयातुसंक्षयं॥हविषांप
रिणामोयंयदेतदखिलंजगत्॥२५॥श्रीपराशरउ०॥इतिविज्ञाप्यमानोपिसवेनापरमर्षिभिः॥यदाददातिनानु
ज्ञांप्रोक्तःप्रोक्तःपुनःपुनः॥२६॥ततस्तंमुनयःसर्वेकोपामर्षसमन्विताः॥हन्यतांपापइत्यूचुस्तेपरस्परं॥२७॥यो
यज्ञपुरुषंदेवमनादिनिधनंहरिं॥विनिंदत्यधमाचारोनसयोग्योभुवःपतिः॥२८॥इत्युक्त्वामंत्रपूतैस्तैःकुशैर्मुनिग
णानृपं॥निज– र्निहतंपूर्वंभगवन्निंदनादिना॥२९॥ततश्चमुनयोरेणुंददृशुःसर्वतोद्विज॥किमेतदितिचासन्नं
पप्रच्छुस्तेजनंतदा॥३०॥आख्यातंचजनैस्तेषांचौरीभूतैरराजके॥राष्ट्रेषुलोकैरारब्धंपरस्वादानमातुरैः॥३१॥
तेषामुदीर्णवेगानांचौराणांमुनिसत्तमाः॥सुमहान्दृश्यतेरेणुःपरवित्तापहारिणां॥३२॥ततःसमंत्र्यतेसर्वेमु
नयस्तस्यभूभृतः॥ममंथुरूपरंपुत्रार्थमनपत्यस्ययत्नतः॥३३॥मथ्यमानात्समुत्तस्थौतस्योरोःपुरुषःकिल॥
दग्धस्थूणाप्रतीकाशःखर्वटास्योतिह्रस्वकः॥किंकरोमीतितान्विप्रान्सर्वानाहसचातुरः॥निषीदेतितदोचुस्ते
निषादस्तेनसोभवत्॥३५॥ततस्तत्संभवाजाताविंध्यशैलनिवासिनः॥निषादामुनिशार्दूलपापकर्मोपलक्ष
णाः॥३६॥तेनद्वारेणतत्पापंनिष्क्रांतंतस्यभूपतेः॥निषादास्तेततोजातावेनकल्मषनाशनाः॥३७॥ततोस्यदक्ष

णंहस्तंममंथुस्तेतदाद्विजाः॥मथ्यमानेचतत्राभूत्पृथुर्वैन्यःप्रतापवान्॥दीप्यमानःस्ववपुषासाक्षादग्निरिवज्वल
न्॥अद्यमाजगवंनामखात्पपाततदाधनुः॥३९॥शराश्चदिव्यानभसःकवचंचपपातह॥तस्मिञ्जातेचभूतानि
संप्रहृष्टानिसर्वशः॥४०॥सत्पुत्रेणचजातेनवेनोपित्रिदिवंययौ॥पुन्नाम्नोनरकात्त्रातःसतेनसुमहात्मना॥४१॥
ला तंसमुद्राश्चनद्यश्चरत्नान्यादायसर्वशः॥तोयानिचाभिषेकार्थंवैन्यंसमुपतस्थिरे॥४२॥पितामहश्चभगवान्देवैरांगि
रसैःसह॥स्थावराणिचभूतानिजंगमानिचसर्वशः॥४३॥समागम्यतदावैन्यमभ्यषिंचन्नराधिपं॥हस्तेचदक्षि
णेचक्रंदृष्ट्वातस्यपितामहः॥४४॥विष्णोरंशंपृथुंमत्वापरितोषंपरंययौ॥विष्णोश्चिह्नंकरेचक्रंसर्वेषांचक्रव
र्तिनां॥भवत्यव्याहतोयस्यप्रभावस्त्रिदशैरपि॥महताराजराज्येनपृथुर्वैन्यःप्रतापवान्॥४६॥सोभिषिक्तोमहा
तेजाविधिवद्धर्मकोविदैः॥पित्रापरंजितास्तस्यप्रजास्तेनानुरंजिताः॥४७॥अनुरागात्ततस्तस्यनामराजेत्यजा
यत॥आपस्तस्तंभिरेचास्यसमुद्रमभियास्यतः॥४८॥पर्वताश्चददुर्मार्गंध्वजभंगश्चनाभवत्॥अकृष्टपच्या
पृथिवीसिध्यंत्यन्नानिचिंतया॥४९॥सर्वकामदुघागावःपुटकेपुटकेमधु॥तस्यवैजातमात्रस्ययज्ञेपैताम
हेशुभे॥५०॥सूतःसुत्यांसमुत्पन्नःसौत्येहनिमहामतिः॥तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोथमागधः॥५१॥प्रो
क्तौतदामुनिवरैस्तावुभौसूतमागधौ॥स्तूयतामेषनृपतिःपृथुर्वैन्यःप्रतापवान्॥कर्मैतदनुरूपंवांपात्रंस्तोत्रस्यचा

परं॥५३॥ततस्तावूचतुर्विप्रान्सर्वानेवकृतांजली॥अद्यजातस्यनोकर्मज्ञायतेस्यमहीपतेः॥गुणानचास्यज्ञायंतेनचापि
ग्रः प्रथितंयशः॥स्तोत्रंकिमाश्रयंत्वस्यकार्यमस्माभिरुच्यतां॥५५॥ऋषयऊचुः॥करिष्यत्येषयत्कर्मचक्रवर्तीमहाबलः॥गुणा
भविष्यायेचास्यतैरयंस्तूयतांनृपः॥५६॥श्रीपराशरउ०॥ततःसनृपतिस्तोषंतत्श्रुत्वापरमंययौ॥सद्गुणैःश्लाघ्यतामे
तितस्माच्छ्लाघ्यागुणामम॥५७॥तस्माद्यदत्रस्तोत्रेमेगुणनिर्वर्णनंत्विमौ॥करिष्येतेकरिष्यामितदेवाहंसमाहितः॥५८॥य
दीमौवर्जनीयंचकिंचिदत्रवदिष्यतः॥तदहंवर्जयिष्यामीत्येवंचक्रेमतिंद्विजः॥५९॥अथतौचक्रतुःस्तोत्रंपृथुर्वैन्यस्यधी
मतः॥भविष्यैःकर्मभिःसम्यक्सुस्वरौसूतमागधौ॥६०॥सत्यवाग्दानशीलोयंसत्यसंधोनरेश्वरः॥ह्रीमान्मैत्रःक्षमा
शीलोविक्रांतोदुष्टशासनः॥६१॥धर्मज्ञश्चकृतज्ञश्चदयावान्प्रियभाषिता॥मान्योमानयितायज्वाब्रह्मण्यःसाधुव
त्सलः॥६२॥समःशत्रौचमित्रेचव्यवहारस्थितोनृपः॥सूतेनोक्तान्गुणानित्थंसतदामागधेनच॥६३॥चकारहृदिता
दृक्चकर्मणाकृतवानसौ॥ततःसपृथिवीपालःपालयन्वसुधामिमां॥६४॥इयाजविविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः॥
तंप्रजाःपृथिवीनाथमुपतस्थुःक्षुधार्दिताः॥६५॥ओषधीषुप्रनष्टासुतस्मिन्कालेत्वराजके॥मुचुस्तेनताःपृष्टास्त
त्रागमनकारणं॥६६॥प्रजाऊचुः॥अराजकेनृपश्रेष्ठधरित्र्यासकलौषधीः॥ग्रस्तास्ततःक्षयंयांतिप्रजाःसर्वाःप्रजेश्व
रः॥६७॥त्वंनोवृत्तिप्रदोधात्राप्रजापालोनिरूपितः॥देहिनःक्षुत्परीतानांजीवनौषधीः॥६८॥श्रीपराशरउवाच॥

प्रजानो

ततोथनृपतिर्दिव्यमादायाजगवंधनुः॥शरांश्चदिव्यान्कुपितःसोन्वधावद्वसुंधरां॥७०॥ततोननाशात्वरितंगोर्भूत्वा
थवसुंधरा॥सालोकान्ब्रह्मलोकादीन्तत्रासादगमन्मही॥यत्रयत्रययौदेवीतदासाभूतधारिणी॥तत्रतत्रतुसावैन्यं
ददर्शाभ्युद्यतायुधं॥७२॥ततस्तंप्राहवसुधापृथुंपृथुपराक्रमं॥प्रवेपमानातद्बाणपरित्राणपरायणा॥७३॥स्त्रीवधेत्वं
महत्पापंकिंनरेंद्रनपश्यसि॥येनमांहंतुमत्यर्थंप्रकरोषिनृपोद्यमं॥७४॥पृथुरुवाच॥एकस्मिन्यत्रनिधनंप्रापितेदु
ष्टचारिणि॥बहूनांभवतिक्षेमस्तस्यपुण्यप्रदोवधः॥पृथिव्युवाच॥प्रजानामुपकारायययदिमांत्वंहनिष्यसि॥आधा
रकःप्रजानांतेनृपश्रेष्ठभविष्यति॥७६॥पृथुरुवाच॥त्वांहत्वावसुधेबाणैर्मच्छासनपराङ्मुखीं॥आत्मयोगबलेनेमा
धारयिष्याम्यहंप्रजाः॥७७॥ततःप्रणम्यवसुधातंभूयःप्राहपार्थिवं॥प्रवेपितांगीपरमंसाध्वसेसमुपागता॥पृथिव्यु
वाच॥उपायतःसमारब्धःसर्वेसिद्ध्यंत्युपक्रमाः॥तस्माद्ददाम्युपायंतेतंकुरुष्वयदीच्छसि॥७९॥समस्तास्तामया
जीर्णानरनाथमहौषधीः॥यदिच्छसिप्रदास्यामिताःक्षीरपरिणामिनी॥८०॥तस्मात्प्रजाहितार्थायममधर्मभृतांवर॥
ततंवत्संप्रयच्छत्वंक्षरयेयेनवत्सला॥८१॥समांचकुरुसर्वत्रयेनक्षीरंसमंततः॥वरौषधीबीजभूतंवीरसर्वत्रभावये
त्॥८२॥श्रीपराशरउवाच॥ततउत्सारयामासशैलान्शतसहस्रशः॥धनुष्कोट्यातदावैन्यस्तेनशैलाविवर्द्धिताः॥
॥८३॥नहिपूर्वविसर्गेवैविषमेपृथिवीतले॥प्रविभागःपुराणांवाग्रामाणांवापुराभवत्॥८४॥नसस्यानिनगोरक्षा

नकृषिर्नवणिक्पथः॥वैन्यप्रभृतिमैत्रेयसर्वस्यैतस्यसंभवः॥८५॥यत्रयत्रसमंत्वस्याभूमेरासीन्नराधिपः॥तत्रतत्र
प्रजानांहिनिवासंसमरोचयत्॥८६॥आहारःफलमूलानिप्रजानामभवत्तदा॥कृच्छ्रेणमहतासोपिप्रनष्टास्वोषधीषु
॥८७॥सकल्पयित्वावत्संतुमनुंस्वायंभुवंप्रभुं॥स्वपाणौपृथिवीनाथोदुदोहपृथिवींपृथुः॥८८॥सस्यजातानिसर्वाणि
प्रजानांहितकाम्यया॥तेनान्नेनप्रजास्तातवर्त्ततेद्यापिनित्यशः॥८९॥प्राणप्रदानात्सपृथुर्यस्माद्भूमेरभूत्पिता॥
ततस्तुपृथिवीसंज्ञामवापाखिलधारिणी॥९०॥ततश्चदेवैर्मुनिभिर्दैत्यरक्षोभिरद्रिभिः॥गंधर्वैरुरगैर्यक्षैःपितृ
भिस्तथा॥तत्तत्पात्रमुपादायतत्तद्दुग्धंमुनेपयः॥वत्सदोग्धृविशेषाश्चतेषांतद्योनयोभवत्॥सैषाधात्रीचधरणी
तथासर्वस्यजगतःपृथ्वीविष्णुपादतलोद्भवा॥९३॥एवंप्रभावःसपृथुःपुत्रोवेनस्यवीर्यवान्॥जज्ञेमहीपतिःपूर्वरा
जाभूज्जनरंजनात्॥९४॥यइदंजन्मवैन्यस्यपृथोःसंकीर्त्तयेद्बुधः॥नतस्यदुःकृतंकिंचित्फलदायिप्रजायते॥
॥९५॥दुःस्वप्नोपशमनंनृणांतोश्चैतदुत्तमं॥पृथोर्जन्मप्रभावश्चकरोतिसततंनृणां॥९६॥॥इतिश्रीविष्णुपुरा
णेप्रथमेंशेत्रयोदशोध्यायः॥पराशरउ०॥पृथोःपुत्रौतुधर्मज्ञौजज्ञातेंतर्द्धिवादिनौ॥शिखंडिनीहविर्द्धानमंत
र्द्धानेव्यजायत॥१॥हविर्द्धानात्षडाग्नेयीधिषणाजनयत्सुतान्॥प्राचीनबर्हिषंशुक्रंगयंकृष्णंव्रजाजिनौ
॥२॥प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः॥हविर्द्धानान्महाराजयेनसंवर्द्धिताःप्रजाः॥३॥प्राचीनाग्राःकुशा

प्रज्ञा ३

स्तस्मात्पृथिव्यांविस्तृतामुने॥प्राचीनबर्हिरभवत्ख्यातोभुविमहाबलः॥४॥समुद्रतनयायांतुकृतदारोमहीपतिः॥मह
नस्तपसःपारेसुतानादिसवर्चसः॥५॥सुवर्णाधत्तसामुद्रीदशप्राचीनबर्हिषः॥सर्वेप्रचेतसोनामधनुर्वेदस्यपारगाः॥
॥६॥अपृथक्धर्मचरणास्तेतप्यंतमहत्तपः॥दशवर्षसहस्राणिसमुद्रसलिलेशयाः॥७॥मैत्रेयउ०॥यदर्थंतेमहात्मा
नस्तपस्तेपुर्महामुने॥प्रचेतसःसमुद्रांभस्येतदाख्यातुमर्हसि॥८॥पराशरउ०॥पित्राप्रचेतसःप्रोक्ताःप्रजार्थममितात्म
नः॥प्रजापतिनियुक्तेनबहुमानपुरस्सरं॥९॥ब्रह्मणादेवदेवेनसमादिष्टोस्म्यहंसुताः॥प्रजाःसंवर्द्धनीयास्तेमयाचोक्तं
तथेतितत्॥१०॥तथाममप्रीतयेपुत्राःप्रजावृद्धिमतंद्रिताः॥कुरुध्वंमाननीयावःसम्यगाज्ञाप्रजापतेः॥पराशरउवाच॥
ततस्तेतत्पितुःश्रुत्वावचनंनृपनंदनाः॥तथेत्युक्त्वाचतंभूयःपप्रच्छुःपितरंमुने॥प्रचेतसउ०॥येनतातप्रजावृद्धौस
मर्थाःकर्मणावयं॥भवामस्तत्समस्तंनःकर्मचाख्यातुमर्हसि॥१२॥पितोवाच॥आराध्यवरदंविष्णुमिष्टप्राप्तिमसंश
यं॥समेतिनान्यथामर्त्यःकिमन्यत्कथयामिवः॥१४॥तस्मात्प्रजाविवृद्ध्यर्थंसर्वभूतप्रभुंहरिं॥आराधयतगोविंदंय
दिसिद्धिमभीप्सथ॥१५॥धर्ममर्थंचकामंचमोक्षंचान्विच्छतासदा॥आराधनीयोभगवाननादिपुरुषोत्तमः॥१६॥
यस्मिन्नाराधितेसर्गंचकारादौप्रजापतिः॥तमाराध्याच्युतंवृद्धिःप्रजानांवोभविष्यति॥१७॥इत्येवमुक्तास्तेपित्रा
पुत्राःप्राचेतसोदश॥मग्नाःपयोधिसलिलेतपस्तेपुःसमाहिताः॥१८॥दशवर्षसहस्राणिन्यस्तचित्ताजगत्पतौ॥

नारायणेजगन्नाथेसर्वलोकपरायणे॥१९॥तत्रैवतेस्थितादेवमेकाग्रमनसोहरिं॥तुष्टुवुर्यःस्तुतःकामान्स्तोतुरिष्टा
न्प्रयच्छति॥२०॥मैत्रेयउवाच॥स्तवंप्रचेतसोविष्णोःसमुद्रांभसिसंस्थिताः॥चक्रुस्तन्मेमुनिश्रेष्ठसुपुण्यंवक्तुमर्हसि
॥२१॥श्रीपराशरउवाच॥शृणुमैत्रेयगोविंदंयथापूर्वंप्रचेतसः॥तुष्टुवुस्तन्मयीभूताःसमुद्रसलिलेशयाः॥प्रचेतसउ०॥
नताःस्मसर्ववचसांप्रतिष्ठायत्रशाश्वती॥तमाद्यंतमशेषस्यजगतःपरमंप्रभुं॥२३॥ज्योतिराद्यमनौपम्यंअण्वनंतम
पारवत्॥योनिभूतमशेषस्यस्थावरस्यचरस्यच॥२४॥यस्याहःप्रथमंरूपमरूपस्यततोनिशा॥संध्याचपरमेशा
स्यतस्मैकालात्मनेनमः॥२५॥भुज्यतेनुदिनेदेवैःपितृभिश्चसुधात्मकः॥जीवभूतःसमस्तस्यतस्मैसोमात्मनेनमः॥
॥२६॥यस्तमांस्यतिब्रह्मात्मन्स्वभाभिर्भासयन्नभः॥घर्मशीतांभसांयोनिस्तस्मैसूर्यात्मनेनमः॥२७॥काठिन्यवा
न्योविभर्त्तिजगदेतदशेषतः॥शब्दादिसंश्रयोव्यापितस्मैभूम्यात्मनेनमः॥२८॥यद्योनिभूतंजगतोबीजंयत्सर्वदेहि
नां॥तत्तोयरूपमीशस्यनमामोहरिमेधसः॥२९॥यामुखंसर्वदेवानांहव्यभुक्कव्यभुक्तथा॥पितॄणांचनमस्तस्मैविष्णवे
पावकात्मने॥३०॥पंचधावस्थितोदेहेयश्चेष्टांकुरुतेनिशं॥आकाशयोनिर्भगवान्तस्मैवाय्वात्मनेनमः॥३१॥अ
वकाशमशेषाणांभूतानांयःप्रयच्छति॥अनंतमूर्त्तिमान्शुद्धस्तस्मैव्योमात्मनेनमः॥३२॥समस्तेंद्रियवर्गस्ययः
सदास्थानमुत्तमं॥तस्मैशब्दादिरूपायनमःकृष्णायवेधसे॥२३॥गृह्णातिविषयान्नित्यमिंद्रियात्माक्षराक्षरः॥

यस्तस्मैज्ञानमूलायनताःस्महरिमेधसे॥३४॥गृहीतानींद्रियैरर्थानात्मनेयःप्रयच्छति॥अंतःकरणभूतायतस्मैविश्वा
त्मनेनमः॥३५॥यस्मिन्ननंतेसकलंविश्वंयस्मात्तथोद्गतं॥लयस्थानंचयस्तस्मैनमःप्रकृतिधर्मिणे॥३६॥शुद्धःसंलक्ष्यते
भ्रांत्यागुणवानिवयोगुणो॥तस्मात्मरूपिणंदेवंनताःस्मपुरुषोत्तमं॥३७॥अविकारमजंशुद्धंनिर्गुणंयंनिरंजनं॥नताःस्म
तत्परंब्रह्मविष्णोर्यत्परमंपदं॥३८॥अदीर्घह्रस्वमस्थूलमनण्वश्याममलोहितं॥अस्नेहच्छायमतनुमसक्तमशरीरिणं॥
॥३९॥अनाकाशमसंस्पर्शमगंधमरसंचयत्॥अचक्षुःश्रोत्रमचलंअवाक्प्राणममानसं॥४०॥अनामगोत्रमसुखमते
जस्कमहेतुकं॥अभयंभ्रांतिरहितमनिद्रमजरामरं॥४१॥अरजोशब्दममृतमप्लुतंयदसंवृतं॥पूर्वापरेनवैयस्मिंस्तद्वि
ष्णोःपरमंपदं॥४२॥परमीशित्वगुणवत्सर्वभूतमसंश्रयं॥नताःस्मतत्पदंविष्णोर्जिह्वादृगगोचरं॥४३॥एवंप्रचेतसोवि पराशरउ॰
ष्णुंस्तुवंतस्तत्समाधयः॥दशवर्षसहस्राणितपश्चेरुर्महार्णवे॥४४॥ततःप्रसन्नोभगवांस्तेषामंतर्जलेहरिः॥ददौदर्शन
मुन्निद्रनीलोत्पलदलच्छविः॥४५॥पतत्रिराजमारूढमवलोक्यप्रचेतसः॥प्रणिपेतुःशिरोभिस्तंभक्तिभारावनामितैः॥
॥४६॥ततस्तानाहभगवान्व्रियतामीप्सितोवरः॥प्रसादसुमुखोहंवोवरदःसमुपस्थितः॥४७॥ततस्तमूचुर्वरदंप्रणिपत्य
प्रचेतसः॥यथापित्रासमादिष्टंप्रजानांवृद्धिकारणं॥४८॥सचापिदेवस्तंदत्वायथाभिलषितंवरं॥अंतर्धानंजगामाशुतेच
निश्चक्रमुर्जलात्॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेचतुर्दशोध्यायः॥१४॥श्रीपराशरउ॰॥तपश्चरत्सुपृथिवींप्रचेतस्सु

महीरुहाः॥अरक्ष्यमाणामावव्रुर्बभूवाथप्रजाक्षयः॥१॥नाशकन्मारुतोवातुंवृतंखंभवतद्रुमैः॥दशवर्षसहस्राणिनशेकुश्चे
ष्टितुंप्रजाः॥२॥तान्दृष्ट्वाजलनिष्क्रांताःसर्वेक्रुद्धाःप्रचेतसः॥मुखेभ्योवायुमग्निंचतेसृजन्जातमन्यवः॥उन्मूलानथतान्वृक्षा
न्कृत्वावायुरशोषयत्॥तानग्निरदहद्घोरस्तत्राभूद्द्रुमसंक्षयः॥४॥द्रुमक्षयमथोदृष्ट्वाकिंचिच्छिष्टेषुशाखिषु॥उपगम्याब्रवी
देतान्राजासोमःप्रजापतीन्॥५॥कोपंयच्छतराजानःशृणुध्वंचवचोमम॥संधानंवःकरिष्यामिसहक्षितिरुहैरहं॥६॥रत्नभूता
चकन्येयंवृक्षजावरवर्णिनी॥भविष्यज्ञानतापूर्वंमयागोभिर्विनिर्मिता॥७॥मारिषानामनाम्नैषावृक्षाणामितिनिर्मिता॥भा
र्यावोऽस्तुमहाभागाध्रुवंवंशविवर्द्धिनी॥८॥युष्माकंतेजसोऽर्द्धेनममचार्द्धेनतेजसा॥अस्यामुत्पत्स्यतेविद्वान्दक्षोनामप्र
जापतिः॥९॥ममचांशेनसंयुक्तोयुष्मत्तेजोमयेनवै॥अग्निनाऽग्निसमोभूयःप्रजाःसंवर्द्धयिष्यति॥१०॥कंडुर्नाममुनिःपू
र्वमासीद्वेदविदांवरः॥सुरम्येगोमतीतीरेसतेपेपरमंतपः॥११॥तत्क्षोभायसुरेंद्रेणप्रम्लोचाख्यावराप्सरा॥प्रयुक्ताक्षोभ
यामासतमृषिंसाशुचिस्मिता॥१२॥अभ्येत्यपुष्पावचयव्याजेनाविकलस्वरं॥जगौसमीपेतस्यर्षेश्चाश्रमस्याथसुंदरी॥१३॥
सतामालोक्यकंदर्पशरैरभ्यर्दितःक्षणात्॥क्षोभितःसतयासार्द्धंवर्षाणामधिकंशतं॥१४॥अतिष्ठन्मंदरद्रोण्यांविषया
सक्तमानसः॥सातंप्राहमहाभागगंतुमिच्छाम्यहंदिवं॥१५॥प्रसादसुमुखंब्रह्मन्ननुज्ञांदातुमर्हसि॥तयैवमुक्तःसमुनिस्त
स्यामासक्तमानसः॥१६॥दिनानिकतिचिद्भद्रेस्थीयतामित्यभाषत॥एवमुक्ताततस्तेनसाग्रंवर्षशतंपुनः॥बुभुजेविष

वि०पु०
२९

यांस्तान्वीतेनसार्द्धंमहात्मना॥अनुज्ञांदेहिभगवन्व्रजामित्रिदिवौशालयं॥१८॥उक्तस्तयेतिसपुनःस्थीयतामित्यभाषत॥
पुनर्गतेवर्षशतेसाधिकेसाशुभानना॥१९॥यामीत्याहदिवंब्रह्मन्प्रणयस्मितशोभनं॥उक्तस्तयैवंसमुनिरुपगृह्यायते
क्षणां॥२०॥इहास्यतांक्षणंसुभ्रूचिरकालंगमिष्यसि॥तच्छापभीतासुश्रोणीसहतेनर्षिणापुनः॥२१॥शतद्वयंकिंचिदूनं
वर्षाणांसमतिष्ठत॥गमनायमहाभागादेवराजनिवेशनं॥२२॥प्रोक्तःप्रोक्तस्तयातन्व्यास्थीयतामित्यभाषत॥तस्यशा
पभयाद्भीतादाक्षिण्येनचदक्षिणा॥२३॥प्रोक्ताप्रणयभंगार्त्तिवेदिनीनजहौमुनिं॥तयाचरममाणस्यपरमर्षेरहर्निशं॥
॥२४॥नवंनवमभूत्प्रेममन्मथाकृष्टचेतसः॥एकदातुत्वरायुक्तोनिश्चक्रामोटजान्मुनिः॥निष्क्रामंतंचकुत्रेतिगम्यतेप्रा
हसाशुभा॥इत्युक्तःसतयाप्राहपरिवृत्तमहःशुभे॥२६॥संध्योपास्तिंकरिष्यामिक्रियालोपोन्यथाभवेत्॥ततःप्रहस्यसु
दतीतंसाप्राहमहामुनिं॥२७॥किमद्यसर्वधर्मज्ञपरिवृत्तमहस्तव॥बहूनांविप्रवर्षाणांपरिणाममहस्तव॥२८॥गतमे
तन्नकुरुतेविस्मयंकस्यकथ्यतां॥२९॥प्रातस्त्वमागताभद्रेनदीतीरमिदंशुभे॥मयादृष्टाचतन्वंगिप्रविष्टाचममाश्रमं॥
॥३०॥इयंचवर्त्ततेसंध्यापरिणाममहर्गतं॥अवहासःकिमर्थोयंसद्भावःकथ्यतांमम॥३१॥प्रम्लोचाउ०॥प्रत्यूषेस्म्याग
तोब्रह्मन्सत्यमेतन्नतेमृषा॥किंत्वद्यतस्यकालस्यगतान्यब्दशतानिते॥३२॥सोमउ०॥ततःसासाध्वसोविप्रस्तांप
प्रच्छायतेक्षणां॥कथ्यतांभीरुकःकालस्त्वयामेक्रीडतःसह॥प्रम्लोचाउ०॥सप्तोत्तराण्यतीतानिनववर्षशतानिते॥मास

प्र०
२९

श्चषट्तथैवान्यत्समतीतंदिनत्रयं॥३४॥ऋषिरुवाच॥सत्यंभीरुवदस्येतत्परिहासोथवाशुभे॥दिनमेकमहंमन्येत्वयासार्द्धम
योषितं॥३५॥प्रम्लोचाउ०॥वदिष्याम्यनृतंब्रह्मन्कथमत्रतवांतिके॥विशेषेणाद्यभवताप्रष्टामार्गानुवर्त्तिना॥३६॥सोमउ०॥
नशम्यतद्वचस्तथ्यंसमुनिर्नृपनंदनः॥धिग्धिग्मामित्यतीवेत्थंनिनिंदात्मानमात्मना॥३७॥मुनिरु०॥तपांसिममनष्टानि
हृतंब्रह्मविदांधनं॥हृतोविवेकःकेनापियोषिन्मोहायनिर्मिता॥३८॥ षट्कातिगंब्रह्मज्ञेयमात्मजयेनमे॥मतिरेषा
हृतायेनधिक्तंकाममहाग्रहं॥३९॥व्रतानिवेदविद्याप्तिकारणान्यखिलानिच॥नरकग्राममार्गेणसंगेनापहतानिमे
॥४०॥विनिंद्येत्थंसधर्मज्ञःस्वयमात्मानमात्मना॥तामप्सरसमासीनामिदंवचनमब्रवीत्॥४१॥गच्छपापेयथाकामंय
त्कार्यंतत्कृतंत्वया॥देवराजस्यमत्क्षोभंकुर्वत्याभावचेष्टितैः॥४२॥नत्वांकरोम्यहंभस्मक्रोधतीव्रेणवह्निना॥सतां
सप्तपदंमैत्रमुषितोहंत्वयासह॥४३॥अथवातवदोषःकिंकिंवाकुप्याम्यहंतव॥ममैवदोषोनितरांयेनाहमजितें
द्रियः॥४४॥ययाशक्रप्रियार्थिन्याकृतोमत्तपसोव्ययः॥त्वयाधिकांमहामोहमंजूषांसुजुगुप्सितां॥सोमउवाच॥
यावदित्थंसविप्रर्षिस्तांब्रवीतिसुमध्यमां॥तावद्गलत्स्वेदजलासाबभूवातिवेपथुः॥४६॥प्रवेपमानांसततंछिन्नगात्रल
तांसतीं॥गच्छगच्छेतिसक्रोधमुवाचमुनिसत्तमः॥४७॥सातुनिर्भर्त्सितातेनविनिःक्रम्यतदाश्रमात्॥आकाशगामिनी
स्वेदंममार्जतदुपल्लवैः॥४८॥वृक्षाद्वृक्षंययौबालातदग्रारुणपल्लवैः॥निर्मार्जमानागात्राणिगलत्स्वेदजलानिवै॥४९॥

वि०पु०
३०

ऋषिणायस्तदागर्भस्तस्यादेहेसमाहितः॥निर्जगामसरोमांचस्वेदरूपीतदंगतः॥५०॥तंवृक्षाजगृहुर्गर्भमेकंचक्रेचमारुतः॥म
याचाप्यायितोगोभिःसतदाववृधेशनैः॥५१॥वृक्षाग्रगर्भसंभूतामारिषाख्यावरांगना॥तांप्रदास्यामिवोभूपाः कोपएषप्रश
म्यतां॥५२॥कंडोरपत्यमेवंसावृक्षेभ्यश्चसमुद्गता॥ममापत्यंतथावायोःप्रम्लोचातनयाचसा॥सचापिभगवान्कंडुःक्षी
णेतपसिसत्तमाः॥पुरुषोत्तमसंज्ञंयद्विष्णोरायतनंययौ॥५४॥तत्रैकाग्रमतिर्भूत्वाचकाराराधनंहरेः॥ब्रह्मपारमयंकुर्वन्
जपमेकाग्रमानसः॥५५॥ऊर्द्ध्वबाहुर्महायोगीस्थित्वासौभूपनंदनाः॥प्रचेतसऊचुः॥ब्रह्मपारंमुनेश्रोतुमिच्छामःपरमंस्तवं॥
जपताकंडुनादेवोयेनाराध्यतकेशवः॥५७॥सोमउवाच॥पारंपरंविष्णुरपारपारःपरेपरेभ्यःपरमार्थरूपी॥सब्रह्मपा
रःपरपारभूतःपरःपराणामपिपारपारः॥५८॥सकारणंकारणतस्ततोपितस्यापितस्यापितुहेतुहेतुः॥कार्येषुचैवंसहि
कर्मकर्तृरूपैरशेषैरवतीहविश्वं॥५९॥प्रभुःब्रह्मब्रह्मससर्वभूतोब्रह्मप्रजानांपतिरच्युतोसौ॥ब्रह्माव्ययंनित्यमजंस
विष्णुरपक्षयाद्यैरखिलैरसंगि॥६०॥ब्रह्माक्षरमजंनित्यंयथासौपुरुषोत्तमः॥तथारागादयोदोषाःप्रयांतुप्रशमंमम॥
॥६१॥सोमउ०॥एतद्ब्रह्मपराख्यंवैसंस्तवंपरमंजपन्॥अवापपरमांसिद्धिंससमाराध्यकेशवं॥६२॥इयंचमारिषापूर्वं
यासीत्तांप्रब्रवीमिवः॥कार्यगौरवमेतस्याःकथनेफलदातिवः॥६३॥अपुत्राप्रागियंविष्णुंमृतेभर्त्तरिसत्तमाः॥भूपप
त्नीमहाभागातोषयामासभक्तितः॥आराधितस्तयाविष्णुःप्राहप्रत्यक्षतांगतः॥वरंवृणीष्वेतिसवभाषासाचप्राहात्मवां

प्र०
३०

BHAU DAJI MEMORIAL

छितं॥६५॥भगवन्बालवैधव्याद्वृथाजन्माहमीदृशी॥मंदभाग्यासमुद्भूताविफलाचजगत्पते॥६६॥भवंतुपतयःश्लाघ्याम
मजन्मनिजन्मनि॥त्वत्प्रसादात्तथापुत्रःप्रजापतिसमोऽस्तुमे॥६७॥रूपसंपत्समायुक्तासर्वस्यप्रियदर्शना॥अयोनिजाच
जायेयंत्वत्प्रसादादधोक्षज॥सोमउ०॥तयेवमुक्तोदेवेशोहृषीकेशउवाचतां॥प्रणामनम्रामुत्थाप्यवरदःपरमेश्वरः॥
॥६९॥श्रीविष्णुरु०॥भविष्यंतिमहावीर्याएकस्मिन्नेवजन्मनि॥प्रख्यातोदारकर्माणोभवत्याःपतयोदश॥७०॥पुत्रंचसुम
हात्मानमतिवीर्यपराक्रमं॥प्रजापतिगुणैर्युक्तंत्वमवाप्स्यसिशोभने॥७१॥वंशानांतस्यकर्तृत्वेजगत्यस्मिन्भविष्य
ति॥त्रैलोक्यमखिलंस्वतिस्तस्यवापूरयिष्यति॥७२॥त्वंचाप्ययोनिजासाध्वीरूपौदार्यगुणान्विता॥मनःप्रीतिकरीनृ
णांमत्प्रसादाद्भविष्यसि॥७३॥इत्युक्त्वांतर्दधेदेवस्तांविशालविलोचनां॥साचेयंमारिषाजातायुष्मत्पत्नीनृपात्मजाः॥
॥७४॥श्रीपराशरउ०॥ततःसोमस्यवचनाज्जगृहुस्तेप्रचेतसः॥संहृत्यकोपंवृक्षेभ्यःपत्नींधर्मेणमारिषां॥७५॥दशा
भ्यस्तुप्रचेतोभ्योमारिषायांप्रजापतिः॥जज्ञेदक्षोमहाभागोयःपूर्वंब्रह्मणोभवत्॥७६॥सतुदक्षोमहाभागःसृष्ट्यर्थं
सुमहामतिः॥पुत्रानुत्पादयामासप्रजासृष्ट्यर्थमात्मनः॥७७॥अजरांस्सजरांश्चैवद्विपादाथचतुष्पदः॥आदेशं
ब्रह्मणःकुर्वन्सृष्ट्यर्थंसमवस्थितः॥ससृष्ट्वामनसादक्षःपश्चात्समसृजत्स्त्रियः॥ददौसधर्मायदशकश्यपायत्र
योदश॥७९॥कालस्यानयनेयुक्ताःसप्तविंशतिचेंदवे॥तासुदेवास्तथादैत्यानागागावस्तथाखगाः॥गंधर्वाप्स

रसश्चैवदानवाद्याश्चजज्ञिरे॥ततःप्रभृतिमैत्रेयप्रजामैथुनसंभवाः॥८१॥संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषामभवन्प्रजाः॥
तपोविशेषैसिद्धानांतथात्यंततपस्विनां॥८२॥मैत्रेयउवाच॥अंगुष्ठाद्दक्षिणाद्दक्षःपूर्वंजातःप्रजापतेः॥कथंप्रचेतसोभू
यःससंभूतोमहामुने॥८३॥एषमेसंशयोब्रह्मन्सुमहान्हृदिवर्त्तते॥यद्दौहित्रःससोमस्यकथंश्वसुरतांगतः॥८४॥श्री
पराशरउ०॥उत्पत्तिश्चनिरोधश्चनित्यौभूतेषुसत्तम॥ऋषयोत्रनमुह्यंतियेचान्येदिव्यचक्षुषः॥८५॥युगेयुगेभवंत्येते
दक्षाद्यामुनिसत्तम॥पुनश्चैवंनिरुध्यंतेविद्वांस्तत्रनमुह्यति॥८६॥कानेष्ठ्यंज्येष्ठ्यमप्येषांपूर्वंनाभूद्द्विजोत्तम॥तपएव
गरीयोभूत्प्रभावश्चैवकारणं॥८७॥मैत्रेयउवाच॥देवानांदानवानांचगंधर्वोरगराक्षसां॥उत्पत्तिंविस्तरेणेहममब्र
ह्मन्प्रकीर्त्तय॥८८॥श्रीपराशरउवाच॥प्रजाःसृजेतिव्यादिष्टःपूर्वंदक्षःस्वयंभुवा॥यथाससर्जभूतानितथाशृणु
महामुने॥८९॥मानसान्येवभूतानिपूर्वंदक्षोसृजत्तदा॥देवाऋषीन्सगंधर्वान्असुरान्पन्नगांस्तथा॥९०॥यदा
स्यसृजमानस्यनव्यवर्द्धंतताःप्रजाः॥ततःसंचिंत्यसपुनःसृष्टिहेतोःप्रजापतिः॥९१॥मैथुनेनैवधर्मेणसिसृक्षुर्वि श्रु
विधाःप्रजाः॥असिक्नीमावहत्कन्यांवीरणस्यप्रजापतेः॥९२॥सुतांसुतपसायुक्तांमहतींलोकधारिणीं॥अथपुत्रस
हस्राणिवैरण्यांपंचवीर्यवान्॥९३॥असिक्न्यांजनयामाससर्गहेतोःप्रजापतिः॥तान्दृष्ट्वानारदोविप्रसंविवर्द्धयि प्र०
तून्प्रजाः॥९४॥संगम्यप्रियसंवादोदेवर्षिरिदमब्रवीत्॥हेहर्यश्वामहावीर्याःप्रजायूयंकरिष्यथ॥९६॥ईदृशोलक्ष्य ३१

नेयत्तोभवतांश्रूयतांद्विमिदं॥बालिशाबलयूयंतेनास्याजानीथवैभुवः॥९७॥अंतरूर्द्धमधश्चैवकथंस्रक्ष्यथवैप्रजाः॥ऊ
र्द्धंतिर्यगधश्चैवयदाप्रतिहतागतिः॥९८॥तदाकस्माद्भवोनांतंसर्वेद्रक्ष्यथबालिशाः॥तेतुतद्वचनंश्रुत्वाप्रयाताःसर्वतो
दिशं॥९९॥अद्यापिननिवर्त्तंतेसमुद्रेभ्यइवापगाः॥हर्यश्वेष्वथनष्टेषुदक्षःप्राचेतसःपुनः॥वैरण्यामथपुत्राणांस
हस्रमसृजत्प्रभुः॥विवर्द्धयिषवस्तेतुसबलाश्वाःप्रजाःपुनः॥१०१॥पूर्वोक्तंवचनंब्रह्मन्नारदेनप्रचोदिताः॥१०२॥अन्यो
न्यमूचुस्तेसर्वेसम्यगाहमहामुनिः॥भ्रातॄणांपदवीचैवगंतव्यानात्रसंशयः॥१०३॥ज्ञात्वाप्रमाणंपृथ्व्याश्चप्रजाःस्रक्ष्या
महेततः॥तेपितेनैवमार्गेणप्रयाताःसर्वतोदिशं॥४॥अद्यापिननिवर्त्तंतेसमुद्रेभ्यइवापगाः॥ततःप्रभृतिवैभ्राताभ्रा
तुरन्वेषणेद्विज॥प्रयातोनश्यतियथातन्नकार्यंविजानता॥५॥सतान्विनष्टान्विज्ञायपुत्रान्दक्षःप्रजापतिः॥क्रोधंच
क्रेमहाभागोनारदंचशशापवै॥६॥सर्गकामस्ततोविद्वान्समैत्रेयप्रजापतिः॥षष्टिंदक्षोसृजत्कन्यावैरण्यामितिनःश्रु
तं॥७॥ददौसदशधर्मायकश्यपायत्रयोदश॥सप्तविंशतिसोमायचतस्रोरिष्टनेमिने॥८॥द्वेचैवबहुपुत्रायद्वेचैवां
गिरसेतथा॥द्वेकृशाश्वायविदुषेतासांनामानिमेशृणु॥९॥अरुंधतीवसुर्जामीलंबाभानुर्मरुत्वती॥संकल्पाचमु
हूर्त्ताचसंध्याविश्वाचतादश॥१०॥धर्मपत्न्योदशत्वेतास्तास्वपत्यानिमेशृणु॥विश्वेदेवासुविश्वायाःसाध्यासाध्यान्
व्यजायत॥११॥मरुत्वत्यामरुत्वंतोवसोस्तुवसवस्तथा॥भानोस्तुभानवस्तातमुहूर्त्तास्तुमुहूर्त्तजाः॥१२॥लंबायाश्चै

वघोषाद्यानानगवीथीतुजामिजा॥पृथिवीविषयंसर्वमरुधत्याव्यजायत॥१३॥संकल्पायास्तुसर्वात्माजज्ञेसंकल्पएवहि॥ये
त्वनेकवसुप्राणादेवाज्योतिःपुरोगमाः॥१४॥वसवोष्टौसमाख्यातास्तेषांवक्ष्यामिविस्तरं॥आपोध्रुवश्चसोमश्चधरश्चैवा
निलोनलः॥१५॥प्रत्यूषश्चप्रभासश्चवसवोनामभिःस्मृताः॥आपस्यपुत्रावैराजःश्रमःश्रांतोध्वनिस्तथा॥१६॥ध्रुवस्य
पुत्रोभगवान्कालोलोकप्रकालनः॥सोमस्यभगवान्वर्चावर्चस्वीयेनजायते॥१७॥धरस्यपुत्रोद्रविणोहुतहव्यवहस्त
था॥मनोहरायाःशिशिरःप्राणोथरमणस्तथा॥१८॥अनिलस्यशिवाभार्यातस्याःपुत्रःपुरोजवः॥अविज्ञातगतिश्चैवद्वौ
पुत्रावनिलस्यतु॥१९॥अग्निपुत्रःकुमारस्तुशरस्तंबेव्यजायत॥तस्यशाखोविशाखश्चनैगमेयस्यऽपृष्ठजाः॥२०॥
अपत्यंकृत्तिकानांचकार्त्तिकेयइतिस्मृतः॥प्रत्यूषस्यविदुःपुत्रमृषिंनाम्नातुदेवलं॥२१॥द्वौपुत्रौदेवलस्यापिक्षमा
वंतौमनीषिणौ॥बृहस्पतेस्तुभगिनीवरस्त्रीब्रह्मचारिणी॥२२॥योगसिद्धाजगत्कृत्स्नमसक्ताविचरत्युत॥प्रभासस्य
चसाभार्यावसूनामष्टमस्यह॥२३॥विश्वकर्मामहाभागस्तस्यांजज्ञेप्रजापतिः॥कर्त्ताशिल्पसहस्राणित्रिदशानांचवा
र्द्धकिः॥२४॥भूषणानांचसर्वेषांकर्त्ताशिल्पविदांवरः॥यःसर्वेषांविमानानिदेवतानांचकारह॥मनुष्याश्चोपजीवंतिय
स्यशिल्पंमहात्मनः॥अजैकपादहिर्बुध्न्यस्त्वष्टारुद्रश्चवीर्यवान्॥२६॥त्वष्टुश्चाप्यात्मजःपुत्रोविश्वरूपोमहातपाः॥
हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः॥२७॥वृषाकपिश्चशंभुश्चकपर्दीरैवतस्तथा॥मृगव्याधश्चसर्वश्चकपालीचमहा

मुने॥एकादशैतेकथितारुद्रास्त्रिभुवनेश्वराः॥शतंत्वेतत्समाम्नातंरुद्राणाममितौजसां॥२९॥अदितिर्दितिर्दनुश्चैवअ
रिष्टासुरसाखसा॥सुरभिर्विनताचैवताम्राक्रोधवशाइरा॥३०॥कद्रूर्मुनिश्चधर्मज्ञतदपत्यानिमेशृणु॥पूर्वमन्वंतरेश्रे
ष्ठाद्वादशासन्सुरोत्तमाः॥३१॥तुषितानामतेन्योन्यमूचुर्वैवस्वतेंतरे॥उपस्थितेतियशसःचाक्षुषस्यांतरेमनोः॥३२॥
समवायीकृताःसर्वेसमागम्यपरस्परं॥आगच्छतद्रुतंदेवाअदितिंसंप्रविश्यवै॥३३॥मन्वंतरेभविष्यामस्तन्नःश्रेयोभवे
दिति॥एवमुक्त्वातुतेसर्वेचाक्षुषस्यांतरेमनोः॥मारीचात्कश्यपाज्जातास्तेदित्यादक्षकन्यया॥३५॥तत्रविष्णुश्चशक्रश्च
जज्ञातेपुनरेवहि॥अर्यमाचैवधाताचत्वष्टापूषातथैवच॥३६॥विवस्वान्सविताचैवमित्रोवरुणएवच॥अंशोभगश्चाति
तेजाआदित्याद्वादशास्मृताः॥३७॥चाक्षुषस्यांतरेपूर्वमासन्येतुषिताःसुराः॥वैवस्वतेंतरेतेवैआदित्याद्वादशास्मृताः॥
३८॥सप्तविंशतियाःप्रोक्ताःसोमपत्न्योथसुव्रताः॥तासांत्वपत्यान्यभवन्दीप्रयोमिततेजसः॥३९॥अरिष्टनेमिपत्नीना
मपत्यानीहषोडश॥बहुपुत्रस्यविदुषश्चतस्रोविद्युतःस्मृताः॥४०॥प्रत्यंगिरसःश्रेष्ठाऋचोब्रह्मर्षिसंस्तुताः॥कृशाश्वस्य
चदेवर्षेर्देवप्रहरणाःस्मृताः॥४१॥एतेयुगसहस्रांतेजायंतेपुनरेवहि॥सर्वेदेवगणास्तातत्रयस्त्रिंशत्तुछंदजाः॥४२॥ते
षामपीहसततंनिरोधोत्पत्तिरुच्यते॥यथासूर्यस्यमैत्रेयउदयास्तमयाविह॥४३॥एवंदेवनिकायास्तेसंभवंतियुगेयुगे॥
दितेःपुत्रद्वयंजज्ञेकश्यपादितिनःश्रुतं॥४४॥हिरण्यकशिपुश्चैवहिरण्याक्षश्चदुर्जयः॥सिंहिकाचाभवत्कन्याविप्रचि

त्तेःपरिग्रहः॥४५॥हिरण्यकसिपोपुत्राश्चत्वारःप्रथितोजसः॥अनुह्लादश्चह्लादश्चप्रह्लादश्चैववीर्यवान्॥४६॥संह्लादश्चम
हावीर्यदैत्यवंशविवर्द्धनाः॥तेषांमधेमहाभागःसर्वत्रसमदृग्वशी॥प्रह्लादःपरमांभक्तिंयउवाहजनार्द्दने॥दैत्येंद्रदीपि
तोवन्हिःसर्वांगोपवितोद्विज॥४८॥नददाहचयंवन्हिर्वासुदेवेहृदिस्थिते॥महार्णवांतःसलिलेस्थितस्यचलतोमही॥४९॥
चचालसकलायस्यपाशबद्धस्यधीमतः॥नभिन्नंपतितैःशस्त्रैर्यस्यदैत्येंद्रपातितैः॥५०॥शरीरमद्रिकठिनंसर्वत्राच्यु
ततेजसा॥विषानलोज्वलमुखायस्यदैत्येंद्रचोदिताः॥५१॥नांतायसर्पपतयोबभूवुरुरुतेजसः॥शैलैराक्रांतदेहोपि
संस्मरन्पुरुषोत्तमं॥५२॥नतत्याजात्मनःप्राणान्विष्णुस्मरणदंशितः॥पतंतमुच्चादवनिर्यमुत्पत्यमहामतिं॥५३॥
दधारदैत्यपतिनाक्षिप्तंस्वर्गनिवासिना॥यस्यसंशोषणोवायुर्देहेदैत्येंद्रयोजितः॥५४॥नावापसंक्षयंसद्यश्चित्त
स्थेमधुसूदने॥विषाणभंगमुन्मत्तामदहानिंचदिग्गजाः॥५५॥यस्यवक्षस्थलेप्राप्तादैत्येंद्रपरिनोदिताः॥यस्यचो
त्पादिताकृत्यादैत्यराजपुरोहितैः॥५६॥बभूवनांतायपुरागोविंदासक्तचेतसः॥शंबरस्यचमायानांसहस्रमतिमा
यिनः॥५७॥यस्मिन्प्रयुक्तंचेणकृष्णस्यवितथीकृतं॥दैत्येंद्रसूदोपहृतंयत्तुहालाहलंविषं॥५८॥जरयामाससमतिमा
नविकारममत्सरी॥समचेताजगत्यस्मिन्यःसर्वेष्वेवजंतुषु॥५९॥यथात्मनितथापत्येपरमैत्रगुणान्वितः॥धर्मा
त्मासत्यशौचादिगुणानामाकरःपुरः॥६०॥उपमानमशेषाणांसाधूनांयःसदाभवत्॥६१॥ ॥इतिविष्णुपुराणेप्रथ

मेंशेपंचदशोध्यायः॥मैत्रेयउवा॥ ॥कथितोभवतावंशोमानवानांमहामुने॥कारणंचास्यजगतोविष्णुरेवसनातनः॥१॥
यत्वेतद्भगवानाहप्रह्लादंदैत्यसत्तमं॥ददानोहेग्निस्त्रैर्नोश्चक्षुणास्त्याजजीवितं॥२॥जगामवसुधाक्षोभंयत्राब्धिसलि
लेस्थिते॥बंधबद्धोविचलतिविक्षिप्तांगःसमंततः॥३॥शैलैराक्रांतदेहोपिनममारचयःपुरा॥त्वयेवातावमाहात्म्यंकथि
तंतस्यधीमतः॥४॥तस्यप्रभावमतुलंविष्णोर्भक्तिमतोमुने॥श्रोतुमिच्छामियस्यैतच्चरित्रमतितेजसः॥५॥किंनिमित्तम
सौशस्त्रैर्विक्षिप्तोदितिजैर्मुने॥किमर्थंचाब्धिसलिलेविक्षिप्तोधर्मतत्परः॥६॥आक्रांतःपर्वतैःकस्मात्कस्माद्दष्टोमहोर
गैः॥क्षिप्तःकिमद्रिशिखरात्किंवापावकसंचये॥७॥दिग्दंतिनांदंतभूमिंसचकस्मान्निरूपितः॥संशोषणोनिलश्चास्य
प्रयुक्तःकिंमहासुरैः॥८॥कृत्यांचदैत्यगुरवोयुयुजुस्तत्रकिंमुने॥शंबरश्चापिमायानांसहस्रंकिंप्रयुक्तवान्॥९॥हा
लाहलंविषमहोदैत्यसूदैर्महात्मनः॥कस्माद्दत्तंविनाशाययज्जीर्णंतेनधीमता॥एतत्सर्वंमहाभागप्रह्लादस्यमहा
त्मनः॥चरितंश्रोतुमिच्छामिमहन्माहात्म्यसूचकं॥११॥नहिकौतूहलंतत्रदैत्येंद्रैर्नहतोहिसः॥अनन्यमनसोविष्णौ
कःसमर्थोनिपातने॥१२॥तस्मिन्धर्मरतेनित्यंकेशवाराधनोद्यते॥स्ववंशप्रभवैर्दैत्यैःकर्तुंद्वेषोतिदुष्करः॥धर्मा
त्मनिमहाभागेविष्णुभक्तेविमत्सरे॥दैत्येयैःप्रहृतंकस्मात्तन्ममाख्यातुमर्हसि॥१४॥प्रहरंतिमहात्मानोविपक्षे
चापिनेदृशे॥गुणैःसमन्वितेसाधौकिंपुनर्यःस्ववंशजः॥१५॥तदेतत्कथ्यतांसम्यक्विस्तरान्मुनिसत्तम॥दैत्य

श्वरस्यचरितंश्रोतुमिछाम्यशेषतः॥१६॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंऽशेषोडशोध्यायः॥१६॥ श्रीपराशरउ०॥
मैत्रेयश्रूयतांसम्यक्चरितंतस्यधीमतः॥ प्रह्लादस्यसदोदारचरितस्यमहात्मनः॥१॥ दितेःपुत्रोमहावीर्यो
हिरण्यकशिपुःपुरा॥ त्रैलोक्यंवशमानिन्येब्रह्मणोवरदर्पितः॥२॥ इंद्रत्वमकरोदैत्यःसचासीत्सवितास्वयं॥
वायुरग्निरपांनाथःसोमश्चाभवन्महासुरः॥३॥ धनानामधिपःसोभूत्सएवासीत्स्वयंयमः॥ यज्ञभागानशेषांश्चस
स्वयंबुभुजेऽसुरः॥४॥ दिवाःस्वर्गंपरित्यज्यतआसान्मुनिसत्तम॥ विचेरुरवनौसार्वबिभ्राणामानुषींतनुं॥५॥ जि
त्वात्रिभुवनंसर्वंत्रैलोक्यैश्वर्यदीपितः॥ उपगीयमानोगंधर्वैर्बुभुजेविषयान्प्रियान्॥६॥ पानासक्तंमहात्मानंहि
रण्यकशिपुंतदा॥ उपासांचक्रिरेसर्वेसिद्धचारणपन्नगाः॥७॥ अवादयन्जगुश्चान्येजयशब्दंतथापरे॥ दैत्यरा
जस्यपुरतश्चक्रुःसिद्धामुदान्विताः॥८॥ तत्रप्रनृत्ताप्सरसिस्फटिकाभ्रमयेसुरः॥ पपौपानंमुदायुक्तःप्रासादेसु
मनोरमे॥९॥ तस्यपुत्रोमहाभागःप्रह्लादोनामनामतः॥ पपाठबालपाठ्यानिगुरुगेहगतोर्भकः॥१०॥ एकदातु
सधर्मात्माजगामगुरुणासह॥ पानासक्तस्यपुरतःपितुर्दैत्यपतेस्तदा॥११॥ पादप्रणामावनतंतमुत्थाप्यपिता
सुतं॥ हिरण्यकसिपुःप्राहप्रह्लादममितौजसं॥१२॥ हिरण्यकसिपुरु०॥ पठ्यतांभवतावत्ससारभूतंसुभाषितं॥
कालेनेतावतायत्तेसदोद्युक्तेनशिक्षितं॥१३॥ प्रह्लादउ०॥ श्रूयतांतातवक्ष्यामिसारभूतंतवाज्ञया॥ समाहितम

नाभूत्वायन्मेचेतस्यवस्थितं॥१४॥ अनादिमध्यांतमजंअवृद्धिक्षयमच्युतं॥ प्रणतोस्मिजगन्नाथंसर्वकारणकार
णं॥१५॥ श्रीपराशरउ०॥ एतन्निशाम्यदैत्येंद्रःकोपसंरक्तलोचनः॥ विलोक्यतद्गुरुंप्राहलोहिताधरपल्लवः॥१६॥
ब्रह्मबंधाकिमेतत्तेविपक्षस्तुतिसंहितं॥ असारंग्राहितोबालोमामवज्ञायदुर्मते॥१७॥ गुरुरु०॥ दैत्येश्वरनको
पस्यवशमागंतुमर्हसि॥ ममोपदेशजनितंनायंवदतितेसुतः॥१८॥ दैत्यराडु०॥ अनुशास्तोसिकेनेदृक्तातप्र
ह्लादकथ्यतां॥ मयोपदिष्टंतेत्येषप्रब्रवीतिगुरुस्तव॥१९॥ प्रह्लादउ०॥ शास्ताविष्णुरशेषस्यजगतोयोहृदि
स्य स्थितः॥ तमृतेपरमात्मानंतातकःकेनशिक्षिते॥ हिरण्यकशिपुरु०॥ कोयंविष्णुःसुदुर्बुद्धेकिंब्रवीषिपुनःपुनः॥
जगतामीश्वरस्येहपुरतःप्रसभंमम॥२१॥ प्रह्लादउ०॥ नशब्दगोचरेयस्ययोगिध्येयंपरंपदं॥ यतोयश्चस्व
यंविश्वंसविष्णुःपरमेश्वरः॥२२॥ दैत्येश्वरउ०॥ परमेश्वरसंज्ञोज्ञकिमन्योमय्यवस्थिते॥ नवास्तिमर्तुकामस्त्वं
ब्रवीषिपुनःपुनः॥२३॥ प्रह्लादउ०॥ नकेवलंतातममप्रजानांसब्रह्मभूतोभवतश्चविष्णुः॥ धाताविधातापरमेश्वरश्च
प्रसीदकोपंकुरुषेकिमर्थं॥२४॥ हिरण्यकशिपुरु०॥ प्रविष्टःकोस्यहृदयेदुर्बुद्धेरतिपापकृत्॥ येनेदृश्यान्यसाधूनि
वदत्याविष्टमानसः॥२५॥ प्रह्लादउ०॥ नकेवलंमद्धृदयंसविष्णुराक्रम्यलोकानखिलानवस्थितः॥ समांत्वदादींश्चप
तिःसमस्तान्समस्तचेष्टासुयुनक्तिसर्वगः॥२६॥ हिरण्यकशिपुरु०॥ निष्क्राम्यतामयंदुष्टःशास्यतांचगुरोर्गृहे॥

योजितोदुर्मतिःकेनविपक्षवितथस्तुतौ॥२७॥श्रीपराशरउ०॥इत्युक्तेसतदादैत्यैर्नीतोगुरुगृहंपुनः॥जग्राहविद्याम
निशंगुरुशुश्रूषणोद्यतः॥२८॥कालेतीतसुमहतिप्रह्लादमसुरेश्वरः॥समाहूयाब्रवीद्गाथाकाचित्पुत्रकगीयतां॥२९॥
प्रह्लादउ०॥यतःप्रधानपुरुषौयतश्चैतच्चराचरं॥कारणंसकलस्यास्यसनोविष्णुःप्रसीदतु॥हिरण्यकशिपुरु०॥दुरात्मा
वध्यतामेषनानेनार्थोस्तिजीवता॥स्वपक्षहानिकर्तृत्वाद्यःकुलांगारतांगतः॥श्रीपराशरउ०॥इत्याज्ञप्तेततस्तेनप्रगृही
तमहायुधाः॥उद्यतास्तस्यनाशायदैत्याःशतसहस्रशः॥३२॥प्रह्लादउ०॥विष्णुःशस्त्रेषुयुष्मासुमयिचासौयथास्थितः॥
दैतेयास्तेनसत्येनमाक्रमंत्वायुधानिमे॥३३॥श्रीपराशरउ०॥ततस्तैःशतशोदैत्यैःशस्त्रौघैराहतोपिसन्॥नावापवेद
नामत्वल्पामभ्यच्चैवपुनर्नवः॥३४॥हिरण्यकशिपुरु०॥दुर्बुद्धेविनिवर्त्तस्ववैरपक्षस्तवादतः॥अभयंतेप्रयच्छामिमावि
मूढमतिर्भव॥प्रह्लादउवा॥भयंभयानामपहारिणिस्थितेमनस्यनंतेममकुत्रतिष्ठति॥यस्मिन्स्मृतेजन्मजरांतका
दिभयानिसर्वाण्यपयांतितात॥हिरण्यकशिपुरु०॥भोभोसर्पादुराचारमेनमत्यंतदुर्मतिं॥विषज्वालाविलैर्वक्त्रैःस
द्योनयतसंक्षयं॥३७॥श्रीपराशरउ०॥इत्युक्तास्तेनतेसर्प्पाःकुहकस्तक्षकोंधकः॥अदशंतसमस्तेषुगात्रेष्वतिवि
षोल्बणाः॥३८॥ससक्तमतिःकृष्णेदश्यमानोमहोरगैः॥नविवेदात्मनोयोगात्दयेषुकंपः॥३९॥नास्यत्वचःस्वल्पमपीह
भिन्नंप्रशाधिदैत्येश्वरकार्यमन्यत्॥४०॥हिरण्यकशिपुरु०॥हेदिग्गजाःसंकटदंतमिश्राघ्नतेनमस्मद्रिपुपक्षभिन्नं॥

तज्जाविनाशायभवंतितस्ययथारणेःप्रज्वलितोहुताशः॥४१॥श्रीपराशरउ०॥सततःसदिग्गजैर्बालोभूभृच्छिखरसन्नि
भैः॥पातितोधरणीपृष्ठेविषाणैःसमपीड्यत॥४२॥स्मरतस्तस्यगोविंदमिभदंताःसहस्रशः॥शीर्णावक्षस्थलंप्राप्यस
प्राहपितरंतदा॥४३॥दंतागजानांकुलिशाग्रनिष्ठुराःशीर्णायदेतेनबलंममैतत्॥महाविपत्यर्त्तिविनाशनोयंजनार्दनानु
स्मरणानुभावः॥४४॥हिरण्यकशिपुरु०॥ज्वाल्यतामसुरावन्हिरपसर्पतुदिग्गजाः॥वायोसामेधयाग्निंत्वंदह्यतामेषपाप
कृत्॥श्रीपराशरउ०॥महाकष्टचयच्छन्नमसुरेंद्रसुतंतदा॥प्रज्वाल्यदानवावन्हिंप्रददृःस्वामिनोदिताः॥४६॥प्रह्लादउ०॥
तातैषवन्हिःपवनेरितोपिमांनोदहत्यत्रसमंततोहं॥पश्यामिपद्मास्तरणास्तृतानिशीतानिसर्वाणिदिशांमुखानि॥४७॥
अथदैत्येश्वरंप्रोचुर्भार्गवस्यात्मजाद्विजाः॥पुरोहितामहात्मानःसाम्नासंस्तूयवाग्मिनः॥४८॥राजन्नियम्यतांकोपोबाले
त्रतनयेनिजे॥कोपोदेवनिकायेषुतन्नतेसफलोयतः॥४९॥तथातथैनंबालंतेशासितारोवयंनृप॥यथाविपक्षनाश
यविनीतस्तेभविष्यति॥५०॥बालत्वंसर्वदोषाणांदैत्यराजास्पदंयतः॥अतोत्रकोपमत्यर्थंयोक्तुमर्हसिनार्भके॥५१॥
नत्यजतिहरेःपक्षमस्माकंवचनाद्यदि॥ततःकृत्यांवधायास्यकरिष्यामोनिवर्तिनीं॥५२॥श्रीपराशरउ०॥एवमभ्यर्थित
स्तैस्तुदैत्यराजपुरोहितैः॥दैत्यैर्निष्क्रामयामासपुत्रंपावकसंचयात्॥५३॥ततोगुरुगृहेबालःवसन्संबालदानवा
न्॥अध्यापयामासमुहुरुपदेशांतरेगुरोः॥५४॥श्रूयतांपरमार्थोमेदैतेयादितिजात्मजाः॥नचान्यथैतन्मंतव्यंना

त्रलोभादिकारणं॥५५॥ जन्मबाल्येततःसर्वोजंतुःप्राप्नोतियौवनं॥ अव्याहतैवभवतिततोनुदिवसंजरा॥५६॥ ततश्चम
रणमभ्येतिजंतुर्दैत्येश्वरात्मजाः॥ प्रत्यक्षंदृश्यमेवैतदस्माकंभवतांतथा॥५७॥ मृतस्यचपुनर्जन्मभवत्येतच्चनान्यथा॥
आगमोयंतथायच्चनोपादानेविनोद्भवः॥ गर्भवासादियावत्तुपुनर्जन्मोपपादनं॥ समस्तावस्थकंतावद्दुःखमेवावगम्यतां
॥५९॥ क्षुत्तृष्णोपशमंतेनाच्छीताद्युपशमंसुखं॥ मन्यतेबालबुद्धित्वाद्दुःखमेवहितत्पुनः॥६०॥ अत्यंतस्तिमितांगानांव्या
यामेनसुखैषिणां॥ भ्रांतिज्ञानावृताक्षाणांप्रहारोपिसुखायते॥६१॥ क्वशरीरमशेषाणांश्लेष्मादीनांमहाचयः॥ क्वकांति
शोभासौरभ्यकमनीयादयोगुणाः॥६२॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ॥ देहेचेत्प्रीतिमान्मूढोभविता
नरकेपिसः॥६३॥ अग्नेःशीतेनतोयस्यतृषाभक्तस्यचक्षुधा॥ क्रियतेसुखकर्तृत्वंतद्विलोमस्यचेतरैः॥६४॥ करोति
हेदैत्यसुतायावन्मात्रंपरिग्रहं॥ तावन्मात्रंसएवास्यदुःखंचेतसियच्छति॥६५॥ यावतःकुरुतेजंतुःसंबंधान्मनसःप्रिया
न्॥ तावंतोस्यनिखन्यंतेहृदयेशोकशंकवः॥६६॥ यद्यद्गृहेतन्मनसियत्रतत्रावतिष्ठतः॥ नाशदाहोपकरणंकुतस्तत्रै
वतिष्ठतः॥६७॥ जन्मन्यत्रमहद्दुःखंम्रियमाणस्यचापितत्॥ यातनासुयमस्योग्रंगर्भसंक्रमणेषुच॥६८॥ गर्भेपिसुख
लेशोस्यापिभवद्भिरनुमीयते॥ यदितत्कथ्यतामेवंसर्वंदुःखमयंजगत्॥६९॥ नदेवमतिदुःखानामस्पदेवभवार्णवे॥ भ
वतांकथ्यतेसत्यंविष्णुरेकंपरायणं॥७०॥ माजानीतवयंबालादेहीदेहेषुशाश्वतः॥ जरायौवनजन्माद्याधर्मादेहस्यनात्म

नः॥ बालोहंतावदिच्छातोयतिष्येश्रेयसेयुवा॥ युवाहंवार्द्धकेप्राप्तेकरिष्याम्यात्मनोहितं॥७२॥ वृद्धोहंममकार्याणिसमस्ता
निनगोचरे॥ किंकरिष्यामिमंदात्मासमर्थेननयत्कृतं॥७३॥ एवंदुराशयाक्षिप्तमानसःपुरुषःसदा॥ श्रेयसोभिमुखंया
तिनकदाचित्पिपासितः॥७४॥ बाल्येक्रीडनकासक्तायौवनेविषयोन्मुखाः॥ अज्ञानयंत्यशक्त्याचवार्द्धक्यंसमुपस्थितं॥
॥७५॥ तस्माद्बाल्येविवेकात्मायतेतश्रेयसेसदा॥ बाल्ययौवनवृद्धाद्यैर्देहभावैरसंगतः॥७६॥ तदेतद्वोमयाख्यातंय
दिजानीतनानृतं॥ तदस्मत्प्रीतयेविष्णुःस्मर्यतांबंधमुक्तिदः॥७७॥ आयासःस्मरणेकोस्यस्मृतोयच्छतिशोभनं॥ पापा
क्षयश्चभवतिस्मरतांतमहर्निशं॥७८॥ सर्वभूतस्थितेतस्मिन्मतिर्मैत्रीदिवानिशं॥ भवतांजायतामेवंसर्वक्लेशान्प्रहा
स्यथ॥७९॥ तापत्रयेणाभिहतंयदेतदखिलंजगत्॥ तदाशोच्येषुभूतेषुद्वेषंप्राज्ञःकरोतिकः॥ अथभद्राणिभूतानिहीन
शक्तिरहंपरं॥ मुदंतथापिकुर्वीतहानिर्द्वेषफलंयतः॥८१॥ बद्धवैराणिभूतानिद्वेषंकुर्वंतिचेत्ततः॥ शोच्यान्यहोतिमोहेन
व्याप्तानीतिमनीषिणां॥८२॥ एतेभिन्नदृशांदैत्याविकल्पाःकथितामया॥ कृत्वाभ्युपगमंतत्रसंक्षेपःश्रूयतांमम॥८३॥
विस्तारःसर्वभूतस्यविष्णोःसर्वमिदंजगत्॥ द्रष्टव्यमात्मवत्तस्मादभेदेनविचक्षणैः॥८४॥ समुत्सृज्यासुरंभावंतस्माद्यूयं
यथावयं॥ तथायत्नंकरिष्यामोयथाप्राप्स्यामनिर्वृतिं॥ यानाग्निनानचार्केणनेंदुनानचवायुना॥ पर्जन्यवरुणाभ्यां
वानसिद्धैर्नचराक्षसैः॥८६॥ नयक्षैर्नचदैत्येंद्रैर्नोरगैर्नचकिन्नरैः॥ नमनुष्यैर्नपशुभिर्दोषैर्नैवात्मसंभवैः॥८७॥ ज्वरा

वि०पु० ३७

क्षिरोगातिसारप्लीहगुल्मादिकैस्तथा॥द्वेषेर्ष्यामत्सराद्यैरागलोभादिभिःक्षयं॥८॥नचान्यैर्नीयतेकैश्चिन्नित्यमत्यंतनि
र्मला॥तामाप्नोत्यमलान्यस्यकेशवेहृदयेनरः॥९॥असारसंसारविवर्त्तनेषु॥मायाततोषंप्रसभंब्रवीमि॥सर्वत्रदैत्याः
समतामुपेतसमत्वमाराधनमच्युतस्य॥१०॥तस्मिन्प्रसन्नेकिमिहास्त्यलभ्यंधर्मार्थकामैरलमल्पकास्ते॥समाश्रि
ताद्ब्रह्मतरोरनंतान्निःसंशयंप्राप्स्यथवैमहत्फलं॥११॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंशेसप्तदशमोध्यायः॥१७॥श्रीपरा
शरउ०॥तस्यैतांदानवाश्चेष्टांदृष्ट्वादैत्यपतेर्भयात्॥आचचक्षुःसवोवाचसूदानाहूयसत्वरं॥हिरण्यकशिपुरु०॥हेसू
दाममित्रोसावान्यषामपिदुर्मति॥कुमार्गदेशकोदुष्टोहन्यतामविलंबितं॥२॥हालाहलंविषंतस्यसर्वभक्ष्येषुदीयतां॥
अविज्ञातमसौपापोवध्यतांमाविचार्यतां॥३॥श्रीपराशरउ०॥तेतथैवततश्चक्रुःप्रह्लादायमहात्मने॥विषदानंयथाज्ञप्तं
पित्रातस्यमहात्मनः॥४॥हालाहलंविषंघोरमनंतोच्चारणेनसः॥अभिमंत्र्यसहान्नेनमैत्रेयबुभुजेतदा॥५॥अविकारंस
तद्भुक्त्वाप्रह्लादःस्वस्थमानसः॥अनंताख्यातिनिर्वीर्यंजरयामासदुर्विषं॥६॥ततःसूदाभयत्रस्ताजीर्णंदृष्ट्वामहाविषं॥दै
त्येश्वरमुपागम्यप्रणिपत्येदमब्रुवीत्॥७॥सूदाऊचुः॥दैत्यराजविषंदत्तमस्माभिरतिभीषणं॥जीर्णंतच्चसहान्नेनप्रह्ला
देनसुतेनते॥हिरण्यकशिपुरु०॥त्वर्यतांत्वर्यतांसद्योहेहेदैत्यपुरोहिताः॥कृत्यांतस्यविनाशाययउत्पादयततमाचिरं॥९॥
पराशरउ०॥सकाशमागम्यततःप्रह्लादस्यपुरोहिताः॥सामपूर्वंप्रवोचुस्तेप्रह्लादंविनयान्वितं॥१०॥पुरोहिताऊचुः॥

प्र० ३७

जातस्त्रैलोक्यविख्यातेआयुष्मन्ब्रह्मणःकुले॥दैत्यराजस्यतनयोहिरण्यकशिपोर्भवान्॥११॥किंदेवैःकिमनंतेनकि
मन्येनतवाश्रयः॥पितासमस्तलोकानांत्वंतस्यैवभविष्यसि॥१२॥तस्मात्परित्यजैनांत्वंविपक्षस्तवसंहितां॥वाचंपिता
समस्तानांगुरूणांपरमोगुरुः॥१३॥प्रह्लादउ०॥एवमेतन्महाभागाःश्लाघ्यमेतन्महत्कुलं॥मरीचेसकलेप्यस्मिंस्त्रैलोक्ये
नान्यथावदेत्॥१४॥पिताचममसर्वस्मिन्जगत्युत्कृष्टचेष्टितः॥एतदप्यवगच्छामिसत्यमत्रापिनानृतं॥गुरूणामपिसर्वेषां
पितामेपरमोगुरुः॥यदुक्तंभ्रांतिरत्रापिस्वल्पाहिपिनविद्यते॥१६॥पितागुरुर्नसंदेहःपूजनीयःप्रयत्नतः॥तत्रापिनाप
राध्यामीत्येवंमनसिसंस्थितं॥१७॥यत्त्वेतत्किमनंतेनेत्युक्तंयुष्माभिरीदृशं॥कोब्रवीतियथायुक्तंकिंतुनैतद्वचोर्थवत्
॥१८॥इत्युक्त्वासोभवन्मौनीतेषांगौरवयंत्रितः॥प्रहस्यचपुनःप्राहकिमनंतेनसाध्विति॥१९॥साधुभोःकिमनंतेनसाधु
भोगुरवोमम॥श्रूयतांयदनंतेनयदिखेदंनयास्यथ॥२०॥धर्मार्थकाममोक्षाख्यःपुरुषार्थउदाहृतः॥चतुष्टयमिदंय
स्मात्तस्मात्किंकिमिदंवृथा॥२१॥मरीचिमिश्रैर्दक्षेणतथैवान्यैरनंततः॥धर्मःप्राप्तस्तथैवान्यैरर्थःकामस्तथापरैः॥२२॥
तत्तत्ववेदिनोभूत्वाज्ञानध्यानसमाधिभिः॥अवापुर्मुक्तिमपरेपुरुषाध्वस्तबंधनाः॥२३॥संपदैश्वर्यमाहात्म्यज्ञान
संततिकर्मणां॥मुक्तेश्चैकतयालभ्यंमूलमाराधनेहरेः॥२४॥योगधर्मार्थकामाख्यंविमुक्तिश्चफलंद्विजाः॥तेनापिकिं
किमित्येवमनंतेनविमुच्यते॥२५॥किंचात्रबहुनोक्तेनभवंतोगुरवोमम॥वदंतिसाधुवासाधुविवेकोस्माकमल्पकः॥२६॥

पुरोहिताऊचुः॥दह्यमानस्त्वमस्माभिरग्निनाबालरक्षितः॥भूयोनवक्ष्यसीत्येवंनैवंज्ञातोस्यबुद्धिमान्॥२७॥यद्यस्मद्वच
नान्मोहग्राहंनत्यजतेभवान्॥ततःकृत्यांविनाशायतवस्रक्ष्यामदुर्मते॥२८॥प्रह्लादउ०॥कःकेनरक्ष्यतेजंतुःकःकेनहन्यते॥
हंतिरक्षतिवैवात्माअसत्साधुसमाचरन्॥२९॥श्रीपराशरउ०॥इत्युक्तास्तेनतेक्रुद्धादैत्यराजपुरोहिताः॥कृत्यामुत्पादया
मासुर्ज्वालामालोज्ज्वलाकृतिं॥३०॥सातिभीमासमागम्यपदन्यासक्षतक्षितिः॥शूलेनसाधुसंक्रुद्धातंजघानाथवक्षसि॥
३१॥ततस्यहृदयंप्राप्यशूलंबालस्यदीप्तिमत्॥जगामखंडितंभूमौतत्रापिशतधाभवत्॥३२॥यत्रानपायीभगवान्हृ
द्यास्तेहरिरीश्वरः॥भंगोभवतिवज्रस्यतत्रशूलस्यकाकथा॥३३॥निःपापेपातितादैत्ययाजकैः॥तानेवसाजघानाशुकृ
त्यानाशंजगामच॥३४॥कृत्ययाहन्यमानांस्तान्विलोक्यसमहामतिः॥त्राहिकृष्णेत्यनंतेतिवदन्नभ्यपपद्यत॥सर्वव्या
पिन्जगद्रूपसर्वस्रष्टजनार्दन॥त्राहिविप्रानिमानस्माद्दुःसहान्मंत्रपावकात्॥३६॥यथासर्वेषुभूतेषुसर्वव्यापीजग
द्गुरुः॥विष्णुरेवतथासर्वेजीवंत्वतेपुरोहिताः॥३७॥यथासर्वगतंविष्णुंमन्यमानोनपातकं॥चिंतयाम्यरिपक्षेपिजीवंत्वे
तेतथाद्विजाः॥येहंतुमागतादत्तंयैर्विषंयैर्हुताशनः॥यैर्दिग्गजैरहंक्षिप्तोदष्टःसर्पैश्चयैरहं॥तेष्वहंमित्रपक्षेपिसमः
पापोस्मिनक्वचित्॥यथातेनाद्यसत्येनजीवंत्वसुरयाजकाः॥श्रीपराशरउ०॥इत्युक्तास्तेनतेसर्वेसंस्पृष्टाश्चनिराम प्र०
याः॥समुत्तस्थुर्द्विजाभूयस्तंप्रोचुःप्रश्रयानतं॥४१॥पुरोहिताऊचुः॥दीर्घायुरप्रतिहतोबलवीर्यसमन्वितः॥पुत्र ३८

पौत्रधनैश्वर्यैर्युक्तोवत्सभवोत्तमः॥४२॥इत्युक्त्वातंततोगत्वायथावृत्तंपुरोहिताः॥दैत्यराजायसकलमाचचक्षुर्महामुने॥४३॥
॥इतिश्रीविष्णुपुराणेप्रथमेंशेअष्टादशोध्यायः॥छ॥श्रीपराशरउ०॥हष्ट्वातांकृत्यांवितथीकृतां॥आहूयपुत्रंपप्रच्छप्र
भावस्यास्यकारणं॥१॥हिरण्यकशिपुरु०॥प्रह्लादसुप्रभावोसिकिमेतत्तेविचेष्टितं॥एतन्मंत्रादिजनितमुताहोसहजंतव॥
२॥पराशरउ०॥एवंपृष्टस्तदापित्राप्रह्लादोसुरबालकः॥प्रणिपत्यपितुःपादाविदंवचनमब्रवीत्॥३॥नमंत्रादिकृ
तस्तातनचनैसर्गिकोमम॥प्रभावएषसामान्योयस्ययस्याच्युतोहृदि॥४॥अन्येषांयोनपापानिचिंतयत्यात्मनो
यथा॥तस्यपापागमस्तातहेत्वभावान्नविद्यते॥५॥कर्मणामनसावाचापरपीडांकरोतियः॥तद्बीजंजन्मफलतिप्रभूतं
तस्यचाशुभं॥६॥सोहंनपापमिच्छामिनकरोमिवदामिवा॥चिंतयन्सर्वभूतस्थमात्मन्यपिचकेश॥शारीरंमनसा वं
दुःखदेवंभूतंभवंतथा॥सर्वत्रशुभचित्तस्यमेजायतेकुतः॥८॥एवंसर्वेषुभूतेषुभक्तिरव्यभिचारिणी॥कर्त्तव्यापंडि
तैर्ज्ञात्वासर्वभूतमयंहरिं॥९॥श्रीपराशरउ०॥इतिश्रुत्वासदैत्येंद्रःप्रासादशिखरस्थितः॥क्रोधांधकारितमुखःप्राह
दैत्येंद्रकिंकरान्॥१०॥दुरात्माक्षिप्यतामस्मात्प्रासादाच्छतयोजनात्॥गिरिपृष्ठेपतत्वस्मिन्शिलाभिन्नास्थिसंहतिः॥
॥११॥ततस्तंचिक्षिपुःसर्वेबालंदैतेयकिंकराः॥पपातसोप्यधःक्षिप्तोहृदयेनोद्वहन्हरिं॥१२॥पतमानंजगद्धात्रीज
गद्धातरिकेशवे॥भक्तियुक्तंदधारैनमुपसंगम्यमेदिनी॥१३॥ततोविलोक्यतंस्वस्थमविशीर्णास्थिबंधनं॥हिरण्य

कशिपुःआहशांबरंमायिनांवरं॥१४॥हिरण्यकशिपुरु०॥नास्माभिःशक्यतेहंतुमयंदुर्वृत्तबालकः॥मायांवेत्तिभवांस्त
स्मात्मायथैनंनिषूदय॥शांबरु०॥सूदयाम्येषदैत्येंद्रपश्यमायाबलंमम॥सहस्रमत्रमायानांपश्यकोटिशतंतथा
॥१६॥पराशरउ०॥ततःससृजतेमायाःप्रह्लादेशांबरासुरः॥विनाशमिच्छन्दुर्बुद्धिःसर्वत्रसमदर्शिनि॥१७॥समाहितम
नाभूत्वाशांबरेपिविमत्सरः॥मैत्रेयसोपिप्रह्लादःसस्मारमधुसूदनं॥१८॥ततोभगवतातस्यरक्षार्थंचक्रमुत्तमं॥आ
जगामसमाज्ञप्तंज्वालामालिसुदर्शनं॥१९॥तेनमायासहस्रंतुशांबरस्याशुगामिना॥बालस्यरक्षतादेहमेकैक
स्येनसूदितं॥२०॥संशोषकंततोवायुंदैत्येंद्रइदमब्रवीत्॥शीघ्रमेवममादेशात्दुरात्मानीयतांक्षयं॥२१॥तथेत्युक्त्वा
चसोप्येनंविवेशपवनोलघुः॥शीतोतिरूक्षःशोषायतद्देहस्यातिदुस्सहः॥तेनाविष्टंतथात्मानंसबुद्ध्वादैत्यबालकः॥
हृदयेनमहात्मानंदधारधरणीधरं॥२३॥हृदयस्थस्ततस्तस्यतंवायुमतिशोषणं॥पपौजनार्दनःक्रुद्धःसययौपव
नःक्षयं॥२४॥क्षीणासुसर्वमायासुपवनेसंक्षयंगते॥जगामसोपिभवनंगुरोरेवमहामतिः॥२५॥अहन्यहन्यथा
चार्योनीतिंराज्यफलप्रदां॥ग्राहयामासतंबालंराज्ञामुशनसाकृतां॥२६॥गृहीतनीतिशास्त्रंतंविनीतंसयदागुरुः॥
मेनेतदैनंतत्पित्रेकथयामासशिक्षितं॥२७॥आचार्यउवाच॥गृहीतनीतिशास्त्रस्तेपुत्रोदैत्यपतेकृतः॥प्रह्लादस्त
त्वतोवेत्तिभार्गवेणयदीरितं॥२८॥हिरण्यकशिपुरु०॥मित्रेषुवर्त्तेतकथमरिवर्गेचभूपतिः॥प्रह्लादत्रिषुलोकेषुमध्य

स्थेषुकथंचरेत्॥कथंमंत्रिष्वमात्येषुबाह्येष्वाभ्यंतरेषुच॥चारेषुपौरवर्गेषुशंकितेष्वितरेषुच॥कृत्याकृत्यविधानंचदुर्गाट
विकसाधनं॥३०॥प्रह्लादकथ्यतांसम्यक्तथाकंटकशोधनं॥३१॥एतच्चान्यच्चसततमधीतंभवतायथा॥तथामेकथ्यतां
ज्ञातुंतवेच्छामिमनोगतं॥३२॥पराशरउ०॥प्रणिपत्यपितुःपादौतथाप्रश्रयभूषणः॥प्रह्लादःप्राहदैत्येंद्रंकृतांजलिपु
टस्थितः॥३३॥प्रह्लादउ०॥ममोपदिष्टंसकलंगुरुणानात्रसंशयः॥गृहीतंचमयाकिंतुनसदेतन्मतंमम॥३४॥सामचोपप्र
दानंचभेददंडौतथापरौ॥उपायाःकथिताह्येतेमित्रादीनांचसाधके॥३५॥तानेवाहंनपश्यामिमित्रादींस्तातमाक्रुध॥सा
ध्यभावेमहाबाहोसाधनैःकिंप्रयोजनं॥३६॥सर्वभूतात्मकेतातजगन्नाथेजगन्मये॥परमात्मनिगोविंदेमित्रामित्रकथा
कुतः॥३७॥त्वय्यस्तिभगवान्विष्णुर्मयिचास्तिसः॥यतस्ततोयंमित्रंमेशत्रुश्चेतिपृथक्कुतः॥३८॥तदेभिरलमत्यर्थंदुष्टा
रंभोक्तिविस्तरैः॥अविद्यांतर्गतैर्यत्नःकर्त्तव्यस्तातशोभने॥३९॥विद्याबुद्धिरविद्यायामज्ञानात्तातजायते॥बालोग्निंकिं
तुखद्योतमसुरेश्वरमन्यते॥४०॥तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये॥आयासायापरंकर्मविद्यान्याशिल्पनैपुणं॥
॥४१॥तदेतदवगम्याहमसारंसाध्यमुत्तमं॥निशामयमहाभागप्रणिपत्यब्रवीमियत्॥४२॥नचिंतयतिकोराज्यंकोधनं
नाभिवांछति॥तथापिभाव्यमेवैतदुभयंप्राप्यतेनरैः॥४३॥सर्वएवमहाबाहोमहत्त्वंप्रतिसाद्यमः॥तथापिपुंसांभाग्यानि
नोद्यमाभूतिहेतवः॥४४॥जडानामविवेकानामशूराणामपिप्रभो॥भाग्यभोज्यानिराज्यानिसंतिनीतिमतामपि॥४५॥त

विं॰पु
४०

स्मायतेतनपुण्येषुयदीछेमयहतीश्रियं॥यतितव्यंसमत्वेचनिर्वाणमपिचेछता॥४६॥देवामनुष्याःपशवःपक्षिवृक्षसरी
सृपाः॥रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितं॥४७॥एतद्विजानतासर्वंजगत्स्थावरजंगमं॥द्रष्टव्यमात्मवद्विष्णुर्यतोयंवि
श्वरूपधृक्॥४८॥एवंज्ञातेसभगवाननादिःपरमेश्वरः॥प्रसीदत्यच्युतस्तस्मिन्प्रसन्नेक्लेशसंक्षयः॥४९॥पराशरउ०॥स
एतछ्रुत्वातुकोपेनसमुत्थायवरासनात्॥हिरण्यकशिपुःपुत्रंपदावक्षस्यताडयत्॥५०॥उवाचचसकोपेनसामर्षः
प्रज्वलन्निव॥निष्पिष्यपाणिनापाणिंहंतुकामोजगद्यथा॥५१॥हेविप्रचित्तेहेराहोहेवलेषमहार्णवे॥नागपाशैर्दृढं
वध्वाक्षिप्यतांमाविलंबत॥५२॥अथान्येसकलालोकस्तथादैत्येयदानवाः॥अनुयास्यंतिमूढस्यमतमस्यदुरात्मनः॥
॥५३॥बहुशोवारितोस्माभिरयंपापस्तथाप्यरेः॥स्तुतिंकरोतिदुष्टानांवधएवोपकारकः॥५४॥श्रीपराशरउ०॥ततस्ते
सत्वरादैत्याबध्वातंनागबंधनैः॥भर्तुराज्ञांपुरस्कृत्यविक्षिपुःसलिलार्णवे॥५५॥ततश्चचालचलताप्रह्लादेनमहार्ण
वः॥उद्वेलोभूत्परंक्षोभमुपेत्यचसमंततः॥५६॥भूर्लोकमखिलंदृष्ट्वाप्लाव्यमानंमहांभसा॥हिरण्यकशिपुर्दैत्यानिद
माहमहामुने॥५७॥दैत्येयाःसकलैःशैलैरत्रैववरुणालये॥निश्छिद्रैःसर्वतःसर्वैश्चीयतामेषदुर्मतिः॥५८॥नाग्निर्द
हतिनैवायंशस्त्रैःछिन्नोनचोरगैः॥क्षयंनीतोनवातेननविषेणनकृत्यया॥५९॥नमायाभिर्नचैवोच्चात्पातितोनैव
दिग्गजैः॥बालोपिदुष्टचित्तोयंनानेनार्थोस्तिजीवता॥तदेषतोयधावत्रसंचितोगोमहीधरैः॥तिष्ठत्वब्दसहस्रांतं

प्र॰
४०

प्राणात्हास्यतिदुर्मतिः॥६१॥ततोदैत्यादानवाश्चपर्वतैस्तंमहोदधौ॥आक्रम्यचयनंचक्रुर्योजनानिसहस्रशः॥६२॥
संचितःपर्वतैरंतःसमुद्रस्यमहामतिः॥तुष्टाववाभिवेलयामेकाग्रमतिरच्युतं॥६३॥प्रह्लादउ०॥नमस्तेपुंडरीकाक्षनमस्ते
पुरुषोत्तम॥नमस्तेसर्वलोकात्मन्नमस्तेतिग्मचक्रिणे॥६४॥नमोब्रह्मण्यदेवायगोब्राह्मणहितायच॥जगद्धितायकृष्णाय
गोविंदायनमोनमः॥६५॥ब्रह्मत्वेसृजतेविश्वंस्थितौपालयितेनमः॥रुद्ररूपायकल्पांतेनमस्तुभ्यंत्रिमूर्तये॥६६॥देवायक्षासु
राःसिद्धानागागंधर्वकिन्नराः॥पिशाचाराक्षसाश्चैवमनुष्याःपशवस्तथा॥६७॥पक्षिणःस्थावराश्चैवपिपीलिकसरीसृपाः॥
भूम्यापोग्निर्नभोवायुःशब्दस्पर्शस्तथारसः॥६८॥रूपंगंधोमनोबुद्धिरात्माकालस्तथागुणाः॥एतेषांपरम स्तुसर्वमेतत्व
मच्युत॥६९॥विद्याविद्येभवान्सत्यमसत्यंचविषामृते॥प्रवृत्तंचनिवृत्तंचकर्मवेदोदितंभवान्॥७०॥समस्तकर्मणांभोक्ता
कर्मोपकरणानिच॥त्वमेवविष्णोसर्वात्मन्सर्वकर्मफलंचयत्॥७१॥मनत्रतथाशेषभूतेषुभुवनेषुच॥तवैवव्याप्तिरैश्वर्य
गुणसंसूचकीप्रभो॥७२॥त्वांयोगिनश्चिंतयंतित्वांजयंतिचयज्विनः॥हव्यकव्यभुगेकस्त्वंपितृदेवस्वरूपधृक्॥७३॥
रूपंमहत्तेस्थितमत्रविश्वंततश्चसूक्ष्मंजगदेतदीश॥रूपाणिसूक्ष्माणिचभूतभेदास्तेषांतरात्मात्वमतीवसूक्ष्मः॥७४॥
तस्माच्चसूक्ष्मादिविशेषणानामगोचरेयत्परमात्मरूपे॥किमप्यचिंत्यंतवरूपमस्तितस्मैनमस्तेपुरुषोत्तमाय॥७५॥
सर्वभूतेषुभूतात्मन्याशक्तिरपरातव॥गुणाश्रयानमस्तेस्यैशाश्वतायासुरेश्वर॥७६॥यातीतगोचरावाचामनसांचा

BHAU DAJI

विशेषणा॥ज्ञानिज्ञानपरिछेद्यातांवंदेचेश्वरींपरां॥७७॥ॐनमोवासुदेवायतस्मैभगवतेसदा॥व्यतिरिक्तंनयस्यास्तिव्यति
रिक्तोखिलाच्चयः॥७८॥नमस्तस्मैनमस्तस्मैनमस्तस्मैनमोनमः॥नामरूपंनयस्यैकोयोस्तित्वेनोपलभ्यते॥७९॥यस्या
वताररूपाणिसमर्चंतिदिवौकसः॥अपश्यंतःपरंरूपंनमस्तस्मैपरात्मने॥८०॥योंतस्तिष्ठन्नशेषस्यपश्यतीशःशुभा
शुभं॥तंसर्वसाक्षिणंविष्णुंनमस्येपरमेश्वरं॥८१॥नमोस्तुविष्णवेतस्मैयस्याभिन्नमिदंजगत्॥यस्त्वस्यजगतोयोनिःप्र
सीदतुसमेव्ययः॥८२॥यत्रोतमेतत्प्रोतंचविश्वमक्षयमव्ययं॥आधारभूतःसर्वस्यप्रसीदतुसनोहरिः॥ॐनमोविष्णवे
तस्मैनमस्तस्मैपुनःपुनः॥यत्रसर्वंयतःसर्वंयःसर्वंसर्वसंश्रयः॥८४॥सर्वगत्वादनंतस्यसएवाहमवस्थितः॥ततःसर्वमहं
सर्वंमयिसर्वंसनातनः॥अहमेवाक्षयोनित्यःपरमात्माचसंश्रयः॥ब्रह्मसंज्ञोहमेवाग्रेतथाचांतेपरःपुमान्॥॥८६॥छ॥
इतिश्रीविष्णुपुराणेप्रथमेंशेएकोनविंशोध्यायः॥छ॥पराशरउ०॥एवंसंचिंतयन्विष्णुमभेदेनात्मनोद्विज॥तन्मयत्व
मवापग्र्यंमेनेचानंतमच्युतं॥१॥विसस्मारतथात्मानंनान्यत्किंचिदमन्यत॥अहमेवाव्ययोनंतःपरमात्मेत्यचिंतयत्॥
॥२॥तस्यतद्भावनायोगात्क्षीणपापस्यवैक्रमात्॥शुद्धेंतःकरणेविष्णुस्तस्थौज्ञानमयोच्युतः॥३॥योगप्रभावात्प्रह्ला
देजातेविष्णुमयेसुरे॥चलत्युरगबंधैस्तैर्मैत्रेयत्रुटितंक्षणात्॥४॥भ्रांतग्राहगणःसोर्मिर्ययौक्षोभंमहार्णवः॥चचालचो
चमहीसर्वासशैलवनकानना॥५॥सचतंशैलसंघातंदैत्यैर्न्यस्तमथोपरि॥प्रक्षिप्यतस्मात्सलिलान्निश्चक्राममहाम

तिः॥दृष्ट्वाचसजगद्भूयोगगनाद्युपलक्षितं॥प्रह्लादोस्मीतिसस्मारपुनरात्मानमात्मन॥७॥तुष्टावचपुनर्धीमाननादिंपुरुषो
त्तमं॥एकाग्रमतिरव्यग्रोजितवाक्कायमानसः॥८॥प्रह्लादउ०॥ॐनमःपरमार्थार्थस्थूलसूक्ष्मक्षराक्षर॥व्यक्ताव्यक्तकला
तीतसकलेशनिरंजन॥९॥गुणाधारनिर्गुणात्मन्गुणस्थितः॥मूर्त्तामूर्त्तमहामूर्त्तेसूक्ष्ममूर्त्तेस्फुटास्फुट॥१०॥करालरूप
सौम्यात्मन्विद्याविद्यामयाच्युत॥सदसद्रूपसद्रूपसदसद्भावभावन॥११॥नित्यानित्यप्रपंचात्मन्निःप्रपंचामलाश्रय॥एका
नेकनमस्तुभ्यंवासुदेवादिकारण॥१२॥यःस्थूलसूक्ष्मःप्रकटप्रकाशोयःसर्वभूतोनचसर्वभूतः॥विश्वेतदविश्वहेतोर्नमोस्तु
तस्मैपुरुषाय॥श्रीपराशरउ०॥तस्यतच्चेतसोदेवःस्तुतिमित्थंप्रकुर्वतः॥आविर्बभूवभगवानपीतांबरधरोहरिः॥१४॥ससं
भ्रमस्तमालोक्यसमुत्थायाकुलाक्षरं॥नमोस्तुविष्णवेत्येतद्व्याजहारासकृद्द्विज॥१५॥प्रह्लादउ०॥देवप्रपन्नार्त्तिहरप्रसा
दंकुरुकेशव॥अवलोकनदानेनभूयोमांपावयाव्यय॥१६॥श्रीभगवानउ०॥कुर्वतस्तेप्रसन्नोहंभक्तिमव्यभिचारिणीं॥य
थाभिलषितोमत्तःप्रह्लादव्रियतांवरः॥१७॥प्रह्लादउ०॥नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहं॥तेषुतेष्वच्युताभक्तिर
च्युतास्तुसदात्वयि॥१८॥याप्रीतिरविवेकानांविषयेष्वनपायिनी॥त्वामनुस्मरतःसामेहृदयान्मापसर्पतु॥श्रीभगवानउ०॥
मयिभक्तिस्तवास्त्येवभूयोप्येवंभविष्यति॥वरस्त्वमत्तःप्रह्लादव्रियतांयस्तवेप्सितः॥२०॥प्रह्लादउवा०॥मयिद्वेषानुबंधो
भूत्संस्तुतावुद्यतेतव॥मत्पितुस्त्वत्कृतेपापंदेवतस्यप्रणश्यतु॥२१॥शस्त्राणिपातितान्यंगेक्षिप्तोयच्चाग्निसंहतौ॥दंश

तथ्वोरगैर्दत्तंयद्विषंममभोजने॥२२॥बध्वासमुद्रेक्षिप्तोयच्चितोस्मिशिलोच्चयैः॥अन्यानिचाप्यसाधूनियानियानिकृतानि
मे॥२३॥त्वयिभक्तिमतोद्वेषादघंतत्संभवंचयत्॥त्वत्प्रसादात्प्रभोसद्यस्तेनमुच्येतमेपिता॥२४॥श्रीभगवानुउ०॥प्रह्लादसर्वं
मेतत्तेमत्प्रसादाद्भविष्यति॥अन्यंचतेवरंदद्मिव्रियतामसुरात्मज॥२५॥प्रह्लादउ०॥कृतकृत्योस्मिभगवान्वरेणानेनयत्त्वयि
॥भवित्रीत्वत्प्रसादाद्भविष्यति॥ प्रह्लादउवाच॥कृतकृत्योस्मिभगवान्वरेणानेनयत्त्वयि॥भवित्रीत्वत्प्रसादेनभक्तिरव्य
भिचारिणी॥२६॥धर्मार्थकामैःकिंतस्यमुक्तिस्तस्यकरेस्थिता॥समस्तजगतोमूलेयस्यभक्तिःस्थिरात्वयि॥२७॥श्रीभग
वानुउ०॥यथातेनिश्चलंचेतोमयिभक्तिसमन्वितं॥तथात्वंमत्प्रसादेननिर्वाणंपरमाप्स्यसि॥२८॥श्रीपराशरउ०॥इत्यु
क्त्वांतर्दधेविष्णुस्तस्यमैत्रेयपश्यतः॥सचापिपुनरागम्यववंदेचरणौपितुः॥२९॥तंपितामूर्ध्न्युपाघ्रायपरिष्वज्यचपीडितं॥
जीवसीत्याहवत्सेतिबाष्पार्द्रनयनोद्विज॥३०॥प्रीतिमांश्चाभवत्तस्मिन्ननुतापीमहासुरः॥गुरुपित्रोश्चकारैवंशुश्रूषांसो
पिधर्मवित्॥३१॥पितर्युपरतिंनीतेनरसिंहस्वरूपिणा॥विष्णुनासोपिदैत्यानांमैत्रेयाभूत्पतिस्ततः॥ततोराज्यद्युतिंप्राप्यक
र्मशुद्धिकरींद्विज॥बहूंश्चपुत्रपोत्रादीनवापेश्वर्यमेवच॥३३॥क्षीणाधिकारःसतदापुण्यपापविवर्जितः॥तदासौभगवद्ध्या
नात्परंनिर्वाणमाप्तवान्॥३४॥एवंप्रभावोदैत्योसौमैत्रेयासीन्महत्तमः॥प्रह्लादोभगवद्भक्तोयंत्वंमामनुपृच्छसि॥
यस्त्वेतच्चरितंयस्यप्रह्लादचरितेनरः॥शृण्वन्पठन्वामैत्रेयव्यपोहतिनसंशयः॥३६॥पूर्णिमास्याममावास्यामष्ट

म्यामप्यवापठन्॥द्वादश्यांचैतदाप्नोतिश्रीगोप्रदानफलंद्विज॥३७॥प्रह्लादंसकलापत्सुयथारक्षितवान्हरिः॥तथारक्षतिय
स्तस्यशृणोतिचरितंसदा॥३८॥ ॥इतिश्रीविष्णुपुराणेप्रथमेंशेविंशोध्यायः॥श्रीपराशरउ०॥संह्रादपुत्रआयुष्मान्शि
बिर्बाष्कलएवच॥विरोचनस्तुप्राह्लादिर्बलिर्जज्ञेविरोचनात्॥१॥बलेःपुत्रशतंत्वासीद्बाणज्येष्ठंद्विजोत्तम॥हिरण्याक्षसुतां
श्चैवसर्वएवमहाबलाः॥२॥धोधरिःशकुनिश्चैवभूतसंतापनस्तथा॥अयोमुखमहानाभोमहाबाहुःकलनाभस्तथा
परः॥३॥अभवन्दनुपुत्राश्चद्विमूर्द्धाशंकुरस्तथा॥अयोमुखःशंकुशिराःकपिलःशंबरस्तथा॥४॥एकचक्रोमहाबाहु
स्तारकश्चमहाबलः॥स्वर्भानुर्वृषपर्वाचपुलोमाचमहाबलः॥एतेदनोःसुताख्याताविप्रचित्तिश्चवीर्यवान्॥स्वर्भानोःसु
प्रभाकन्याशर्मिष्ठावार्षपर्वणी॥उपदानवीहयशिराःप्रख्यातावरकन्यकाः॥वैश्वानरसुतेचोभेपुलोमाकालिकातथा॥
॥७॥उभेतेतुमहाभागेमरीचेस्तुपरिग्रहः॥ताभ्यांपुत्रसहस्राणिषष्टिर्दानवसत्तमाः॥८॥पौलोमाःकालखंजाश्चमरीचि
तनयाःस्मृताः॥तथापरेमहावीर्यादारुणास्त्वतिनिर्घृणाः॥९॥सिंहिकायामथोत्पन्नाविप्रचित्तेःसुतास्तथा॥व्यंशःशल्य
श्चबलवान्नभश्चैवमहाबलः॥वातापिर्नमुचिश्चैवइल्वलःखसृमस्तथा॥अंतकोनरकश्चैवकालनाभस्तथैवच॥११॥
स्वर्भानुश्चमहावीर्योवक्त्रयोधीमहासुरः॥एतेवैदानवाःश्रेष्ठादनुवंशविवर्द्धनाः॥१२॥एतेषांपुत्रपौत्राश्चशतशोथसह
स्रशः॥अनुह्रादस्यदैत्यस्यनिवातकवचाःकुले॥१३॥समुत्पन्नाःसुमहतातपसाभावितात्मनः॥षट्पुत्र्यःसमहासत्वास्ता

न्वायाःपरिकीर्त्तिताः॥१४॥शुकीश्येनीचभासीचसुग्रीवीशुचिगृध्रिका॥शुकीशुकानजनयदुलूकान्प्रत्युलूककान्॥१५॥
श्येनीश्येनांस्तथाभासान्गृध्रान्वैगृध्रपत्यपि॥शुचिरौदक्यान्पक्षिगणान्सुग्रीवीतुंव्यजायत॥१६॥अश्वानुष्ट्रान्गर्दभां
श्चवंशाःप्रकीर्त्तिताः॥विनतायास्तुपुत्रौद्वौविख्यातौगरुडारुणौ॥७॥सुपर्णःपततांश्रेष्ठोदारुणपन्नगाशनः॥सुरसायाः
सहस्रंतुसर्पाणाममितौजसां॥१८॥अनेकसिरसांब्रह्मन्खेचराणांमहात्मनां॥काद्रवेयाःसुबलिनःसहस्रप्रमितोज
सः॥१९॥सुपर्णवशगागाब्रह्मन्जज्ञिरेनैकमस्तकाः॥तेषांप्रधानभूतास्तेशेषवासुकितक्षकाः॥२०॥शंखःश्वेतोमहापद्मः
कंबलाश्वतरावुभौ॥एलापत्रस्तथानागःकर्कोटकधनंजयौ॥२१॥एतेन्चान्येचबहवोदंदशूकाविषोल्बणाः॥गणंक्रो
धवशंविद्धितेचसर्वेचदंष्ट्रिणः॥२२॥स्थलजाःपक्षिणोब्रह्मन्दारुणाःपिशिताशनाः॥गास्तुवैजनयामाससुरभिर्महि
षीस्तथा॥२३॥अरिष्टातुमहासत्वान्गंधर्वान्समजीजनत्॥एतेकश्यपपदायादाःकीर्त्तिताःस्थाणुजंगमाः॥२४॥तेषां
पुत्राश्चपौत्राश्चशतशोथसहस्रशः॥एषमन्वंतरेसर्गोब्रह्मन्स्वारोचिषेस्मृतः॥२५॥वैवस्वतेतेचमहतिवारुणेवित
तेक्रतौ॥जुह्वानस्यब्रह्मणोवैप्रजासर्गइहोच्यते॥२६॥पूर्वंयत्रतुसप्तर्षीनुत्पन्नान्सप्तमानसान्॥पुत्रत्वेकल्पयामास
स्वयमेवपितामहः॥२७॥गंधर्वभोगिदेवानांदानवानांचसत्तम॥दितिर्विनष्टपुत्रावैतोषयामासकश्यपं॥तयाचारा
धितःसम्यक्कश्यपस्तपतांवरः॥वरेणछंदयामाससाचवव्रेततोवरं॥२९॥पुत्रमिंद्रवधार्थायसमर्थममितोजसं॥सच

तस्यैववरंप्रादाद्भार्यायैमुनिसत्तमः॥३०॥दत्वाचवरमव्यग्रःकश्यपस्तामुवाचह॥शक्रंपुत्रोनिहंतातेयदिगर्भंशरछतं॥३१॥
समाहितातिप्रयताशुचिःसंधारयिष्यसि॥इत्येवमुक्त्वातांदेवींसंगतःकश्यपोमुनिः॥३२॥दधारसाचतंगर्भंसम्यक्शौ
चसमन्विता॥गर्भमात्मवधार्थायज्ञात्वातंमघवानपि॥३३॥शुश्रूषास्तामथागछद्विनयादमराधिपः॥तस्याश्चैवांतरंप्रे
प्सुरतिष्ठत्पाकशासनः॥३४॥ऊनेवर्षशतेचास्याददर्शांतरमात्मवान्॥अकृत्वापादशौचंचदितिःशयनमाविशत्॥निद्रा
माहारयामासतस्याःकुक्षिंप्रविश्यसः॥३५॥वज्रपाणिर्महागर्भंसच्छिछेदाथसप्तधा॥सपाट्यमानोवज्रेणप्ररुरोदातिदारु
णं॥३६॥मारोदीरितितंशक्रःपुनःपुनरभाषत॥सोभवत्सप्तधागर्भस्तमिंद्रःकुपितःपुनः॥३७॥एकैकंसप्तधाचक्रेःवज्रे
णातिविदारिणा॥मरुतोनामदेवास्तेबभूवुरतिवेगिनः॥३८॥यदुक्तंवैमघवतातेनैवमरुतोभवत्॥देवाएकोनपंचाश
त्सहायावज्रपाणिनः॥३९॥इतिश्रीविष्णुपुराणेप्रथमेंशेएकविंशोध्यायः॥७पराशरउवाच॥यदाभिषिक्तःसपृथुःपूर्वं
राज्येमहर्षिभिः॥ततःक्रमेणराज्यानिददौलोकपितामहः॥१॥नक्षत्रग्रहविप्राणांवीरुधामप्यशेषतः॥सोमराज्ये
दधाद्ब्रह्मायज्ञानांतपसामपि॥२॥राज्ञांवैश्रवणंराज्येजलानांवरुणंयथा॥आदित्यानांपतिंविष्णुंवसूनामथपावकं॥
॥३॥प्रजापतीनांदक्षंतुवासवंमरुतामपि॥दैत्यानांदानवानांचप्रह्लादमधिपंददौ॥४॥पितॄणांधर्मराजंतुयमंराऽज्येभ्य
षेचयत्॥ऐरावतंगजेंद्राणामशेषाणांपतिंददौ॥५॥पतत्रिणांचगरुडंदेवानामपिवासवं॥उच्चैःश्रवसमश्वानांवृष

भंचगवामपि॥ शेषंचनागराजानंमृगाणांसिंहमीश्वरं॥वनस्पतीनांतुराजानंप्लक्षमेवाभ्यषेचयत्॥७॥एवंविभज्य
राज्यानिदिशापालननंतरं॥प्रजापतिपतिर्ब्रह्मास्थापयामाससर्वतः॥८॥पूर्वस्यांदिशिराजानंवैराजस्यप्रजापतेः॥
दिशांपालंसुधन्वानमात्मजंसोभ्यषेचयत्॥९॥दक्षिणस्यांदिशितथाकर्दमस्यप्रजापतेः॥पुत्रंशंखपदंनामराजा
नंसोभ्यषेचयत्॥१०॥पश्चिमायांदिशितथारजसःपुत्रमच्युतं॥केतुमंतंमहात्मानंराजानमभिषिक्तवान्॥११॥
तथाहिरण्यरोमाणंपर्जन्यस्यप्रजापतेः॥उदीच्यांदिशिदुर्धर्षंराजानंचाभ्यषेचयत्॥१२॥तैरियंपृथिवीसर्वासप्तद्वी
पासपत्तना॥यथाप्रदेशमद्यापिधर्मतःपरिपाल्यते॥१३॥एतेसर्वेप्रवृत्तस्यस्थितौविष्णोर्महात्मनः॥विभूतिभूता
राजानोयेचान्येमुनिसत्तम॥१४॥येभविष्यंतियेतीताःसर्वभूतेश्वराद्विज॥तेसर्वेसर्वभूतस्यविष्णोरंशाद्विजो
त्तमः॥१५॥येचदेवाधिपतयोयेचदैत्याधिपास्तथा॥दानवानांचयेनाथायेनाथाःपिशिताशिनां॥१६॥पशूनांयेच
पतयःपतयोयेचपत्रिणां॥मनुष्याणांचसर्वेषांनागानामधिपाश्चये॥१७॥वृक्षाणांपर्वतानांचग्रहाणांचैवयेधि
पाः॥अतीतावर्त्तमानाश्चयेभविष्यंतिचापरे॥१८॥तेसर्वेसर्वभूतस्यविष्णोरंशसमुद्भवाः॥नहिपालनसाम
र्थ्यमृतेसर्वेश्वरंहरिं॥१९॥स्थितौस्थितंमहाप्राज्ञभवत्यन्यस्यकस्यचित्॥सृजत्येषजगत्सृष्टौस्थितौपातिसना
तनः॥२०॥हंतिचैवांतकत्वेचरजःसत्वादिसंश्रयः॥चतुर्विभागःसंसृष्टौचतुर्धासंस्थितःस्थितौ॥२१॥प्रलयंच

करोत्यंतेचतुर्भेदोजनार्दनः॥२२ एकेनांशेनब्रह्मासौभवत्यव्यक्तमूर्त्तिमान्॥मरीचिमिश्राःपतयःजप्रजानामात्मभाग
तः॥कालस्तृतीयस्तस्यांशः सर्वभूतानिचापरः॥२३॥इत्थंचतुर्धासंसृष्टौवर्त्ततेसोरजोगुणः॥एकांशेनस्थितोविष्णुः
करोतिपरिपालनं॥२४॥मन्वादिरूपीचान्येनकालरूपोपरेणच॥सर्वभूतेषुचान्येषुसंस्थितःकुरुतेस्थितिं॥२५॥स
त्वंगुणंसमाश्रित्यजगतःपुरुषोत्तमः॥आश्रित्यतमसोरूपमंतकालेतथाप्रभुः॥२६॥रुद्रस्वरूपीभगवानेकांशेनभ
वत्यजः॥अग्न्यंतकादिरूपेणभागेनान्येनवर्त्तते॥२७॥कालस्वरूपोभागोन्यःसर्वभूतानिचापरः॥विनाशंकुर्वतस्त
स्यचतुर्धैवंमहात्मनः॥२८॥विभागकल्पनाब्रह्मन्कथ्यतेसार्वकालिकी॥ब्रह्मदक्षादयःकालस्तथैवाखिलजंतवः
॥२९॥विभूतयोहरेरेताजगतःसृष्टिहेतवः॥विष्णुर्मन्वादयःकालःसर्वभूतानिचद्विज॥स्थितेर्निमित्तभूतस्यविष्णो
रेताविभूतयः॥रुद्रःकालोंतकाद्याश्चसमस्ताश्चैवजंतवः॥३१॥चतुर्धाप्रलयायैताजनार्दनविभूतयः॥जगदादौत
थामध्येसृष्टिराप्रलयाद्द्विज॥३२॥धात्रामरीचिमिश्रैश्चक्रियतेजंतुभिस्तथा॥ब्रह्मासृजत्यादिकालेमरीचिप्रमुखा
स्तथा॥३३॥उत्पादयंत्यपत्यानिजंतवश्चप्रतिक्षणं॥कालेननविनाब्रह्मासृष्टिनिष्पादकोद्विज॥३४॥नप्रजापतयः
सर्वेनचैवाखिलजंतवः॥एवमेवविभागोयंस्थितावप्युपदिश्यते॥३५॥चतुर्द्धादेवदेवस्यमैत्रेयप्रलयेतथा॥य
त्किंचित्सृज्यतेयेनसत्वजातेनवैद्विज॥तस्यसृज्यस्यसंभूतौतत्सर्वंवैहरेस्तथा॥ वायत्क्वचित्किंचिद्भूतंस्थावर

विष्णु०
४५

जंगमे॥जनार्दनस्यतद्रौद्रंमैत्रेयांतकरंपुः॥एवमेवजगतःस्रष्टाजगत्पातातथाजगत्॥३७॥जगद्भक्षयिताचैषसमस्तस्य
जनार्दनः॥३८॥सर्गस्थित्यंतकालेषुत्रिधैवंसंप्रवर्त्तते॥गुणप्रवृत्त्यापरमंपदंतस्यागुणंमहत्॥३९॥तच्चज्ञानमयैर्व्या
पिस्वसंवेद्यमनौपमं॥चतुःप्रकारंतदपिस्वरूपंपरमात्मनः॥मैत्रेयउवाच॥चतुःप्रकारतांतस्यब्रह्मभूतस्यवैमुने
त्वमाचक्ष्वयथान्यायंयदुक्तंपरमंपदं॥४१॥श्रीपराशरउवाच॥मैत्रेयकारणंप्रोक्तंसाधनंसर्ववस्तुषु॥साध्यंच
वस्त्वभिमतंयत्साधयितुमात्मनः॥४२॥योगिनोमुक्तिकामस्यप्राणायामादिसाधनं॥साध्यंचपरमंब्रह्मपुनर्नो
वर्त्ततेयतः॥४३॥साधनालंबनंज्ञानंमुक्तयेयोगिनांहियत्॥सभेदःप्रथमस्तस्यब्रह्मभूतस्यवैमुने॥४४॥उभयो
स्तुवभागेनसाध्यसाधनयोर्हियत्॥विज्ञानमद्वैतमयंतद्भागोन्योमयोदितः॥४५॥ज्ञानत्रयस्यचैवैतस्यविशेषो
महामुने॥तन्निराकरणद्वाराद्दर्शितात्मस्वरूपवत्॥४६॥निर्व्यापारमनाख्येयंव्याप्तिमात्रमनौपमं॥आत्मबोधवि
षयंसत्तामात्रमलक्षणं॥४७॥प्रशांतमभयंशुद्धंदुर्विभाव्यमसंश्रयं॥विष्णोर्ज्ञानमयस्योक्तंतत्ज्ञानंपरमंपदं॥४८॥
तत्राज्ञाननिरोधेनयोगिनोयांतियेलयं॥संसारकर्षणोप्तौतेयांतिनिर्बीजतांद्विज॥४९॥एवंप्रकारममलंनित्यंव्या
पकमक्षयं॥समस्तहेयरहितंविष्ण्वाख्यंपरमंपदं॥५०॥तद्ब्रह्मपरमंयोगीयतोनावर्त्ततेपुनः॥अपुण्यपुण्योपरमे
क्षीणक्लेशोतिनिर्मलः॥५१॥द्वेरूपेब्रह्मणस्तस्यमूर्त्तंचामूर्त्तमेवच॥क्षराक्षरस्वरूपेतेसर्वभूतेषुसंस्थिते॥५२॥

प्र०
४५

अक्षरंतत्परंब्रह्मक्षरंसर्वमिदंजगत्॥एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणीयथा॥परस्यब्रह्मणःशक्तिस्तथेदमखि
लंजगत्॥तत्राप्यासन्नदूरत्वाद्बहुत्वस्वल्पतामय॥५४॥ज्योत्स्नाभेदोस्तितच्छक्तेस्तद्वन्मैत्रेयविद्यते॥ब्रह्मविष्णुवाब्र शि
ह्मन्प्रधानाब्रह्मशक्तयः॥ततश्चदेवामैत्रेयन्यूनायक्षादयस्ततः॥ततोमनुष्याःपशवोमृगपक्षिसरीसृपाः॥५६॥न्यूना
न्यूनतराश्चैववृक्षगुल्मादयस्ततः॥तदेतदक्षयंरूपंजगन्मुनिधराखिलं॥५७॥आविर्भावतिरोभावजन्मनाशविकल्प
वत्॥सर्वसाक्षिमयोविष्णुःस्वरूपंब्रह्मणःपरं॥५८॥मूर्त्तंयोयोगिभिःपूर्वंयोगारंभेषुचिंत्यते॥सालंबनोमहायोगःस
बीजोयत्रसंस्थितेः॥५९॥मनस्यव्याहतेसम्यक्जंतूनांजायतेमुने॥सपरःसर्वशक्तीनांब्रह्मणःसमनंतरः॥६०॥मूर्त्तं
ब्रह्ममहाभागसर्वब्रह्ममयोहरिः॥तत्रसर्वमिदंप्रोतमोतंचैवाखिलंजगत्॥६१॥ततोजगज्जगत्तस्मिन्सजगच्चाखि
लंमुने॥क्षराक्षरमयोविष्णुर्बिभर्त्यखिलमीश्वरः॥६२॥पुरुषोव्याकृतमयंभूषणास्त्रस्वरूपवत्॥मैत्रेयउवाच॥
भूषणास्त्रस्वरूपस्थंयथैतदखिलंजगत्॥बिभर्त्तिभगवान्विष्णुस्तन्ममाख्यातुमर्हसि॥६४॥श्रीपराशरउवाच॥
नमस्तुत्वाप्रमेयायविष्णवेप्रभविष्णवे॥कथयामियथाख्यातंवशिष्ठेनममाभवत्॥६५॥आत्मानमस्यजगतोनिर्लेपम
गुणामलं॥बिभर्त्तिकौस्तुभमणिस्वरूपंभगवान्हरिः॥६६॥श्रीवत्ससंस्थानधरमनंतेचसमाश्रितं॥प्रधानंबु
द्धिरस्तेगदारूपेणमाधवे॥६७॥भूतादिमिंद्रियादिंचद्विधाहंकारमीश्वरः॥बिभर्त्तिशंखरूपेणशार्ङ्गरूपेणचस्थि

ते॥६८॥ बलस्वरूपमत्यंतंजवेनांतरितानिलं॥ चक्रस्वरूपंचमनोधत्तेविष्णुःकरस्थितं॥६९॥ पंचरूपाचयामालावैजयंती
गदाभृतः॥ साभूतहेतुसंघातोभूतमाचैलोवैद्विज॥७०॥ यानींद्रियाण्यशेषाणिबुद्धिकर्मात्मकानिवै॥ शररूपाण्यशेषा
णितानिधत्तेजनार्दनः॥७१॥ बिभर्त्तियच्चासिरत्नमच्युतोत्यंतनिर्मलं॥ विद्यामयंतुतत्ज्ञानमविद्याचर्मसंसंस्थितं॥७२॥
इत्थंपुमान्प्रधानंचबुद्ध्याहंकारमेवच॥ भूतानिचहृषीकेशेमनःसर्वेंद्रियाणिच॥७३॥ विद्याविद्येचमैत्रेयसर्वमेतत्स
माश्रितं॥ अस्त्रभूषणसंस्थानस्वरूपंरूपवर्जितः॥ बिभर्त्तिमायारूपोसौश्रेयसेप्राणिनांहरिः॥ सविकारंप्रधानंचपुमां
श्चैवाखिलंजगत्॥७५॥ बिभर्त्तिपुंडरीकाक्षस्तदेवंपरमेश्वरः॥ याविद्यायातथाविद्यायत्सद्यच्चासदव्यये॥ तत्सर्वंसर्वभू
तेशेमैत्रेयमधुसूदने॥७६॥ कलाकाष्ठानिमेषादिदिनर्त्वयनहायनैः॥ कालस्वरूपोभगवानपापोहरिरव्ययः॥७७॥
भूर्लोकोथभुवर्लोकःस्वर्लोकोमुनिसत्तम॥ महर्जनस्तपःसत्यंसप्तलोकानिमान्विभुः॥७८॥ लोकात्ममूर्त्तिःसर्वेषां
पूर्वेषामपिपूर्वजः॥ आधारःसर्वभूतानांस्वयमेवहरिःस्थितः॥७९॥ देवमानुषपश्वादिस्वरूपैर्बहुभिर्विभुः॥ स्थितःस
र्वेश्वरोनंतोसर्वमूर्त्तिरमूर्त्तिमान्॥८०॥ ऋचोयजूंषिसामानितथैवाथर्वणानिच॥ इतिहासोपवेदाश्चवेदांतेषुतथोक्त
यः॥८१॥ वेदांगानिसमस्तानिमन्वादिगदितानिच॥ शास्त्राण्यशेषाण्याख्यानानुवाकाश्चयेक्वचित्॥८२॥ कथालापाश्चये
केचिद्गीतकान्यखिलानिच॥ शब्दमूर्त्तिधरस्यैतद्वपुर्विष्णोर्महात्मनः॥८३॥ यानिमूर्त्तान्यमूर्त्तानियान्यत्रान्यत्रकुत्रचित्॥

तानि
संतिवैवस्तुतीनिसर्वाणितद्वपुः॥८४॥ अहंहरिःसर्वमिदंजनार्दनोनान्यत्ततःकारणकार्यजातं॥ ईदृग्मनोयस्यनतस्यभूयो
भवोद्भवाद्वंद्वगदाभवंति॥८५॥ इत्येषतेंशःप्रथमःपुराणस्यास्यवैद्विज॥ यथावत्कथितोयस्मिन्श्रुतेपापैःप्रमुच्यते॥
॥८६॥ कार्त्तिक्यांपुष्करस्नानेद्वादशाब्देनयत्फलं॥ तदस्यश्रवणात्सर्वंमैत्रेयाप्नोतिमानवः॥८७॥ देवर्षिपितृगंधर्वयक्षा
दीनांतुसंभवं॥ भवंतिशृण्वतांपुंसांदेवाद्यावरदामुने॥८८॥छ॥ ॥इतिश्रीविष्णुपुराणेपाराशर्यांसंहितायांपराशा
रमैत्रेयसंवादेप्रथमेंशेद्वाविंशोध्यायः॥छ॥ ॥समाप्तायंप्रथमोंशः॥ ॥राम॥ ॥राम॥ ॥कृष्ण॥ ॥छ॥

प्र॰समाप्त
४७

॥५॥ इति श्री विष्णुपुराणस्य प्रथमांशस्य समाप्तिः ॥५॥
॥५॥ भवतिश्रीरस्तुः ॥५॥

विष्णुपुराण-चतुर्थांश

वि॰पु॰

ॐ नमः श्रीविष्णवे॥ मैत्रेय उवाच॥ भगवन्यन्नरैः कार्यं साधुकर्मण्यवस्थितैः॥ तन्मह्यं गुरुणाख्यातं नित्यनैमित्तिकात्मकं॥१॥
वर्णधर्मास्तथाख्याता धर्मा ये चाश्रमेषु वै॥ श्रोतुमिच्छाम्यहं वंशं राज्ञां प्रब्रूहि मे गुरो॥२॥ पराशर उवाच॥ मैत्रेय श्रूयतामयमने
कयज्ववीरशूरभूपालालंकृतो ब्रह्मादिर्मानवो वंशः॥ तथान्वाच्यते॥ ब्रह्माद्यं यो मनोर्वंशमहन्यहनि संस्मरेत्॥ तस्य वंशसमुच्छेदो न
कदाचिद्भविष्यति॥ तस्य वंशस्यानुपूर्वीमशेषपापप्रक्षालनाय मैत्रेयैतां शृणु॥ तद्यथा॥ सकलजगतामनादिरादिभूतऋग्य
जुःसामादिमयो भगवद्विष्णुमयस्य ब्रह्मणो मूर्त्तंरूपं हिरण्यगर्भो ब्रह्मांडतो भगवान् ब्रह्मा प्राग्बभूव॥ ब्रह्मणश्च दक्षिणांगुष्ठ
जन्मा दक्षप्रजापतिः॥ दक्षस्याप्यदितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिक्ष्वाकुनृगधृष्टशर्यातिनरिष्यंतप्रांशुनाभागनेष्टिक
करूषपृषध्राख्या मनोः पुत्रा बभूवुः॥ इष्टिं च मित्रावरुणयोः मनुः पुत्रकामश्चकार॥ तत्र चापहुते होतुरपचारात् इला नाम कन्या
बभूव॥ सैव च मित्रावरुणप्रसादात् सुद्युम्नो नाम मनोः पुत्रो मैत्रेयासीत्॥ पुनः केश्वरकोपात् स्त्री सती सोमसूनोर्बुधस्या
श्रमसमीपे बभ्राम॥ सानुरागश्च तस्यां बुधः पुरूरवसमुत्पादयामास॥ जाते च तस्मिन्नमिततेजोभिः परमर्षिभिः॥ इष्टिमयो ऋ
ग्मयो यजुर्मयः साममयोऽथर्वमयः सर्वमयो मनोमयो ज्ञानमयः न किंचिन्मयो भगवान् यज्ञपुरुषस्वरूपी सुद्युम्नस्य पुंस्त्वमभि
लषद्भिर्यथावदिष्टः॥ तत्प्रसादात् इला पुनरपि सुद्युम्नोऽभवत्॥ सुद्युम्नस्याप्युत्कलगयविनतसंज्ञास्त्रयः पुत्रा बभूवुः॥ सु
द्युम्नस्तु स्त्रीपूर्वकत्वाद्राज्यभागं न लेभे॥ तत्पित्रा च वसिष्ठवचनात् प्रतिष्ठानं नाम नगरं सुद्युम्नाय दत्तं॥ तदासौ पुरूरवसे प्रा

चतु॰
१

दात्॥ पृषध्रस्तु मनोः पुत्रो गुरुगोवधात् शूद्रत्वमगमत्॥ करूषात् कारूषाः क्षत्रिया महाबला बभूवुः॥ नेदिष्टकपुत्रस्तु वैश्यता
मगात्॥ तस्माद्भलंदनः पुत्रोऽभवत्॥ भलंदनाद्वत्सप्रीतिः उदारकीर्त्तिर्वत्सप्रीतेः प्रांशुरभवत्॥ प्रजापतिश्च प्रांशोः॥ रफोऽभवत्॥ त
तश्च खनित्रः तस्मात् क्षुपः क्षुपाच्चातिबलपराक्रमो विंशोऽभवत्॥ ततो विंशास्मात् खनीनेत्रस्ततश्चातिविभूतिः॥ भूरिबलप
राक्रमः॥ करंधमः पुत्रोऽभवत्॥ तस्मादप्यविक्षित् अविक्षितोऽप्यतिबलः॥ पुत्रो मरुत्तोऽभवत्॥ यस्येमावद्यापि श्लोकौ गीयते॥ म
रुत्तस्य यथा यज्ञस्तथा कस्याभवद्भुवि॥ सर्वं हिरण्मयं यस्य यज्ञवस्त्वतिशोभनं॥ अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः॥ मरु
तः परिवेष्टारः सदस्याश्च दिवौकसः॥ मरुत्तश्चक्रवर्त्ती नरिष्यंतनामानं पुत्रमवाप॥ तस्माच्च दमो दमस्य पुत्रो राष्ट्रवर्द्धनो जज्ञे॥
राष्ट्रवर्द्धनात्सुधृतिरभूत्॥ ततश्च नरस्तस्माच्च केवलोऽभूत् केवलाद्बंधुमान् बंधुमतो वेगवान् वेगवतो बुधस्ततस्तृणबिंदुस्तस्या
प्येका कन्या इलविला नाम॥ तं चालंबुसा नाम वराप्सरास्तृणबिंदुं भेजे॥ तस्यामस्य विशालो जज्ञे॥ यः पुरीं वैशालीं नाम निर्ममे॥
हेमचंद्रश्च विशालस्य पुत्रोऽभवत्॥ तस्मात्सुचंद्रस्तत्तनयो धूम्राश्वः तस्यापि संजयोऽभूत्॥ संजयात्सहदेवस्ततः कृशाश्वो
नाम पुत्रोऽभवत्॥ सोमदत्तः कृशाश्वाज्जज्ञे यो दशाश्वमेधानाजहार॥ तत्पुत्रश्च जनमेजयो जनमेजयात्सुमतिरेते वैशालिका
भूभृतः श्लोकोऽप्यत्रैव गीयते तृणबिंदोः प्रसादेन सर्वे वैशालिका नृपाः॥ दीर्घायुषो महात्मानो वीर्यवंतोऽतिधार्मिकाः॥ शर्यातेः
कन्या सुकन्या नामाभवत्॥ यामुपयेमे च्यवनः॥ आनर्त्तनामा च परमधार्मिकः। शर्यातेः पुत्रोऽभूत्॥ आनर्त्तस्यापि रेवत नामा

पुत्रो जज्ञे। यो सावानर्त्तविषयं बुभुजे॥ पुरीं च कुशस्थलीमध्युवास। रेवतस्यापि रैवतः पुत्रः ककुद्मी नाम धर्मात्मा भ्रातृशतज्ये
ष्ठोऽभवत्। तस्य च रेवती नाम कन्या। तामादाय कस्येयमर्हतीति भगवंतमब्जयोनिं प्रष्टुं जगाम। तावच्च ब्रह्मणोंतिके हाहाहूहूसं
ज्ञाभ्यां गंधर्वाभ्यामतितानं नाम दिव्यं गांधर्वमगीयत॥ तच्च त्रिमार्गपरिवर्त्तमयमनेकयुगपरिवर्त्ते तिष्ठन्नपि रैवतः शृण्व
न्मुहूर्त्तमिव मेने॥ गीतावसाने भगवंतमब्जयोनिं प्रणम्य रैवतः कन्यायोग्यं वरमपृच्छत्॥ ततश्चाह भगवान् कथय योऽभिमतो
वरस्ते पुनश्च प्रणम्य भगवते तस्मै यथाभिमतानात्मनः स वरान् कथयामास॥ क एषामभिमतो भगवत इति यस्मै कन्यां प्रय
च्छामि इति॥ ततः किंचिदवनतशिराः सस्मितं भगवानब्जयोनिराह॥ य एते भवतोऽभिमता नैतेषां सांप्रतमपत्यापत्यसंततिर
वनितलेऽस्ति। बहूनि हि तवात्रैव तत्र गांधर्वं शृण्वतश्चतुर्युगान्यतीतानि॥ सांप्रतं हि भूतले सप्तमस्य मनो अष्टाविंशतिमनो
श्चतुर्युगमतीतप्रायं॥ आसन्नो हि कलिरन्यस्मै कन्यारत्नं भवतिकाकिनादेयं॥ भवतोऽपि मित्रमंत्रिभृत्यकलत्रबंधुबलको
शादयः समस्ताः कालेनैतेनात्यंतमतीताः॥ ततः पुनरप्युत्पन्नसाध्वसः स राजा भगवंतं प्रणम्य पप्रच्छ॥ भगवन्नेवमवस्थि
ते ममेयं कस्मै देयेति॥ ततः स भगवान् किंचिदवनतकंधरः कृतांजलिं भूतं सप्रलोकगुरुरब्जयोनिराह॥ ब्रह्मोवाच॥ न
ह्यादिमध्यांतमजस्य यस्य विद्मो वयं सर्वगतस्य धातुः॥ न च स्वरूपं न परं स्वभावं न चैव सारं परमेश्वरस्य॥ कलामुहूर्त्ता चतु०
दिमयश्च कालो न यद्विभूतेः परिणामहेतुः॥ अजन्मनाशस्य समस्तमूर्त्तेरनामरूपस्य सनातनस्य॥ यस्य प्रसादादहमच्यु २

तस्य भूतः प्रजासृष्टिकरोंतकारी॥ क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्मात्॥ तद्रूपमास्थाय सृजत्यजो यः स्थितौ
च योसौ पुरुषस्वरूपी॥ रूपश्च रूपेण च योत्ति विश्वं धत्ते तथानंतवपुः समस्तं॥ शक्रादिरूपः परिपाति विश्वं अर्केंदुरूपश्च तमो हि
नस्ति॥ पाकाय योग्नीत्वमुपेति लोकान्बिभर्त्ति पृथ्वीवपुरव्ययात्मा॥ चेष्टां करोति श्वसनस्वरूपी लोकस्य तृप्तिं च जलान्नरूपी॥
ददाति विश्वस्थितिसंस्थितस्तु सर्वावकाशं च नभःस्वरूपी॥ यः सृज्यते सर्गकृदात्मनैव यः पाल्यते पालयिता च देवः॥ विश्वात्मकः
संह्रियतेंऽतकारी पृथग्न यस्यास्य च सोऽव्ययात्मा॥ यस्मिन् जगद्यो जगदेतदाद्यो यश्चाश्रितोऽस्मिन् जगति स्वयंभूः॥ स सर्वभूत
प्रभवो धरित्र्यां स्वांशेन विष्णुर्नृपतेऽवतीर्णः॥ कुशस्थली या तव भूत रम्या पुरी पुराभूदमरावतीव॥ सा द्वारका संप्रति तत्र चास्ते स
केशवांशो बलदेवनामा॥ तस्मै त्वमेनां तनयां नरेंद्र प्रयच्छ मायामनुजाय जायां॥ श्लाघ्यो वरोऽसौ तनया तवेयं स्त्रीरत्नभूता सदृ
शो हि योगः॥ पराशर उवाच॥ इतीरितोऽसौ कमलोद्भवेन भुवं समासाद्य पतिः प्रजानां॥ ददर्श ह्रस्वान्पुरुषानशेषानल्पौज
सः स्वल्पविवेकवीर्यान्॥ कुशस्थलीं तां च पुरीमुपेत्य दृष्ट्वान्यरूपां प्रददौ स्वकन्यां॥ सीरध्वजाय स्फुटिकाचलाभवक्षस्थलायातु
लधीर्नरेंद्रः॥ उच्चप्रमाणामिति तामवेक्ष्य स्वलांगलाग्रेण स तालकेतुः॥ विनामयामास ततश्च सापि बभूव सद्यो वनिता यथा
न्या॥ तां रेवतीं रैवतभूपकन्यां सीरायुधोऽसौ विधिनोपयेमे॥ दत्वा स कन्यां स नृपो जगाम हिमाचलं वै तपसे धृतात्मा॥ ॥
इति श्रीविष्णुपुराणे चतुर्थेंऽशे प्रथमोऽध्यायः॥ पराशर उवाच॥ यावच्च ब्रह्मणो लोकात् ककुद्मी रैवतो नाभ्येति तावत्पुण्यजन

वि॰पु॰ ३ संज्ञाराक्षसास्तामस्यपुरींकुशस्थलींजघ्नुः।तस्यचभ्रातृशतंपुण्यजनत्रासाद्दिशोभेजे॥तदन्वयाश्चक्षत्रियाःसर्वदिक्ष्वभ
वन्॥धृष्टस्यापिधार्ष्टकंक्षात्रंसमभवत्॥नाभागस्यात्मजोनाभागसंज्ञोभवत्॥तस्याप्यंबरीषः॥अंबरीषस्यापिविरूपोऽ
भवत्॥विरूपात्पृषदश्वोजज्ञे॥ततश्चरथीतरः।तत्रायंश्लोकः॥एतेक्षत्रप्रसूतावैपुनश्चांगिरसःस्मृताः॥रथीतराणांप्रवराः
क्षत्रोपेताद्विजातयः॥अंगिरसोगणेप्रविष्टत्वात्अंगिरसोधिजातयः॥स्मृताः॥एषांहितसेवब्रह्मत्वे।विश्वामित्रान्नपतिर्मां
धातासंकृतिःकपिः।बाध्यश्चपुरुकुत्सश्चभार्म्यश्चोगृत्सपदःप्रभुः॥आष्टीषेणोजमीढश्चनाभागोन्योस्तथैवच॥कक्षीवां
श्चविरूपश्चमुद्गलोहरितस्तथा॥रथीतरश्चकण्वश्चविष्णुवृद्धादयोनृपाः।क्षत्रोपेताद्विजाःसर्वेतपसाऋषितांगताः॥क्षुवत
श्चमनोरिक्ष्वाकुर्घ्राणतःपुत्रोजज्ञे॥तस्यपुत्रशतप्रवराविकुक्षिनिमिदंडाख्यास्त्रयःपुत्राःपंचाशत्पुत्राउत्तरापथरक्षिता
रोबभूवुः।चत्वारिंशदष्टौचदक्षिणापथभूपालाःसवेक्ष्वाकुरष्टकायामुत्पाद्यश्राद्धार्हंमांसमानयेति।विकुक्षिमाज्ञापयामा
स॥तथेतिगृहीताज्ञोवनमभ्येत्यानेकान्मृगान्हत्वाऽतिश्रांतोऽतीक्षुत्परीतोविकुक्षिरेकंशशमभक्षयत्॥शेषंचमांसमा
नी रीयपित्रेनिवेदयामास।इक्ष्वाकुणापिइक्ष्वाकुकुलाचार्यःतत्प्रोक्षणायवशिष्ठश्चोदितःप्राह॥अलमेतेनामेध्येनामिषेणदुरा
त्मना।अनेनतेपुत्रेणएतन्मांसमुपहतंयतोनेनशशोभक्षितः।ततश्चासौविकुक्षिर्गुरुणैवमुक्तःशशादसंज्ञामवाप॥पित्रा चतु॰ ३
पिचपरित्यक्तः।पितर्युपरतेऽखिलामेनांपृथ्वींधर्मतःशशास।शशादस्यपुरंजयोनामपुत्रोऽभवत्॥इदंचान्यत्पुरात्रेतायां

यामतीवभीषणंदेवासुरंयुद्धमासीत्॥तत्रचातिबलिभिरसुरैरमराःपराजिताभगवंतंविष्णुमाराधयांचक्रुः।प्रसन्नश्चदेवानाम
नादिनिधनःसकलजगत्परायणोनारायणःप्राह॥ज्ञातमेवमयायुष्माभिर्यदभिलषितंतदर्थमिदंश्रूयतां॥पुरंजयोनामशशा
दस्यराजर्षेस्तनयःक्षत्रियवर्यस्तच्छरीरेऽहमंशेनस्वयमेवावतीर्यतानसुरान्शेषान्निहनिष्यामितद्भवद्भिःपुरंजयोऽसुर
वधार्थमुद्योगंकार्यतामित्येतच्छ्रुत्वाप्रणम्यभगवंतंविष्णुममराःपुरंजयस्यसकाशंजग्मुः।ऊचुश्चैनंक्षत्रियवर्यास्माभिरभ्य
र्थितेनभगवतानारायणेनासुरवधार्थंसाहाय्येनभवानादिष्टः॥अतोस्माकमरातिवधोद्यतानांसाहायकंकर्तुमिच्छामः॥तद्भव
तास्माकमभ्यागतानांप्रणयभंगोनकार्यः॥इत्युक्तःपुरंजयःप्राह॥सकलत्रैलोक्यनाथोयोयंयुष्माकमिंद्रःशतक्रतुरस्यंय
द्यहंस्कंधारूढोयुष्मदरातिभिःसहयोत्स्येतदाहंभवतांसहायइत्याकर्ण्यसमस्तदेवैरिंद्रेणचबाढंसमन्वीप्सितं॥ततः
शतक्रतोर्वृषभरूपधारिणःसकलकुत्स्थोऽतिहर्षसमन्वितोभगवतश्चराचरगुरोरच्युतस्यतेजसाप्यायितोदेवासुरसं
ग्रामेसमस्तानेवासुरान्निजघान॥यतश्चवृषभककुत्स्थेनतेनराज्ञानिषूदितमसुरबलंततश्चासौककुत्स्थसंज्ञामवाप॥
ककुत्स्थस्याप्यनेनाःपुत्रोभवत्॥पृथुरनेनसःपृथोर्वृषदश्वःतस्याचार्द्रोऽभूत्॥आर्द्रस्ययवनाश्वःतस्यचश्रावस्तःयःपुरींश्राव
स्तीयंनिवेशयामास॥श्रावस्तस्यबृहदश्वःतस्यापिकुवलयाश्वःयोसावुत्तंकस्यमहर्षेरपकारिणंधुंधुनामानमसुरंवैष्णवे
नतेजसाप्यायितःपुत्रसहस्रैरेकविंशतिभिःसहपरिवृतोजघान॥धुंधुमारसंज्ञांचावाप॥तस्यचसमस्ताएवतेपुत्राधुंधुमुख

BHAU DAJI

निःश्वासाग्निनाविप्लुष्टानेशुः॥ दृढाश्वचंद्राश्वकपिलाश्वाःत्रयःपुत्राःकेवलमशेषिताः॥ दृढाश्वाद्धर्यश्वःतस्मान्निकुंभाच्चसंहिताश्वःतस्माच्चप्रसेनजित्॥ ततोयुवनाश्वोभवत्॥ तस्यचापुत्रस्यातिनिर्वेदान्मुनीनामाश्रममंडलेनिवसतः॥ कृपालुभिस्तैर्मुनिभिःरपत्योत्पादनायइष्टिःकृता॥ तस्यांचमध्यरात्रिनिवृत्तायांमंत्रपूतजलकलशंवेदीमध्येनिवेश्यतेमुनयःसुषुपुः॥ सुप्तेषुतेष्वतीवतृट्परीतःसभूपालःतमाश्रमंविवेश॥ सुप्तांस्तुतानृषीन्नैवोत्थापयामास॥ तच्चकलशजलमपरिमेयमाहात्म्यंमंत्रपूतंपपौ॥ प्रबुद्धाश्चऋषयःपप्रच्छुः।केनैतन्मंत्रपूतंवारिपीतम्अत्रहिपीतेराज्ञोस्ययुवनाश्वस्यपत्नीमहाबलपराक्रमंपुत्रंजनिष्यतीत्येतद्वचनमाकर्ण्यसराजाअजानतातृट्परीतेनमयापीतमित्याह॥ गर्भश्चयुवनाश्वस्योदरेभवत्क्रमेणचववृधे॥ ततःप्राप्तसमयश्चदक्षिणंकुक्षिमवनीपतेर्निर्भिद्यनिश्चक्राम नचासौराजाममार॥ जातोनामैषकंधास्यतीतितेमुनयःप्रोचुःअथागम्यदेवराडब्रवीत्॥ ममायंधास्यति। ततोमांधातानामतःसोभवत्॥ वक्त्रेचास्यप्रदेशिनीदेवेंद्रेणन्यस्ता॥ तांचामृतस्राविणीमास्वाद्यपीत्वाचान्हैवव्यवर्द्धत॥ सतुमांधाताचक्रवर्तीसप्तद्वीपांमहींबुभुजे॥ भवतिचात्रश्लोकः॥ यावत्सूर्यउदेतिस्मयावच्चप्रतितिष्ठति॥ तत्सर्वंयौवनाश्वस्यमांधातुःक्षेत्रमुच्यते॥ मांधाताचशशबिंदोर्दुहितरंबिंदुमतीमुपयेमे॥ पुरुकुत्समंबरीषंमुचुकुंदंचतस्यांपुत्रत्रयमुत्पादयामास॥ पंचाशद्दुहितरस्तस्यामेवतस्यनृपतेर्बभूवुः॥ एतस्मिन्नंतरेबह्वृचश्चसौभरिर्नाममहर्षिरंतर्जलेद्वादशाब्दंकालमुवास॥ तत्रचांतर्जलेसंमदनामातिमिःबहुप्रजोतिप्रमा

णोमीनाधिपतिरासीत् तस्यचपुत्रपौत्रदौहित्राःपृष्ठतोऽग्रतश्चपार्श्वपक्षपुच्छशिरसांचोपरिभ्रमंतस्तेनैवसहानित्यमतिनिर्वृत्यारेमिरे॥ सचापितस्यस्पर्शोपचीयमानहर्षप्रकर्षोबहुप्रकारंतस्यर्षेःपश्यतस्तैरात्मजपौत्रदौहित्रादिभिःसहानुदिनंसुतरांरेमे॥ अथांतर्जलावस्थितःससौभरिरेकाग्रतासमाधानमपहायानुदिनंतत्तस्यमत्स्यस्यात्मजपौत्रदौहित्रादिभिःसहातिरमणीयंललितमवेक्ष्याचिंतयत्॥ अहोधन्योयमीदृशमनभिमतंयोन्यंतरमवाप्यएभिरात्मजपौत्रदौहित्रादिभिःसह॥ रममाणोऽतीवास्माकंस्पृहामुत्पादयति॥ वयमप्येवंपुत्रपौत्रादिभिःसहरमिष्यामः॥ इत्येवमभिसमीक्ष्यसतस्मादंतर्जलान्निःक्रम्यनिवेष्टुकामःकन्यार्थंमांधातारंराजानमगच्छदागमनश्रवणसमनंतरंचउत्थायतेनराज्ञासम्यगर्घ्यादिनापूजितः॥ कृतासनपरिग्रहः॥ ससौभरिरुवाचराजानं॥ सौभरिरुवाच॥ निवेष्टुकामोस्मिनरेंद्रकन्यांप्रयच्छमेमाप्रणयंविभांक्षीः॥ नह्यर्थिनःकार्यवशाभ्युपेताःककुत्स्थवंशेविमुखाःप्रयांति॥ अन्येचसंत्येवनृपाःपृथिव्यांक्ष्मापालयेषांतनयाःप्रसूताः॥ किंत्वर्थिनामर्थितदानदीक्षाकृतव्रतंश्लाघ्यमिदंकुलंते॥ शतार्द्धसंख्यास्तवसंतिकन्यास्तासांममैकांनृपतेप्रयच्छ॥ यत्प्रार्थनाभंगभयाद्बिभेमितस्मादहंराजवरातिदुःखात्॥ पराशरउ॰॥ इतिऋषिवचनमाकर्ण्यसराजाजराजर्जरितदेहंतमृषिमवलोक्यप्रत्याख्यानकातरःतस्माच्चभगवतःशापतोबिभ्यत्किंचिदधोमुखश्चिरंदध्यौ॥ ऋषिरुवाच॥ नरेंद्रकस्मात्समुपैतिचिंतामसह्यमुक्तंनमयात्रकिंचित्॥ यावश्यदेयातन

यातयेवकृतार्थवानोयदिकिंनलब्धं॥अथतस्यभगवतःशापभीतःसप्रश्रयस्तमुवाचासौराजा॥राजोवाच॥भगवन्न
स्मत्कुलस्थितिरियंयएवकन्यायाअभिरुचितोऽभिजनवान्वरस्तस्मैकन्याप्रदीयते॥भगवदाज्ञाचास्मन्मनोरथानामप्यगो
चरवर्त्तिनीकथमप्येषासंजातातदेवमवस्थितेनविद्मःकिंकुर्मइत्येतन्मयाविचिंत्यभिहितेनभूभुजामुनिरचिंतयदहोय
मन्योस्मत्प्रत्याख्यानोपायोवृद्धोयमनभिमतःस्त्रीणांकिमुतकन्यानोथइत्यमुनाविचिंत्यएतदभिहितंएवमस्तुतथा
करिष्यामीतिसंचिंत्यमांधातारमुवाच॥यद्येवंतदादिश्यतांकन्यांतःपुरवर्षधरोयदिकन्यैवकाचिन्मामभिलषति॥त
दाहंदारसंग्रहंकरिष्यामिइत्यन्यथाचेत्तदलमस्माकमेतेनातीतेनकालारंभेणेत्युक्त्वाविरराम॥ततश्चमांधात्रामुनि
शापाभिशंकितेनकन्यांतःपुरवर्षधरःसमाज्ञप्तः॥कन्यांतःपुरंप्रविशन्नेवभगवान्अखिलसिद्धगंधर्वेभ्यो
ऽतिकमनीयंरूपमकरोत्॥प्रवेश्यचतमृषिंअंतःपुरवर्षधरस्ताःकन्यकाःप्राह॥भवतीनांजनयितामहाराजःसमाज्ञाप
यति॥अयमस्मान्ब्रह्मर्षिःकन्यार्थीसमभ्यागतोमयाचास्यप्रतिज्ञातंयद्यस्मत्कन्याकाचिद्भगवंतंवरयतितत्कन्य
कायाःछंदेनाहंपरिपंथानंकरिष्यामीतिआकर्ण्यसर्वाएवताःकन्याःसानुरागाःसमन्मथाःकरेणवइवेभयूथपतिंत
मृषिमहमहमिकयावरयांबभूवुः॥ऊचुश्च॥अलंभगिन्योहमिमंवृणोमिअयंवृतोनैषतवानुरूपः॥ममैषभर्त्ता
विधिनैवसृष्टःसृष्टाहमस्योपशमंप्रयाहि॥वृतोमयायंप्रथमंभगिन्योगृहंविशन्नेवविहन्यसेकिं॥मयामयेतिक्षि

तिपात्मजानांतदर्थमत्यर्थकलिर्बभूव॥यदातुसर्वाभिरतीवहार्दाद्वृतःसकन्याभिरनिंद्यमूर्त्तिः॥तदासकन्याधिकृतोनृ
पाययथावदाचष्टविनम्रमूर्त्तिः॥तदवगमात्किंकिमेतत्कथयकिंकरोमीतिकिंमयाभिहितमित्याकुलमतिरनिच्छन्नपि
कथमपिराजानुमेने॥कृतानुरूपविवाहश्चमहर्षिःसकलाएवताःकन्यकाःस्वमाश्रममनयत्॥तत्रचाशेषशिल्पिशि
ल्पकल्पप्रणेतारंधातारमिवान्यंविश्वकर्माणमाहूयसकलकन्यकानामेकैकस्याःप्रोत्फुल्लपंकजाःकूजत्कलहंसकारंड
वादिविहंगमाभिरामजलाशयाःसोपधानाःसावकाशाःसाधुशय्यापरिच्छदाःप्रासादाःक्रियंतामित्यादिदेश॥तच्चतथै
वानुष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टादर्शितवान्॥ततश्चपरमर्षिणासौभरिणाज्ञप्तस्तेषुगृहेष्वनपायीनंदनमहानि
धिरासांचक्रे॥ततोनवरतभक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीन्अहर्निशंतेषुगृहेषुताःक्षितीशदुहितरोभो
जयामासुः॥एकदातुदुहितृस्नेहाकृष्टहृदयःसमहीपतिःअतिदुःखितास्तासुखितावेतिविचिंत्यतस्यमहर्षेराश्रममुपे
त्यस्फुरदंशुमालामलस्फुटिकमयप्रासादमालामतिरम्योपवनजलाशयांददर्श॥प्रविश्यचैकंप्रासादमात्मजांपरिष्वज्य
कृतासनपरिग्रहःप्रवृत्तस्नेहांबुनयनोऽब्रवीत्॥अप्यत्रवत्सेभवत्याःसुखमुतकिंचिदसुखमपितेमहर्षिःस्नेहवानुतेस्म
यीतःऽस्मद्गृहवासस्त्वित्युक्तातत्तनयापितरमाह॥तातातिरमणीयःप्रासादोअत्रातिमनोज्ञमुपवनमतिकलविहंगा
भिरुताःप्रोत्फुल्लपद्माकरजलाशयाः॥मनोनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगोपभोगाः॥मृदूनिशय्या

नासनानि सर्वसंपत्समवेतमेतत्तात ईदृशं गार्हस्थ्यं तथापि केन तात जन्मभूर्न स्मर्यते॥ त्वत्प्रसादादिदमतिशोभनं॥ किंत्वेकं म
मैतदुःखकारणं॥ यदस्मद्गृहान्महर्षिरस्मद्भर्त्ता न निष्क्रामति॥ ममैव केवलमतिप्रीत्या समीपपरिवर्त्तिनान्यासामस्मद्भ
गिनीनां॥ एवं च मम सहोदरा दुःखिता इत्येवमतीव दुःखकारणं॥ इत्युक्तस्तया द्वितीयं प्रासादमुपेत्य स्वतनयां परिष्वज्य उ
पविष्टस्तथैव पृष्टवान्॥ तयापि तथैव सर्वमेतत्प्रासादाद्युपभोगसुखमाख्यातं॥ ममैव केवलं पार्श्ववर्त्तिनान्यासामद्भ
गिनीनां एवं च मम सहोदरा दुःखिता इत्येवमतीव दुःखकारणं॥ इत्युक्तस्तया तृतीयं प्रासादमुपेत्य स्वतनयां परिष्वज्यो
पविष्टस्तथैव पृष्टवान्॥ तयापि सर्वमेतत्प्रासादाद्युपभोगसुखमाख्यातं॥ ममैव केवलं पार्श्ववर्त्तिनान्यासामस्मद्भगिनी
नां इत्येवमादि श्रुत्वा समस्तप्रासादेषु स राजा विवेश॥ तनयां तनयां तथैवापृच्छत्॥ सर्वाभिस्ताभिस्तथैवाभिहितः परितोषविस्म
यनिर्भरविवशहृदयो भगवंतं सौभरिमेकांतावस्थितं उपेत्य कृतपूजोऽब्रवीत्॥ दृष्टस्ते भगवन् सुमहानेष सिद्धिप्रभावो नै
वंविधं अन्यस्य कस्यचिदस्माभिर्विभूतेर्विलसितं उपलक्षितं॥ कियदेतत्तपसः फलमित्यभिपूज्य तमृषिं तत्रैव तेनर्षिवर्ये
णसह किंचित्कालं अभिमतोपभोगान् अदृष्टपूर्वान् बुभुजे॥ स्वपुरं च जगाम॥ कालेन गच्छता तस्य तासु राजतनयासु पुत्र
शतं सार्द्धमभवत्॥ अनुदिनानुरूढस्नेहप्रसरश्च तत्रातीव ममकृष्टहृदयोऽभवत्॥ अप्येतेऽस्मत्सुताः कलभाषिणः॥ पद्भ्यां
गच्छेयुः अप्येते यौवनिनो भवेयुः॥ अपि कृतदारानेतान् पश्येयं अप्येषां पुत्रा भवेयुरप्येतान् पुत्रसमन्वितान् पश्येयमित्या

दिमनोरथाननुदिनं कालसंपत्तिवृद्धानवेत्त्यैतत्संचिंतयामास॥ अहो मे मोहस्यातिविस्तरः मनोरथानां न समाप्तिरस्ति वर्षायुतेना
प्यथवापि लक्षैः॥ पूर्णेषु पूर्णेषु पुनर्नवानामुत्पत्तयः संति मनोरथानां॥ पद्भ्यां गता यौवनिनश्च जाता दारैश्च संयोगमिताः प्रसूताः
दृष्टाः सुतास्तत्तनयाप्रसूतिं द्रष्टुं पुनर्वांछति मेंऽतरात्मा॥ द्रक्ष्यामि तेषामपि चेत्प्रसूतिं मनोरथो मे भविता ततोऽन्यः॥ पूर्णे च तत्राप्य
परस्य जन्म निवार्यते केन मनोरथस्य॥ आमृत्युतो नैव मनोरथानामंतोऽस्ति विज्ञातमिदं मयाद्य॥ मनोरथासक्तिपरस्य चित्तं न जा
यते वै परमार्थसंगि॥ स मे समाधिर्जलवासमित्रमत्स्यस्य संगात्सहसैव नष्टः॥ परिग्रहः संगकृतो मयायं परिग्रहोत्थाश्च महा
धयो मे॥ दुःखं यदेवैकशरीरजन्म शतार्द्धसंख्यं तदिदं प्रसूतं॥ परिग्रहेण क्षितिपात्मजानां सुतैरनेकैर्बहुलीकृतं तत्॥ सुतात्मजैस्तत्त
नयैश्च भूयो भूयश्च तेषां स्वपरिग्रहेण॥ विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहो वै ममताभिधानं॥ चीर्णं तपो यत्तु जलाश्रमेण तस्य
र्द्धिरेषापतेसोंतरायं॥ मत्स्यस्य संगादभवच्च यो मे सुतादिरागो मुषितोऽस्मि तेन॥ निःसंगता मुक्तिपदं यतीनां संगादशेषाः प्रभवंति
दोषाः॥ आरूढयोगोऽपि निपात्यतेऽधः संगेन योगी किमुताल्पसिद्धिः॥ अहं चरिष्यामि तथात्मनोऽर्थे परिग्रहग्राहगृहीतबुद्धिः॥ यथा
हि भूयः परिहीणदोषो जनस्य दुःखैर्भविता न दुःखी॥ सर्वस्य धातारमचिंत्यरूपमणोरणीयांसमतिप्रमाणं॥ सितासितं चेश्वरमी
श्वराणां आराधयिष्ये तपसेव विष्णुं॥ तस्मिन्नशेषौजसि सर्वरूपिण्यव्यक्तविस्पष्टतनावनंते॥ ममाचलं चित्तमपेतदोषं सदा
स्तु विष्णावभवाय भूयः॥ समस्तभूतादमलादनंतात्सर्वेश्वरादन्यदनादिमध्यात्॥ यस्मान्न किंचित्तमहं गुरूणां परं गुरुं संश्रय

मेमि विष्णुं॥ ॥इति श्रीविष्णुपुराणे चतुर्थेंशे द्वितीयोध्यायः॥छ॥ ॥पराशर उवाच॥ इत्यात्मानमात्मनैव संधाय सोभरिस्त्यहाय पुत्रगृहासनपरिच्छिदादिकं अशेषमर्थजातं स्वयं च सकलभार्यासमवेतो वनं प्रविवेश॥ तत्राप्यनुदिनं वैखानसनिष्पाद्यं अशेषक्रियाकलापं निष्पाद्य क्षिपितसकलपापः परिपक्कमनोवृत्तिरात्मन्यग्नीन् समारोप्य भिक्षुरभवत्॥ भगवत्यासज्य अखिलं कर्मकलापं अजमविकारममरणादिधर्ममवाप॥ परं परवतामप्यच्युतपदमित्येतत् मांधातुर्दुहितृसंबंधादाख्यानं यश्चैतत्सौभरिचरितमनुस्मरति पठति शृणोति विधारयति तस्याष्टौ जन्मान्यसन्मतिरपधर्मो वामनसोऽरपमायावरणमशेषहेयेषु वा ममत्वं न भवतीत्यतश्च मांधातुः पुत्रसंततिरभिधीयते॥ अंबरीषस्य मांधातुस्तनयस्य युवनाश्वः पुत्रोऽभूत्॥ तस्मात् हरितः यतोंगिरसो हारीताः॥ रसातले मौनेयानामगंधर्वा बभूवुः॥ षट्कोटिसंख्यास्तैरशेषाणि नागकुलानि अपहृतप्रधानरत्नाधिपत्यान्यत्रक्रियंत तत्र देवगंधर्ववीर्यावधूतैरुरगेश्वरैः भगवानशेषदेवेशः स्तवश्रवणोन्मीलितोन्निद्रपुंडरीकनयनो जलशयनो निद्रावसाने प्रबुद्धः प्रणिपत्याभिहितः॥ भगवन्नस्माकमप्येतेभ्यो गंधर्वेभ्यो भयमुपन्नाममेष्यतीत्याह॥ भगवाननादिपुरुषः पुरुषोत्तमो यौवनाश्वस्य मांधातुः पुरुकुत्सनामा पुत्रस्तमनुप्रविश्य तानहमशेषदुष्टगंधर्वानुपशमं नयिष्यामीति आकर्ण्य भगवते कृतप्रणामाः पुनर्नागलोकमागताः पन्नगाधिपतयो नर्मदां च पुरुकुत्सानयनाय नोदयामासुः॥ सा चैनं रसातलं नी रसातलगतश्चासौ भगवत्तेजसाप्यायितात्मवीर्यः सकलगंधर्वानजघान॥ पुनश्च स्वपुरमाजगाम॥ ततः सकलपन्नगपत

योनर्मदायै वरं ददुः॥ यस्तेनुस्मरणसमवेतं नामग्रहणं करिष्यतीति न तस्य सर्पविषभयं भविष्यतीत्यूचुः॥ नर्मदायै नमः प्रातर्नर्मदायै नमो निशि नमोस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः॥ इत्युच्चार्याहर्निशं अंधकारे प्रवेशो वा सर्पैर्न दृश्यते॥ न चापि कृतानुस्मरणभुजो विषमपि भुक्तमुपघाताय भवति॥ पुरुकुत्साय न भवतः संततिविच्छेदो भविष्यतीत्युरगपतयो वरं ददुः॥ पुरुकुत्सो नर्मदायां त्रसदस्युमजीजनत्॥ त्रसदस्युतः संभूतास्ततोऽनरण्यस्तं रावणो दिग्विजये निजघान॥ अनरण्यस्य पृषदश्वः॥ पृषदश्वस्य हर्यश्वः पुत्रोऽभूत्॥ ततश्च वसुमनास्तस्यापि त्रिधन्वा त्रिधन्वनस्त्रय्यारुणस्तस्मात्सत्यव्रतः योसौ त्रिशंकुसंज्ञामवाप॥ चंडालतामुपगतश्च द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चंडालप्रतिग्रहपरिहरणाय च जान्हवीतीरन्यग्रोधे मृगमांसमनुदिनं बबंध परितुष्टेन विश्वामित्रेण सशरीरः स्वर्गमारोपितः॥ त्रिशंकोर्हरिश्चंद्रस्तस्माच्च रोहिताश्वः ततश्च हरितः हरितस्यापि चंचुः॥ चंचोर्विजयसुदेवौ रुरुको विजयात्॥ रुरुकस्य वृकस्ततो बाहुः योसौ हैहयतालजंघादिभिः पराजितोंतर्वत्न्या महिष्या सह वनं विवेश॥ तस्याः सपत्न्या गर्भस्तंभनाय गरो दत्तः॥ तेनास्या गर्भः सप्तवर्षाणि जठर एव तस्थौ॥ स च बाहुर्वृद्धभावात् और्वाश्रमसमीपे ममार॥ सा तस्य भार्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाभूत् अथैनामतीतानागतवर्तमानकालवेदी भगवानौर्वः स्वाश्रमान्निर्गत्याब्रवीत्॥ अलमनेनासद्ग्रहेणाखिलभूमंडलपतिरतिवीर्यपराक्रमोनेकयज्ञकृदरातिपक्षक्षयकर्ता तवोदरे चक्रवर्ती तिष्ठति॥ मैवं मैवं साहसाध्यवसायिनी भवती भवत्वित्युक्ते च तस्मात्स्मादनुमरणनिर्बंधाद्वि

विष्णु॰
८
रराम॥तेनैवभगवतास्वाश्रममानीयत॥कतिपयदिनाभ्यंतरेचसहैवतेनगरेणातितेजस्वीबालकोजज्ञे॥तस्यौर्वोजातकर्मादि
कांक्रियांनिष्पाद्यसगरइतिनामचकार॥कृतोपनयनंचैनंऔर्वोवेदशास्त्राण्यस्त्रंचाग्नेयंभार्गवाख्यंचाध्यापयामास॥उत्पन्न
बुद्धिःस्वमातरमपृच्छत्॥अंबकथमत्रवयंक्वतातोऽस्माकमित्येवमादिपृच्छतस्तन्मातासर्वमवोचत्॥ततःस्वपितृराज्यहरणामर्षि
तोहैहयतालजंघादिवधायप्रतिज्ञामकरोत्॥प्रायशश्चहैहयान्निजघान॥शकयवनकांबोजपारदपह्लवाहन्यमानास्तेकु
लगुरुंवसिष्ठंशरणंययुः॥अथैतान्वसिष्ठोजीवन्मृतकान्कृत्वासगरमाह॥वत्सवत्सालमेभिर्जीवन्मृतकैरनुसृतैरेते
चमयैवत्वत्प्रतिज्ञापालनायनिजधर्मद्विजसंगपरित्यागंकारिताः॥सतथेतिसद्गुरुवचनमभिनंद्यतेषांवेषान्यत्वमकारयत्॥
यवनान्मुंडितशिरसोऽर्धमुंडान्शकान्प्रलंबकेशान्पारदान्पह्लवांश्चश्मश्रुधरान्निःस्वाध्यायवषट्कारानेतानन्यांश्चक्ष
त्रियांश्चकार॥तेनात्मधर्मपरित्यागात्ब्राह्मणैःपरित्यक्ताम्लेच्छतांययुः॥सगरोपिस्वमधिष्ठानमागत्यअस्खलितचक्रः
सप्तद्वीपावतीमिमांभुवंशशास॥इतिश्रीविष्णुपुराणेचतुर्थेंशेतृतीयोध्यायः॥ ॥३॥ ॥पराशरउवाच॥कस्यपतन
यासुमतिर्विदर्भराजतनयाचकेशिनीद्वेभार्येसगरस्यास्तां॥ताभ्यांचापत्यार्थंऔर्वःपरमेणसमाधिनाराधितोवरमदादेका
वंशधरमेकंपुत्रंअपरषष्टिंपुत्रसहस्राणिजनयिष्यतियस्यायदभिमतंतदिच्छयागृह्यतां॥इत्युक्तेकेशिनीपुत्रमेकसुम
तिःषष्टिंपुत्रसहस्राणिवव्रे॥तथेतिचर्षिणाभिहितेऽल्पैरेवाहोभिःकेशिनीपुत्रमेकंअसमंजसनामानमसूयत॥कश्यपत
चतु॰
८

नयायास्तुसुमत्याःषष्टिंपुत्रसहस्राण्यभवंतस्मादसमंजसोऽंशुमान्नामकुमारोजज्ञे॥सत्वसमंजाबाल्यादेवापवृत्तःपिताचा
स्याचिंतयदतीवबालोऽबुद्धिमान्भविष्यतीअयतत्रापिवयस्यतीतेतच्चरितमैवेनंतत्याज॥तान्यषष्टिसहस्राणिकुमाराणां
असमंजसश्चरितमनुचक्रुः॥ततश्चअसमंजसश्चरितानुकारिभिःसागरैरपध्वस्तयज्ञादिसन्मार्गेजगतिदेवाःसकलविद्या
मयमसंस्पृष्टमशेषदोषैर्भगवतःपुरुषोत्तमस्यांशभूतंकपिलंप्रणम्यतदर्थमूचुः॥भगवन्नेभिःसगरतनयैरसमंजसश्च
रितमनुगम्यते॥इदमेवमेभिरनुसरद्भिर्जगद्भविष्यतीत्यार्त्तजगत्परित्राणायचभगवतोऽत्रशरीरग्रहणमित्याकर्ण्यभगवा
नल्पैरेवैतेदिनैर्विनंक्ष्यंतीत्युक्तवान्॥तत्रांतरेचसगरोहयमेधमारेभे॥तत्रचपुत्रैरधिष्ठितमस्याश्वंकोप्यपहृत्यभुवोंतंबिलंवि
वेश॥ततश्चतत्तनयाश्चअतिनिर्बंधेनवसुधातलंएकैकएकैकयोजनंनिचखान॥ततपातालेचाश्वंपरिभ्रमंतंअवनिपति
तनयास्तेददृशुः॥तस्यैवनातिदूरावस्थितंचभगवंतमपघनेशरत्कालेऽर्कमिवतेजोभिरूर्द्ध्वअधअधश्चाशेषदिशश्चोद्भासमा
नंकपिलर्षिमपश्यत्॥ततश्चउद्यतायुधमुमूर्षवोराजपुत्राःपरस्परमूचुः॥असावेवदुरात्माऽयमस्मदपकारियज्ञविघ्नकर्ताहन्य
तांहन्यतामित्यधावत्॥ततश्चतेनापिभगवताकिंचिदीषत्परिलोचनेनावलोकिताःस्वशरीरसमुत्थेनाग्निनादह्यमानाविने
शुः॥सगरोप्यवगम्यऽश्वानुसारितत्पुत्रबलंअशेषंपरमर्षिकपिलतेजसादग्धंअंशुमंतमसमंजसःपुत्रमश्वानयनाययु
योज॥सतुसगरतनयखातमार्गेणकपिलमुपगम्यभक्तिनम्रस्तथातथातुष्टाव॥यथैनंभगवानाह॥गच्छेनंमहाभागपि

वि०पु०
१

तामहायाश्वंप्रापयवरंगृहाणचपौत्रश्चतेस्वर्गात्गंगामानेष्यति॥अंशुमानेप्याहभगवन्ब्रह्मदंडहता।नामस्मत्पितॄणांस्वर्गायो
ग्यानांस्वर्गप्राप्तिकंरंवरमस्माकंभगवान्प्रयच्छतु।इत्याकर्ण्यतंचाहभगवानुक्तमेवैतत्मयापौत्रस्तेत्रिदिवात्गंगामानेष्यती
तितदंभसास्पृष्टेषुअस्थिभस्मस्वैस्वेतेस्वर्गमारोक्ष्यंतिभगवद्विष्णुपदांगुष्ठविनिर्गतस्यजलस्यैतन्महात्म्यंतयत्तन्नकेवलम
भिसंधिकृतःस्नानाद्युपयोगेषुउपकारकमनभिसंधितमप्यस्यपतितब्राह्मणस्यअस्थिचर्मस्नायु॥कशाद्युत्स्पृष्टंशरीरजंय
दत्रपतितंसद्यःशरीरिणांस्वर्गंनयतीत्युक्तःप्रणम्यचभगवतेश्वमादायपितामहयज्ञमाजगाम।सगरोप्यश्वमासाद्यतंयज्ञं
समापयामास॥अंशुमंतंचात्मजप्रीत्यापुत्रत्वेकल्पितवान्॥तस्याप्यंशुमतोदिलीपःपुत्रोऽभवत्॥ततोभगीरथोयोऽसौगंगांस्व
र्गादिहानीयभागीरथीसंज्ञांचकार॥भगीरथात्श्रुतस्तस्यापिनाभागस्ततोऽबरीषः।तत्पुत्रश्चसिंधुद्वीपःतस्माददयुतयुस्त
त्पुत्रःऋतुपर्णोनलसहायोऽक्षहृदयज्ञोऽभवत्॥ऋतुपर्णपुत्रःसर्वकामःतत्तनयःसुदासःसुदासात्सौदासोमित्रसहनामास
चाटव्यांमृगयामटन्व्याघ्रद्वयमपश्यत्॥ताभ्यांचतद्वनमपमृगंकृतं।सत्वेकंतयोर्बाणेननिजघान।म्रियमाणश्चासोव
तिभीषणाकृतिरतिकरालवदनोराक्षसोऽभवत्॥द्वितीयोपिप्रतिक्रियांतेकरिष्यामीत्युक्त्वांतर्द्धानंजगाम।कालेनगच्छतासौ
दासोयज्ञमयजत्॥परिनिष्ठयज्ञेचाचार्येवशिष्ठेनिष्क्रांतेतद्रक्षोवसिष्ठरूपमास्थाययज्ञावसानेममनरमांसभोजनंदेय
मितितत्संस्क्रियतांक्षणादागमिष्यामीत्युक्त्वानिष्क्रांतः।भूयश्चसूदवेषंकृत्वाराजाज्ञयामानुषमांसंसंस्कृत्यराज्ञेन्यवेदयत्॥

चतु०
१

असावपिहिरण्यपात्रस्थितंमांसमादायवसिष्ठागमनप्रतीक्षोऽभवत्॥आगतायवसिष्ठायनिवेदितवान्॥सचाप्यचिंतयत्
अहोस्यराज्ञोदौःशील्यंयेनैतन्मांसमस्माकंप्रयच्छति।किमेतद्द्रव्यजातमितिध्यानपरोऽभूत्॥अपश्यच्चतन्मानुषमांसंततः
क्रोधकलुषीकृतचेताराजानंप्रतिशापमुत्ससर्ज।यस्मादभोज्यमेतदस्मद्विधानांतपस्विनांअवगच्छन्नपिभागवान्मह्यंद
दातितस्मात्तवैवात्रलोलुपाबुद्धिर्भविष्यतीतिअनंतरंचतेनापिभगवतैवावाभिहितोस्मीत्युक्तेकिंकिंमयैवाभिहितमिति
पुनरपिसमाधौतस्थौ॥समाधिविज्ञानादवगतार्थस्सानुग्रहंतस्मैचकार॥नात्यंतिकमेतत्॥द्वादशाब्दंभविष्यतीतितवभोज
नं।असावपितुप्रगृह्योदकांजलिंमुनिशापदानायोद्यतोभगवानस्मत्कुलगुरुर्नार्हस्येनंकुलदेवताभूतमाचार्यंशप्तुमितिम
दयंत्यास्वपत्न्याप्रसादितः॥सस्यांबुरक्षणायतत्शापांबुनोर्व्यांनचाकाशेपिचिक्षेप।तेनैवस्वपादौसिषेच॥तेनचक्रोधाश्रि
तेनांभसादग्धच्छायौतत्पादौकल्माषतामुपगतौ॥ततःसकल्माषपादसंज्ञामवाप॥वसिष्ठशापाच्चषष्ठेकालेराक्षसस्वभा
वमुपेत्याटव्यांपर्यटन्ननेकशोमानुषानभक्षयत्॥एकदातुकंचिन्मुनिंऋतुकालेभार्यासहसंगतंददर्श।तयोश्चमतिभीषणं
रक्षःस्वरूपमवलोक्यत्रासाद्दंपत्योःप्रधावितयोःब्राह्मणंजग्राह।ततःसाब्राह्मणीबहुशस्तमभियाचितवती।प्रसीदेक्ष्वाकु
कुलतिलकभूतस्त्वंमहाराजमित्रसहोनराक्षसोनार्हसिस्त्रीधर्मसुखाभिज्ञोमयिअकृतार्थायामिमंमस्मद्भर्तारमत्तुंइत्येवं
बहुप्रकारंतस्यांविलपंत्यांव्याघ्रःपशुमिवाभिमतंब्राह्मणमभक्षयत्॥ततश्चातिकोपसमन्विताब्राह्मणीतंराजानंशशाप।

यस्मादेवंमय्यतृप्तायांत्वयायमस्यनिर्भक्षितःतस्मात्त्वमप्यंतकामोपभोगप्रवृत्तःप्राप्स्यसीतिशशाप १

वि०पु०
१०

ग्निंप्रविवेशच॥ततस्तस्यद्वादशाब्दपर्ययविमुक्तपापस्यस्त्रीविषयाभिलाषिणोदमयंतीस्मारयामास॥ततःपरमसौस्त्रीसंभो
गंतत्याज॥वसिष्ठश्चापुत्रेणराज्ञापुत्रार्थमभ्यर्थितोमदयंत्यांगर्भाधानंचकार॥यदाचसप्तवर्षाण्यसौगर्भोनजज्ञे॥ततस्तंगर्भ
मश्मनासादेवीजघान।पुत्रश्चाजायत॥तस्यचाश्मकएवनामाभवदश्मकस्यमूलकोनामपुत्रोऽभवत्॥योसौनिःक्षत्रिये
क्ष्मातलेऽस्मिन्क्रियमाणेस्त्रीभिर्विवस्त्राभिःपरिवार्यरक्षितः।ततस्तंनारीकवचमुदाहरंति॥मूलकाद्दशरथस्तस्मादि
लविलःततश्चविश्वसहस्तस्माच्चखड्वांगोलीपः योऽसौदेवासुराणांसंग्रामेदेवैरभ्यर्थितःअसुरान्जघान।स्वर्गेचकृतप्रि
यैर्देवैर्वरग्रहणायनोदितःप्राह॥यद्यवश्यंवरोग्राह्यस्तन्ममायुःकथ्यतांइत्यनंतरंचतैरुक्तंएकमुहूर्त्तप्रमाणंतवायुरित्युक्ते
चअस्खलितगतिनाविमानेनलघुगोमर्त्यलोकमागत्येदमाह॥यथानब्राह्मणेभ्यःसकाशादात्मापिमेप्रियतमोनचस्वधर्मो
ल्लंघनंमयाकदाचिदप्यनुष्ठितंनचसकलदेवमानुषदक्षपश्वादिकेष्वपिअच्युतव्यतिरेकवतीदृष्टिर्ममाभूत्तथातमेवदेवंमु
निजनानुस्मृतंभगवंतंअस्खलितगतिःप्राप्स्यामीतिअशेषदेवगुरौभगवत्यनिर्देश्यवपुषिसत्तामात्रात्मनिआत्मानंप
रमात्मनिवासुदेवाख्येयुयोज॥तत्रैवचलयमाप॥अत्रापिश्रूयतेश्लोकोगीतःसप्तर्षिभिःपुरा॥खड्वांगेनसमोनान्यःकश्चि
द्दुर्व्यांभविष्यति॥येनस्वर्गादिहागम्यमुहूर्त्तंप्राप्यजीवितं॥त्रयोनुसंधितालोकाबुद्ध्यासत्येनचैवहि॥खड्वांगतोदीर्घबाहुःपु
त्रोऽभवत्॥ततोरघुरभवत्॥तस्मादप्यजः।अजाद्दशरथोदशरथस्यापिभगवानब्जनाभोजगतःस्थित्यर्थंआत्मनो

चतु०
१०

ंशेनरामलक्ष्मणभरतशत्रुघ्नरूपेणचतुर्द्धापुत्रत्वमयासीत्॥रामोपिबालएव।विश्वामित्रयज्ञरक्षणायपथिगच्छन्ताडकां
जघान॥यज्ञेचमारीचमिषुवाताहतंचिक्षेप।सुबाहुप्रमुखांश्चक्षयमनयत्॥दर्शनमात्रेणेवाहिल्यामपापांकार॥जनकगृहे
चमाहेश्वरंचापमनायासेनैवबभंजसीतांचायोनिजांजनकतनयांवीर्यशुल्कांलेभे॥सकलक्षत्रियक्षयकारकंअशेषहैहयकुल
केतुभूतंचपरशुरामंअपास्तवीर्यावलेपंचकार।पितृवचनाच्चागणितराज्याभिलाषोभ्रातृभार्यासमवेतोवनंप्रविवेश।वि
राधखरदूषणादीन्कबंधवालिनौचजघान॥बध्वाचांभोधिंअशेषराक्षसकुलक्षयंकृत्वादशाननापहृतांतद्वधोपहृतकलं
कांअप्यनलशुद्धांअशेषदेवसंस्तूयमानशीलांजनकराजतनयांअयोध्यामानिन्ये॥भरतोपिगंधर्वविषयसाधनायोग्रगं
धर्वकोटीस्तिस्रोजघान।शत्रुघ्नेनाप्यमितबलपराक्रमोमधुपुत्रोलवणोनामराक्षसेश्वरोनिहतोमथुराविनिवेशिता॥
इत्येवमाद्यतुलपराक्रमणैरतिदुष्टनिबर्हणैरशेषस्यजगतोनिष्पादिवनस्थितयोरामलक्ष्मणभरतशत्रुघ्नाःपुनरपिदि
वमारूढाः॥येपितेषुभगवदंशेष्वनुरागिणःकोशलनगरपदास्तेपितन्मनसस्तत्सलोकतामवापुः॥रामस्यकुशलवौपुत्रौ
लक्ष्मणस्यांगदचंद्रकेतूतक्षपुष्कलौभरतस्यसुबाहुशूरसेनौशत्रुघ्नस्य।कुशस्यातिथिरतिथेरपिनिषधःपुत्रोऽभवत्॥नि
षधस्यापिनभःनभस्यपुंडरीकस्तत्तनयःक्षेमधन्वातस्यचदेवानीकस्तस्याप्यहीनगुरहीनगोरपिरुरुस्तस्यापिपारिया
त्रःपारियात्राद्दलःदलाच्छलस्तस्याप्युक्थःउक्थाद्वज्रनाभस्तस्माच्छंखनाभस्तस्माद्ध्युषिताश्वःततश्चविश्वसहो

जज्ञे॥हिरण्यनाभस्ततोयोगीश्वरोजैमिनेःशिष्योयाज्ञवल्क्यात्योगमवाप।हिरण्यनाभस्यपुत्रपुष्यतस्मात्ध्रुवसंधिस्त
तःसुदर्शनस्तस्मादग्निवर्णस्ततःशीघ्रःतस्यापिमरुःपुत्रोभूत्॥योऽसौयोगमास्थायाद्यापिकलापग्राममाश्रितस्तिष्ठति।आ
गामियुगेसूर्यवंशक्षत्रप्रवर्त्तयिताभविष्यति॥प्रशुश्रुतस्तस्यात्मजस्तस्यापिसुसंधिस्ततश्चामर्षःततश्चसहस्वान्तत
श्चविश्रुतवान्तस्मात्बृहद्बलःयोऽर्जुनतनयेनाभिमन्युनाभारतयुद्धेक्षयमनीयत।एतेहीक्ष्वाकुभूपालाःप्राधा
न्येनमयैरिताः॥एतेषांचरितंशृण्वन्सर्वपापैप्रमुच्यते॥ ॥श्रीविष्णुपुराणेचतुर्थेंशेआदित्यवंशः॥ ॥पराशरउवा
इक्ष्वाकुतनयोयोसौनिमिनीम्नासतुसहस्रसंवत्सरंसत्रमारेभे।वसिष्ठंचहोतारंवरयामासतमाहवसिष्ठोहमिंद्रेणपंच
वर्षशतंयागार्थंप्रथमतरंवृतः।तदंतरंप्रतिपालितां॥आगतस्तवापिऋत्विग्भविष्यामीत्युक्तेपृथिवीपतिर्नकिंचिदुक्तवान॥
वशिष्ठोप्यनेनसमन्विच्छितमित्यमरपतेर्यागमकरोत्॥सोपितत्कालमेवान्यैर्गौतमादिभिर्यागमकारयत्॥समाप्तेचामरप
तेर्यागेत्वरावान्वसिष्ठोनिमेर्यागंकरिष्यामीतिआजगाम॥तत्कर्मकर्तृत्वंचतत्रगौतमस्यदृष्ट्वाथस्वपतेतस्मैराज्ञेमाम
प्रत्याख्यायतदनेनगौतमायकर्मांतरमर्पितंयस्मात्तस्माद्विदेहोयंभविष्यतीतिशापंददौ॥प्रतिबुद्धश्चासावनीपतिरपि
प्राह॥यस्मान्मामसंभाष्याजानतएवशयानस्यशापोत्सर्गमसौदुष्टगुरुश्चकारतस्मात्तस्यापिदेहःपतितोभविष्यतीति
प्रतिशापंदत्वादेहमत्यजत्॥तस्माच्चशापात्मित्रावरुणयोस्तेजसिप्रविष्टउर्वशीदर्शनादुद्भूतबीजप्रपातयोस्तयोःसका

शात्वसिष्ठोदेहमपरंलेभे।निमेरपितत्शरीरमतिमनोहरंतैलगंधादिभिरुपसंस्क्रियमाणंनैवक्लेदादिकंदोषमवाप।सद्यो
मृतमिवतस्थौ।यज्ञसमाप्तौचभागग्रहणायदेवानागतान्ऋत्विजऊचुः॥यजमानायवरोदीयतामितिदेवैःस्वछंदितोऽसौनिमि
राह।भगवंतोऽखिलसंसारदुःखसंघातछेत्तारोनह्येतावज्जगत्यन्यद्दुःखमस्ति।यत्शरीरात्मनोर्वियोगोभवतितदहमिच्छामि
सकललोकलोचनेषुवस्तुंनपुनःशरीरग्रहणंकर्तुमित्येवमुक्तेदेवैरसावशेषभूतानांनेत्रेष्वासौचकारितः।ततोभूतान्युन्मेष
निमेषंचक्रुः।अपुत्रस्यतस्यभूभुजःशरीरमराजकभीरवस्तेमुनयःतेऽरणिवन्ममंथुः॥तत्रचकुमारोजज्ञे॥जननाज्जनक
संज्ञामवाप।अभूद्विदेहोऽस्यपितेतिवैदेहः।मथनान्मिथिरभवत्॥तस्योदावसुपुत्रोभूत्॥उदावसोर्नंदिवर्द्धनस्ततश्चसुकेतुस्त
स्माच्चदेवरातस्ततश्चबृहदुक्थः।तस्यबृहदुक्थस्यमहावीर्यस्तस्यापिसुधृतस्ततश्चधृष्टकेतुजायत।धृष्टकेतोःहर्यश्वःतस्य
चमरुर्मरोःप्रतिबंधकःतस्मात्कृतिरथस्तस्यचदेवमिस्तस्यविबुधोविबुधस्यामहाधृतिस्ततश्चकृतिरातस्ततोमहारोमा
तस्यपुत्रोह्रस्वरोमाह्रस्वरोम्णःसीरध्वजोऽभवत्।यस्यपुत्रार्थंयजनभुवंकृषतःसीरेसीतादुहितासमुत्पन्नासीरध्वजस्य
भ्राताकाश्याधिपतिःकुशध्वजनामा।सीरध्वजस्यापत्यंभानुमान्भानुमतःशतद्युम्नस्तस्यचशुचिः।तस्मादूर्जबाहुनामा
पुत्रोजज्ञे।तस्यापिशतध्वजस्ततःकृणिःकृणेरंजनस्तत्पुत्रःऋतुजित्ततोरिष्टनेमिस्तस्मात्श्रुतायुःश्रुतायुषःसुपार्श्वस्तस्मा
त्संजयःततःक्षेमजित्तस्यानेनाःतस्मान्मीनरथःतस्यसत्यरथिःसत्यरथेरुपगुप्तःतस्मात्सुतःश्चशाश्वतस्तस्मात्सुवर्चाः

तस्यापिसुभाषः ततःसुश्रुतस्तस्माज्जयोजयपुत्रोविजयःविजयस्य ऋतः ऋतात्सुनयःसुनयाद्वीतहव्यःतस्माद्धृतिर्धृते
र्बहुलाश्वः तस्यपुत्रः कृतिः कृसंतिष्टतेयंजनकवंशइत्येतेमैथिलाः प्राचुर्येणैतेषांआत्मविद्याश्रयिणोभूपालाभविष्यंती
ति॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशेपंचमः॥ ॥निमिवंशः॥ ॥मैत्रेयउवाच॥सूर्यस्यभगवन्वंशः कथितोभवतामम॥
सोमस्यवंशेत्वखिलान्श्रोतुमिच्छामिपार्थिवान्॥कीर्त्यतेस्थिरकीर्तीनांयेषामद्यापिसंततिः॥प्रासादसुमुखस्तन्मेब्रह्मन्नाख्या
तुमर्हसिश्रीपराशरउवाच॥श्रूयतांमुनिशार्दूलवंशःप्रथिततेजसः॥सोमस्यानुक्रमात्ख्यातायत्रोर्वीपतयोभवन्॥अयं
हिवंशोतिबलपराक्रमद्युतिशीलचेष्टावद्भिरतिगुणान्वितैर्नहुषययातिकार्त्तवीर्यादिभिर्भूपालैरलंकृतस्तमहंकथयामिश्रू
यतां।अखिलजगत्स्रष्टुर्भगवान्नारायणनाभिसरोजिनीसमुद्भूतादब्जयोनेर्ब्रह्मणःपुत्रोऽत्रिरत्रेःसोमःतंचभगवान्
ब्जयोनिरशेषौषधिद्विजनक्षत्राणामाधिपत्येऽभ्यषेचयतासचराजसूयमकरोत् तत्प्रभावादत्युत्कृष्टाधिपत्याधिष्ठा
तृत्वाच्चैनंमदस्तुविवेशमदाववलेपाच्च।सकलमुसेदेवगुरोर्बृहस्पतेस्तारांनामपत्नींजहार।बहुशश्चबृहस्पतिनोदिते
नभगवताब्रह्मणाचोद्यमानःसकलैर्देवर्षिभिर्याच्यमानोपिनमुमोच॥तस्यहिबृहस्पतिद्वेषादुशनाःपार्ष्णिग्राहोऽभव
त्॥अंगिरसश्चसकाशात्लब्धविद्योभगवान्रुद्रोबृहस्पतेःसाहाय्यमकरोत्॥यतश्चोशनास्ततोजंभकुंभाद्याःसमस्ता
एवदैत्यदानवनिकायामहांतमुद्यमंचक्रुः।बृहस्पतेरपिसकलदेवसैन्यैःसहायःशक्रोभवत्॥एवंचतयोरतीवोग्रःसंग्रा

मस्तारानिमित्तःतारकामयोनामाभवत्॥ततश्चसमस्तशस्त्राणिअसुरेषुरुद्रपुरोगमादेवादेवेषुचाशेषदानवामुमुचुः।एवंच
देवासुराहवक्षोभक्षुब्धहृदयंअशेषमेवजगत्ब्रह्माणंशरणंजगाम॥ततश्चभगवानप्युशनसंशंकरमसुरान्देवांश्चनिवार्यबृ
हस्पतयेतारामदात।तांचांतःप्रसवांअवलोक्यबृहस्पतिराह॥नैषममक्षेत्रेभवत्यान्यसुतोधार्यःतदुत्सृजैनंअलमलमति
धार्ष्ट्येनेति।साते।सातेवमुक्तापतिव्रताभर्तृवचनात्तमिषीकास्तंबेगर्भमुत्ससर्ज।सचोत्सृष्टमात्रएवातितेजसादेवानां
तेजांसिआचिक्षेप॥बृहस्पतिमिंदुंचतस्यकुमारस्यातिचारुतयामाभिलाषौदृष्ट्वादेवाःसमुत्पन्नसंदेहास्तारांपप्रच्छुः।सत्यंक
थयास्माकमतिसुभगेसोमस्याप्यबृहस्पतेरयंपुत्रइत्युक्तासाताराह्रियाकिंचिन्नोवाच॥बहुशोप्यभिहितायदासौदेवेभ्यो
नाचचक्षे॥ततःसकुमारस्तांशप्तुमुद्यतःआहच॥ष्टेकस्मान्ममतातंनाख्यास्यदैवतेऽलीकलज्जावत्यास्तथाशास्तिमयमहं
करोमियथनैमन्याप्यतिमंदवैरेत्रनाभविष्यतीति॥अथभगवान्पितामहस्तंकुमारंसंनिवार्यस्वयमपृच्छत्तारांकथयवत्सेक
स्यायमात्मजः॥सोमस्याथबृहस्पतेरितिउक्ताल्लज्जमानाहसोमस्येति।ततःस्फुरदुच्छ्वसितामलकपोलकांतिर्भगवानुडु
पतिरालिंग्यकुमारंसाधुसाध्विवत्सप्राज्ञोसीतिबुधइतिनामचक्रे॥आख्यातमेवैतत्यथाइलायामात्मजपुरूरवस
मुत्पादयामास।पुरूरवास्त्वतिदानशीलोऽतियज्वातितेजस्वीयंसत्यवादिनंअतिरूपिणंमित्रावरुणयोःशापात्मानुषेलो
केवस्तव्यंमयेतिकृतमतिरुर्वशीददर्श।दृष्टमात्रेचतस्मिन्नपहायमानंअशेषमपास्यस्वर्गाभिलाषंतन्मनस्काभूत्वा

तमेवोपतस्थेसोपितामतिशायितसकललोकस्त्रीकांतिसौकुमार्यलावण्यगतिविलासहासादिगुणामवलोक्यतदायतचित्तवृ
त्तिर्बभूव॥उभयमपितन्मनस्कमनन्यदृष्टिपरित्यक्तसमस्तान्यप्रयोजनमभूत॥राजातुप्रागल्भ्यात्तामाह॥सुभ्रूत्वाम
भिकामोस्मिप्रसीदअनुरागवतिअनुरागमुद्वहइत्युक्तालज्जावखंडितमुर्वशीप्राह॥भवत्वेवंयदिमेसमयपरिपालनंभ
वान्करोति।आख्याहिमेसमयंअथपृष्टापुनरप्यब्रवीत॥शयनसमीपेममोरणकद्वयंपुत्रभूतंनापनेयंभवांस्तुनग्नोम
यानद्रष्टव्यःमैथुनाद्विना।घृतमात्रंचममाहारइत्येवमेवेतिभूपतिराह।तयाचसहभूपतिरलकायांचैत्ररथादिवनेषुअ
मलपद्मखंडेषुचमानमासादिषुसरस्सुअतिरमणीयेषुरममाणएकषष्टिवर्षाण्यनुदिनंवर्द्धमानप्रमोदोऽनयत्।उर्वसी
चतदुपभोगात्प्रतिदिनवर्द्धमानानुरागाअमरलोकवासेपिस्पृहांनचकार॥विनाचोर्वस्यासुरलोकोप्सरसांसिद्धगंध
र्वाणांचनातिरमणीयोऽभूत्॥ततश्चोर्वसीपुरूरवसोःसमयविद्विश्वावसुःगंधर्वःसमचेतोनिशिशायनाभ्यासादेकंउरणकं
जहार।तस्यचाकाशेनीयमानस्योर्वसीशब्दमशृणोत्॥आहच॥ममानाथायाःपुत्रःकेनाप्यपह्रियतेकंशरणमुपयामि।
इत्याकर्ण्यराजामांनग्नंदेवीद्रक्ष्यतीतिनययौ॥यथान्यमुरणकमादायगंधर्वाययुः।तस्याप्यपह्रियमाणस्याकर्ण्येशब्दं
आकाशेपुनरप्यनाथास्म्यहमभर्तृकाकुपुरुषाश्रयेत्यार्तरूपिणीबभूवह॥राजाप्यमर्षवशादंधकारमेतदितिखड्गमुपा
दायदुष्टदुष्टहतोसीतिव्याहरन्नभ्यधावत्॥तावच्चगंधर्वैरप्यतीवोज्वलविद्युज्जनिता।तत्प्रभायाचोर्वशीराजानमपगतां

DR. BHAU DAJI MEMORIAL

बरंदृष्ट्वाप्रवृत्तसमयातत्क्षणादेवाप।क्रांतापरित्यज्यतावप्युरणकौगंधर्वाःसुरलोकमुपागताः।राजापिचतौमेषावादायातिहृ
ष्टमनाःस्वशयनमायातोनोर्वसींददर्श।तांचापश्यन्नपगतांबरएवउन्मत्तरूपोबभ्राम॥कुरुक्षेत्रेचांभोजसरसिअन्याभि
श्चतसृभिरप्सरोभिःसमवेतामुर्वसींददर्श।ततश्चोन्मत्तरूपोहेजायेमनसितिष्ठघोरेअनेकप्रकारंसूक्तमवोचत्॥आहचो
र्वसी।महाराजालमनेनाविवेकचेष्टितेनअंतर्वत्न्यहमब्दांतेभगवतात्रागंतव्यं।कुमारस्तेभविष्यतिएकांचनिशामहंत्वयास
हवत्स्यामीत्युक्तःप्रहृष्टःस्वनगरमाजगाम॥तासांचाप्सरसामुर्वसीकथयामास॥अयंअपुरुषोयेनाहमेतावंतंकालंअ
नुरागाकृष्टमानसासहोषितेत्येवमुक्तास्ताअप्सरसऊचुः।साधुसाध्वस्यरूपमनेनसहास्माकमपिसर्वकालमास्थाभवे
दिति॥अब्दांतेचपूर्णेसराजातत्राजगाम।कुमारंचायुषमस्मैतदोर्वसीददौ।एकांनिशांतेनराज्ञासहोषित्वापंचपुत्रोत्पत्तयेग
र्भमवाप॥उवाचचैनंराजानं।अस्मत्प्रीत्यामहाराजायसर्वएवगंधर्वावरदाःसंवृत्ताःतद्व्रियतांवरइत्याह।राजाचविजितसका
लारातिरविहतेंद्रियसामर्थ्योबंधुमानमितबलकोशोनान्यदस्माकमुर्वसीसालोक्यादप्राप्यमस्ति।तदहमनयासहोर्वस्याका
लं।नतुमभिलषामीत्युक्तेगंधर्वाराज्ञेग्निस्थालींददुः।ऊचुश्चैनं।अग्निमाम्नायानुसारीभूत्वात्रिधाकृत्वाउर्वसीसालोकता
मनोरथमुद्दिश्यसम्यक्यजेथाः।ततोवश्यमभिलषितमवाप्स्यसीतिउक्तस्तामग्निस्थालीमादायजगाम॥अंतराटव्यांसोऽ
चिंतत्याज।स्वपुरंचाजगाम।व्यतीतार्द्धरात्रेनिद्रश्चाचिंतयन्ममोर्वसीसालोक्यप्राप्त्यर्थंअग्निस्थालीगंधर्वैर्दत्तासाचमयाअ

वि०पु०
१४

टव्योपरित्यक्तानदहंतत्राहरणाययास्यामीत्युक्त्वायतत्राप्युपगतोनाग्निमपश्यत्॥ शमीगर्भमश्वत्थंअग्निस्थानेदृष्ट्वाचिंतयत्
मयात्रस्थालीनिक्षिप्तासचश्वत्थःशमीगर्भोभूत्॥ तदेनमेवाहमग्निरूपमादायस्वपुरमभिगम्यारणिंकृत्वादुत्पन्नाग्नेरुपास्तिं
करिष्यामीत्येवमेवस्वपुरमभिगतोऽरणींचकार। तत्प्रमाणंचांगुलैःकुर्वन्गायत्रीमपठत्॥ पठतश्चाक्षरसंख्यान्येवांगुलानि
अरणिरभवत्। तत्राग्निंनिर्मथ्याग्नित्रयमाम्नायानुसारीभूत्वाजुहाव। उर्वसीसालोक्यतांचफलमभिसंधितवान्॥ तेनैवचा
ग्निविधिनाबहुविधान्यज्ञानिष्ट्वागंधर्वलोकानवाप्योर्वस्यासहनियोगेनावाप। एकोग्निरादावभवत्ऐलेनत्वत्रमन्वंतरेत्रेता
प्रवर्तितेति॥ ॥श्रीविष्णुपुराणेचतुर्थेंशेषष्टोध्यायः॥छ॥ ॥श्रीपराशरउवाच॥ तस्याप्यायुर्धीमानमावसुर्विश्वायुश्शतायु
शतायुःश्रुतायुसंज्ञाःषट्पुत्राअभवन्। अमावसोर्भीमोनामपुत्रोभवत्। भीमस्यकांचनःकांचनात्सुहोत्रस्तस्यापिजह्नुःयो
सौयज्ञवाटमखिलंगंगांभसाप्लावितमवलोक्यक्रोधसंरक्तलोचनोभगवंतंयज्ञपुरुषंआत्मनिपरमेणसमाधिनासमारोप्य
खिलामेवगंगामपिबत्। अथैनंदेवर्षयःप्रसादयामासुः। दुहितृत्वेचास्यगंगामनयत्। जन्होश्चसुजन्हुनामामूर्त्तरयामा
वश्चत्वारःपुत्राबभूवुः। तेषांकुशांबःशक्रतुल्योमेपुत्रोभवेदितितपश्चकार। तंचोग्रंतपसमवलोक्यमाभवत्वन्योऽस्म
तुल्यवीर्यइत्यात्मनैवास्येंद्रःपुत्रत्वमगच्छत्। सगाधिर्नामकौशिकोभवत्। गाधिश्चसत्यवतींकन्यामजनयत्। तांचभार्ग
वऋचिकोवव्रे। गाधिरप्यतिरोषणायातिवृद्धायब्राह्मणायदातुंनिच्छन्नेकतःश्यामकर्णानांइंदुवर्चसामनिलरंहसांअश्वा

चतु०
१४

मपुत्रोऽभवत्। तस्याप्यजकःततोबलाकाश्वस्तस्मात्कुशःकुशस्यकुशांबःकुशनाभ

नांसहस्रंकन्याशुल्कमयाचत। तेनाप्यृषिणामवरुणसकाशादुपलभ्याश्वतीर्थोत्पन्नंतादृगश्वसहस्रंदत्तं। ततस्तामृचिकःकन्यामुप
येमे। ऋचीकस्यश्चतस्याश्चरुपपत्यर्थंचकार। तत्प्रसादितश्चतन्मात्रेक्षत्रियवरपुत्रोत्पत्तयेचरुमपरंसाधयामास। एसऋैवि
रुर्भवत्याअयमपरस्त्वन्मात्रासम्यगुपयोज्यइत्युक्त्वावनंजगाम। उपयोगकालेचतांमातासत्यवतीमाह। पुत्रिसर्वएवात्मनःपुत्र
मतिगुणाभिलषति। नात्मजायाभ्रातृगुणेषुअतीवादृतोभवतीतितदर्हसिममत्वमात्मीयंचरुंदातुंमदीयंचरुमात्मनोपयोक्तुं
मत्पुत्रेणहिसकलभूमंडलपरिपालनंकार्यंकियद्ब्राह्मणमाबलवीर्यसंपदित्युक्तासास्वंचरुंमात्रेदत्तवती। अथवनादभ्यागत्य
सत्यवतीमृषिरपश्यत्। आहचैनां। अतिपापेकिमिदमकार्यंभवत्याकृतमितिरौद्रंवपुरालक्ष्यतेनूनंत्वयात्वन्मातृश्चरुरुप
युक्तोनयुक्तमेतत्। मयाहितत्रचरौसकलैश्वर्यशौर्यवीर्यसंपदारोपिता। त्वदीयचरावप्यखिलशांतिज्ञानतितिक्षादिकाब्राह्मण
गुणसंपदश्चविपरीतंकुर्वत्यास्तवातिरौद्रास्त्रधारणनिष्ठःक्षत्रियाचारःपुत्रोभविष्यत्यस्याश्चोपशमरुचिर्ब्राह्मणाचारःइत्या
कर्ण्येवसातस्यपादौजग्राह। प्रणिपत्यचैनमाह। भगवन्मयैतदज्ञानादनुष्ठितंप्रसादंमेकुरु। मैवंविधःपुत्रोभवतु। काममेवं
विधःपौत्रभवत्वित्युक्तेमुनिरप्याह। एवमस्त्वित्यनंतरंसाजमदग्निमजीजनत्। तन्माताचविश्वामित्रंजयामास। सत्यवतीच
कौशिकीनामनद्यभवत्। जमदग्निरिक्ष्वाकुवंशोद्भवस्यरेणोस्तनयांरेणुकामुपयेमे। तस्यांचाशेषक्षत्रवंशहंतारंपरशुरा
मसंज्ञंभगवतःसकललोकगुरोर्नारायणस्यांशंजमदग्निरजीजनत्। विश्वामित्रपुत्रस्तुभार्गवएवशुनःशेफोदेवैर्दत्तः॥

ततश्चदेवराततनयाभवत्। ततश्चान्येमधुछंदजयकृतदेवाष्टककछपहारीताख्याविश्वामित्रपुत्राबभूवः॥तेषांचबहूनिकौशि
कगोत्राणिऋष्यंतरेवैवाह्यानिवसंतीति॥छ॥ ॥श्रीविष्णुपुराणेचतुर्थेंशेसप्तमोध्यायः॥७॥ ॥पराशरउवाच॥पुरूरवसो
ज्येष्ठपुत्रोयस्त्वायुर्नामासराहोर्दुहितमुपयेमे।तस्यांपंचपुत्रानुत्पादयामास।नहुषक्षत्रवृद्धरंभरजिसंज्ञास्तथैवानेनाःपंचमपुत्रोऽ
भवत्।क्षत्रवृद्धात्सुहोत्रपुत्रोऽभवत्।काश्यस्यलगृत्समदाःसुहोत्रस्यपुत्रास्त्रयोबभूवुः।गृत्समदात्धन्वंतरिसुदीर्घत
मसोऽभवत्।सहिसिद्धकायकरणः।सकलसंभूतिष्वशेषज्ञानविदाभगवतानारायणनचातीतसंभूतावस्मैवरोदत्तःकाशि
राजगोत्रेवतीर्यत्वमष्टधासम्यगायुर्वेदंकरिष्यसियज्ञभागभविष्यसीत्यभिहितः।तस्यधन्वंतरेःपुत्रःकेतुमान्केतुमतोभीमर
थस्तस्यापिहिदिवोदासःदिवोदासात्प्रतर्दनः।सचभद्रसेनवंशविनाशनादशेषाःशत्रवोनेनजिताइतिशत्रुजित्अभवत्
तेनचप्रीतिमताआत्मपुत्रोवत्सवत्सेत्यभिहितस्ततोवत्सोसौअभवत्सत्यपरतयाऋतध्वजसंज्ञामवाप।पुनश्चकुवल
यानामानमश्वंलेभेततश्चकुवलयाश्वइत्यस्यांपृथिव्यांप्रथितस्तस्यचपुत्रोऽलर्कोनामाभवत्।तस्याप्यलर्कस्यसंततिर्ना
माभवदात्मजः।संनतेःसुनीथस्तस्यापिसुकेतुस्तस्माच्चधर्मकेतुजज्ञे।ततश्चसत्यकेतुस्तस्माद्विभुस्तत्तनयःसुविभुःतत
श्चसुकुमारस्तस्यापिधृष्टकेतुस्ततोवीतिहोत्रतस्तेश्चभार्गवःभार्गस्यभार्गभूमिःअतश्चातुर्वर्ण्यप्रवृत्तिरित्येकेकाश्यान्व
याभूभृतःकथिताः।रजेस्तुश्रूयतांसंततिरिति॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशेऽष्टमोध्यायः॥छ॥श्रीपराशरउवाच॥

रजेःपंचपुत्रशतान्यतुलबलपराक्रमवीर्यसाराण्यासन्।देवासुरसंग्रामारंभेचपरस्परवधेप्सवोन्देवाश्चासुराश्चब्रह्माणं
पप्रच्छुः।भगवन्नस्माकंविरोधेकतमःपक्षोजेताभविष्यत्यथाहभगवान्येषामर्थेरजिरात्तायुधोयोत्स्यतीतिअथदैत्यैरुपे
त्यरजिरात्मसाहाय्यदाना। याभ्यर्थितःप्राह।योत्स्येहंभवतामर्थेयद्यममरजयाद्भवतामिंद्रोभविष्यामीत्याकर्ण्यएतत्तैरभि
हितोनवयमन्यथाकरिष्यामोयस्माकमिंद्रःप्रह्लादस्तदर्थमेवायमुद्यमइत्युक्त्वागतेष्वसुरेषुदेवैरप्यसाववनीपतिरेवमेवो
क्तस्तेनापितथैवोक्तेदेवैरिंद्रस्त्वंभविष्यसीतिसमन्विच्छितं।रजिनापिदेवसैन्यसहायेनानेकैर्महास्त्रैस्तदशेषमसुरब
लंनिषूदितं।अवजितारिपक्षश्चेंद्रोरजिचरणयुगलमात्मशिरसानिपीड्याह।उभयत्राणाद्भवानस्मत्पिताअशेषलोका
नांउत्तमोभवान्यस्याहंपुत्रस्त्रिलोकेंद्रःसचापिराजाप्रहस्याह।एवमेवास्त्वनतिक्रमणीयाहिवैरिपक्षादप्यनेकचाटुवाक्य
गर्भाप्रणतिरित्युक्त्वास्वपुरमाजगाम।शतक्रतुरपींद्रवंचकार।स्वर्यातेचरजौनारदर्षिचोदितारजिसुताःशतक्रतुमात्मपि
तृपुत्रमाज्ञायतद्राज्यंयाचितवंतःअप्रदानेचाप्यवजित्येंद्रंअतिबलिनःस्वयमिंद्रत्वंचक्रुःततश्चबहुतिथेकालेऽतीतेबृह
स्पतिमेकांतेदृष्ट्वाअपहृतत्रैलोक्ययज्ञभागःशतक्रतुरुवाच॥बदरीफलमात्रमप्यर्हसिममाप्यायनायपुरोडाशखंडंदातुं
मित्युक्तोबृहस्पतिरूचे।यद्येवंत्वयाहंपूर्वमेवनोदितःस्यांतन्मयात्वदर्थंकिमकर्त्तव्यमित्यल्पैरहोभिस्त्वांनिजंपदंप्रापयि
ष्यामीत्यभिधायतेषामनुदिनाभिचारकंबुद्धिमोहायशक्रस्यतेजोभिवृद्धयेजुहाव।तेचापितेनबुद्धिमोहेनाभिभूयमा

नब्रह्मद्विषोधर्मत्यागिनोवेदवादपराङ्मुखाबभूवुः।ततस्तानपेतधर्माचारानिंद्रोजघान।पुरोहिताप्यायिततेजाश्चत्रिदिवमा
क्रामत्।एतदिंद्रस्यस्वपदव्यावर्त्तनारोहणंश्रुत्वापुरुषःस्वपदभ्रंशंदौरात्म्यंवानाप्नोति।रंभस्त्वनपत्योऽभवत्।क्षत्रवृद्धसुतः
प्रतिक्षत्रःसंजयस्तस्यापिजयस्ततश्चविजयस्तस्माच्चजज्ञेकृतस्तस्यचहर्यश्वस्ततःसहदेवस्तस्माददीनस्तस्यजयसेनःपुत्रः
ततश्चसंकृतिःतत्पुत्रश्चक्षत्रधर्माइत्येतेक्षत्रवृद्धस्य।अतोनहुषवंशंप्रवक्ष्यामः॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंऽशेनवमोध्या
यः॥श्रीपराशरउवाच॥ ॥यतिययातिसंयातिअयातिवियातिकृतसंज्ञानहुषस्यषट्पुत्रामहाबलपराक्रमाबभूवुः।यति
स्तुराज्यंनैच्छत्।ययातिस्तुभूभृदभूत्।उशनसश्चदुहितरंदेवयानींवार्षपर्वणींचशर्मिष्ठामुपयेमे।अत्रानुवंशश्लोकोभवति
।यदुंचतुर्वसुंचैवदेवयानीव्यजायत।द्रुह्युंचानुंचपूरुंचशर्मिष्ठावार्षपर्वणी।काव्यशापाच्चाकालेनैवययातिर्जरामवाप।प्रस
न्नशुक्रवचनाच्चस्वजरांसंक्रामयितुंज्येष्ठपुत्रंयदुमुवाच।त्वन्मातामहशापादकालेनैवजरामामुपस्थिता।तामहंतस्यानुग्र
हात्भवंतंसंचारयाम्येकंवर्षसहस्रंअतृप्तोस्मिविषयेषुत्वद्वयसाविषयानहंभोक्तुमिच्छामि।नात्रभवताप्रत्याख्यानंकर्त्त
व्यमित्युक्तःसयदुर्नैच्छज्जरामादातुंतंचपिताशशाप।त्वत्प्रसूतिर्नराज्यार्हाभविष्यतीति।अनंतरंद्रुह्युं।च।तुर्वसं।अनुं।
चपृथिवीपतिर्जराग्रहणार्थंचस्वयौवनप्रदानाद्याभ्यर्थयामास।तैःअपिरेकैकेनप्रत्याख्यातस्तान्शशाप।अथशर्मि
ष्ठातनयमशेषकनीयांसंतथैवाह।सवाहप्रवणमतिःसबहुमानंपितरंप्रणम्यप्रसादोऽयमस्माकमितिउदारमभिधाय

जराह।स्वकीयंयौवनंस्वपित्रेददौ।सोपिचपौरवंयौवनमासाद्यधर्माविरोधेनयथाकामंयथाकालोपपन्नंयथोत्साहंविषयां
श्चकार।सम्यक्चप्रजापालनमकरोत्।विश्वाच्यासहोपभोगाभुक्त्वाकामानामंनवाप्स्यामीतिअनुदिनेतन्मनस्कोबभूव
अनुदिनंचोपभोगगतःकामानतीवातीरम्यान्मेने॥ततश्चैवमगायत।नजातुकामःकामानामुपभोगेनशाम्यति।हविषाकृ
ष्णवर्त्मेवभूयएवाभिवर्द्धते।यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः।एकस्यापिनपर्याप्तंतस्मात्तृष्णांपरित्यजेत्।यदानकुरुते
भावंसर्वभूतेषुपापकं।समदृष्टेस्तदापुंसःसर्वाःसुखमयादिशः।यादुस्त्यजादुर्मतिभिर्जीर्यतोयानजीर्यते।तांतृष्णांसंत्यजन्प्रा
ज्ञःसुखेनैवाभिपूर्यते।जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः।धनाशाजीविताशाचजीर्यतोपिनजीर्यति।पूर्णंवर्षसहस्रंमे
विषयासक्तचेतसः।तथाप्यनुदिनंतृष्णाममैतेषुभिजायते॥तस्मादेनामहंत्यक्त्वाब्रह्मण्याधायमानसं।निर्द्वंद्वोनिर्ममोभू
त्वाचरिष्यामिमृगैःसह।पराशरउवाच॥पूरोःसकाशादादायजरांदत्वाचयौवनं।राज्येभिषिच्यपूरुंचप्रययौतपसेवनं॥
दिशिदक्षिणपूर्वस्यांतुर्वसुंचसमादिशत्॥प्रतीच्यांचतथाद्रुह्युंदक्षिणायांततोयदुं॥उदीच्यांचतथैवानुंकृत्वामंडलिनोनृ
पान्॥सर्वपृथ्वीपतिंपूरुंसोभिषिच्यययौवनं॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंऽशेदशमोध्यायः॥ ॥पराशरउवाच॥ ॥अ
तःपरंययातेःप्रथमपुत्रस्ययदोर्वंशमहंकथयामि।यत्राशेषलोकनिवासिमनुष्यसिद्धगंधर्वयक्षराक्षसगुह्यककिंपु
रुषाप्सरसोरगविहगदैत्यदानवादित्यरुद्रवस्वश्विमरुतदेवर्षिमुमुक्षुभिःधर्मार्थकाममोक्षार्थिभिःतत्फललाभाय

सदाभिष्टुतापरिछेद्यमाहात्म्यनांशेनभगवाननादिनिधनोविष्णुरवततार।अत्रच।यदोर्वंशंनरःश्रुत्वासर्वपापैःप्रमुच्य
ते।यत्रावतीर्णंविष्ण्वाख्यंपरंब्रह्मनिराकृति।सहस्रजित्क्रोष्टुनलरघुसंज्ञाश्चत्वारोयदोःपुत्रबभूवुः।सहस्रजितःपुत्रः
शत्रुजित्तस्यहैहयवेणुहयास्त्रयःपुत्राबभूवुः।हैहयपुत्रोधर्मस्तस्यापिधर्मनेत्रस्ततःकुंतिःकुंतेसाहांजिस्तत्तनयो
महिष्मान्योसौपुरींमाहिष्मतींनिर्मापयामास।तस्माद्भद्रश्रेण्यस्ततोदुर्दुमस्तस्मात्धनकःधनकस्यकृतवीर्यकृताग्निकृ
तधर्मकृतौजसश्चत्वारःपुत्राः।कृतवीर्यादर्जुनोऽर्जुनःसप्तद्वीपपतिःबाहुसहस्रीसौजज्ञे।योसौभगवदंशंअत्रिकुल
प्रसूतंदत्तात्रेयाख्यमाराध्यबाहुसहस्रमधर्मसेवानिवारण।स्वधर्मेणपृथ्वीजयंधर्मतश्चानुपालनं।अरातिभ्योप
राजयं।अखिलजगत्प्रख्यातपुषाच्च।मृत्युमित्येतान्वरानभिलषितवान्।लेभेच।तेनेयमशेषद्वीपवतीपृथ्वीसम्यक्धर्मे
णपरिपालिता।दशयज्ञसहस्राण्यसावयजत्।तस्यश्लोकोद्यापिगीयते।ननुनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थिवाः।यज्ञै
दानैस्तपोभिर्वाप्रश्रयेणश्रुतेनच।अनष्टद्रव्यताराष्ट्रेतस्याभवत्।एवंपंचासीतिवर्षसहस्राणिअव्याहतारोग्यश्रीब
लपराक्रमोराज्यमकरोत्॥माहिष्मत्यांदिग्विजयाभ्यागतोनर्मदाजलावगाहनक्रीडातिपानमदाकुलेनायत्नेनैवातेना
शेषदेवदैत्यगंधर्वेशाजयोद्भूतमदावलेपोपिरावणःपशुरिवबद्धास्वगरैकांतेस्थापितोयश्चपंचासीतिवर्षसहस्रोपलक्ष
णकालावसानेभगवन्नारायणांशेनपरशुरामेणोपसंहृतः।तस्यचपुत्रशतप्रधानाःपंचपुत्राबभूवुः।शौरसेनहर्ष

णश्वरमधुध्वजजयध्वजसंज्ञाः।जयध्वजात्तालजंघःपुत्रोभवत्।तालजंघस्यतालजंघाख्यंपुत्रशतमासीत्।येषांज्येष्ठो
वीतिहोत्रःतथान्योभरतः।भरतात्वृषेणसंजातोच।वृषणस्यपुत्रोमधुरभवत्।तस्यापिवृष्णिप्रमुखंपुत्रशतमासीत्॥
यतोवृष्णिसंज्ञामेतत्गोत्रमवाप।यादवाश्चयदुनामोपलक्षणाः॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशेयएकादशोध्यायः॥
पराशरउवाच॥क्रोष्टोश्चयदुपुत्रस्यात्मजोवृजिनवान्।ततःस्वाहिःततोरूषंगुः।रूषंगोश्चित्ररथः।तत्तनयः।शशिबिंदुश्चतुर्द
शमहारत्नश्चक्रवर्त्तीअभवत्।तस्यचशतसहस्रपत्नीनामभवत्।दशलक्षसंख्याश्चपुत्राःतेषांपृथुयशाःपृथुकर्मा
पृथुजयःपृथुकीर्त्तिःपृथुदानःपृथुश्रवाःचषट्पुत्राःप्रधाना।तस्यापिरुक्मकवचस्ततःपरावृत्।परावृतोरुक्मेषु।पृथुरु
क्मायामघ।पालित।हरित।संज्ञास्तस्यपंचात्मजाबभूवुः।अत्रापियामघश्लोकोगीयते।भार्यावश्यास्तुयेकेचिद्भविष्यंत्यथ
या वामृताः।तेषांतुमघःश्रेष्ठःशैब्यापतिरभून्नृपं।अपुत्रातस्यसापत्नीशैब्यानामतथाप्यसौ।अपत्यकामोपिभयान्ना
न्यांभार्यामविंदत।सत्वेकदातिप्रभूतगजतुरगरथपदातिसंमर्द्दनातिदारुणेमहाहवेयुध्यमानाःसकलमेवारिचक्र
मजयत्।तच्चारिचक्रमपास्तपुत्रकलत्रबंधुबलकोशंस्वमधिष्टानंपरित्यज्यदिशःप्रविहृतं।तस्मिंश्चविद्रुतेतित्रासात
लोलायतलोचनयुगलंत्राहितातोबभ्रातरित्याकुलविलापविधुरंराजकन्यारत्नमद्रक्षीत्।तद्दर्शनाच्चतस्यामनुरागा
अनुगतांतरात्मासनृपोऽचिंतयत्।साधिदंममापत्यरहितस्यवंध्याभर्त्तुःसांप्रतंविधिनापत्यकारणंकन्यारत्नमुपा

दितंतदेतदुद्वाहाय्यवैनांस्यंदनमारोप्यस्वमधिष्ठानंनयामितयैवदेव्याशैब्ययाहमनुज्ञातःसमुद्वक्ष्यामीतथैनांरथमारोप्याग
च्छत्। विजयिनंचराजानंअशेषपौरभृत्यपरिजनामात्यसमवेताशैब्याद्रष्टुमधिष्ठानद्वारमागता। साचावलोक्यराज्ञःसव्यपार्श्व
वर्त्तिनींकन्यांईषदुद्भूतामर्षस्फुरदधरपल्लवाराजानमावोचदतिचपलचित्तअत्रस्यंदनेकेयमारोपिता। इत्यसावप्यनालोचितो
त्तरवचनोऽतिभयात्तामाह। स्नुषाममेयमिति। अथैनांशैब्योवाच। नाहंप्रसूतापुत्रेणपत्नीनान्याभवत्तव। स्नुषासंबंधदात्येषा
कतमेनसुतेनते॥ पराशरउवाच। इतीर्षाकोपकलुषीतवचनमुषितविवेकोभयाद्दुरुक्तपरिहारार्थइदमवनीपतिराह। यस्तेज
निष्यत्यजस्तस्येयमनागतमेवभार्यानिरूपितेत्याकर्ण्यउद्भूतमृदुहासातथेत्याह। प्रविवेशचराज्ञासहाधिष्ठानंइत्यनंतरंचा
तिशुद्धलग्नहोरांशकावयवोक्तकृतपुत्रजन्मालापगुणाद्वयसःपरिणाममगतापिशैब्यास्वल्पैरहोभिर्गर्भमवाप। कालेनच
कुमारमजीजनत्। तस्यचविदर्भइतिपितानामचक्रे। सचतांस्नुषामुपयेमे॥ तस्यांचासौक्रथकैशिकसंज्ञौपुत्रावजनयत्। पुनस्तृ
तीयंरोमपादसंज्ञंकुमारमजीजनत्। रोमपादात्बभ्रुबभ्रोःपुत्रोधृतिःकैशिकस्यापिचेदिःपुत्रोभूत्। यस्यसंततौचैद्याभूपालाः
क्रथस्यस्नुषापुत्रस्यकुंतिरभवत्। कुंतेर्वृष्णिर्वृष्णेर्निर्वृतिर्निर्वृत्तेर्दशार्हस्ततस्तव्योमातस्मादपिजीमूतस्तस्यापिविकृतिस्ततश्च
भीमरथस्तस्मान्नवरथस्तस्माद्दशरथस्ततश्चशकुनिस्तत्तनयःकरंभिःकरंभेर्देवरातोऽभवत्। तस्माद्देवक्षत्रस्तस्यमधुर्मधोः
कुरुवत्सस्ततस्त्वनुतःपुरुहोत्रोजज्ञे। ततश्चांशुस्ततश्चसत्वतःसत्वतादेतेसात्वताः। इत्येतांयामथसंततिंसम्यक्श्रद्धासमन्वि

तः। श्रुत्वाअनपत्योनजायते॥७॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशे॥१२॥ श्रीपराशरउवाच॥ भजिनभजमानदिव्यांधकदेवा
वृधमहाभोजवृष्णिसंज्ञाःसात्वतस्यपुत्राबभूवुः। भजमानस्यनिमिकृकणवृष्णयस्तथान्येतद्वैमात्राःशताजितसहस्रजिदयुताजि
त्संज्ञाः। देवावृधस्यापिबभ्रुःपुत्रोभवत्। तस्याचायंश्लोकोगीयते॥ यथैवाशृणुमोदूरात्संपश्यामस्तथांतिकात्। बभ्रुःश्रेष्ठो
मनुष्याणांदेवैर्देववृधःसमः। पुरुषाःषट्चषष्टिश्चषट्सहस्राणिचाष्टच॥ येमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि॥ महा
भोजस्त्वतिधर्मात्मातस्यान्वयेभोजामार्त्तिकावताबभूवुः॥ वृष्णेःसुमित्रोयुधाजिच्चपुत्रोऽभवत्॥ ततश्चानमित्रशनीताथ्याऽन
मित्रान्निघ्नस्तस्यप्रसेनसत्राजितौ। तस्यतुसत्राजितस्यभगवानादित्यःसखाभवत्॥ एकदातंभोधितीरसंश्रयःसूर्यंस
त्राजित्तुष्टाव। तन्मनस्कतयाचभास्वानभिष्टूयमानोऽग्रतस्तस्यतस्थौ॥ अस्पष्टमूर्त्तिधरंचैनमवलोक्यसत्राजितःसूर्यमा
ह॥ यथैवव्योम्निवह्निपिंडोपममहमपश्यंतथैवाद्याग्रतोगतमप्यत्रोनकिंचिद्भगवताप्रसादीकृतंविशेषमुपलक्षयामीत्युक्ते
भगवतासूर्येणनिजकंठादुन्मुच्यस्यमंतकनामामहामणिरवतार्यैकांतेन्यस्तः। ततस्तमाताम्रोज्ज्वलह्रस्ववपुषमीषदापिंग
लनयनमादित्यमद्राक्षीत्॥ कृतप्रणिपातस्तवादिकंसत्राजितमाहभगवान्। वरमस्मत्तोऽभिमतंवृणीष्वेति। सचत
देवमणिरत्नमयाचत्। सचापितस्मैतद्दत्त्वावियतिस्वधिष्ण्यमारुरोह॥ सत्राजिताप्यमलमणिरत्नसनाथकंठतयासूर्य
इवतेजोभिरशेषदिगंतराण्युद्भासयन्द्वारकांविवेश। द्वारकावासिनस्तुतमायांतमवेक्ष्यभगवंतमादिपुरुषंपुरुषोत्त

वि॰पु॰
१९

मंअवनिभारावतारणायांशेनमानुषरूपधारिणंप्रणिपत्योचुः॥भगवन्भगवंतमयंद्रष्टुआयात्यादित्य।इत्याकर्ण्यप्रह
स्यवचनानाहभगवान्नायमादित्यःसत्राजितोयंआदित्यदत्तंस्यमंतकाख्यंमहामणिरत्नंबिभ्रदत्रोपयाति॥तदेनंविश्रब्धाः
पश्यंतइत्युक्तास्तेययुः।सचतंस्यमंतकमहामणिरत्ननिवेशनेचक्रे॥प्रतिदिनंचतन्महामणिरत्नप्रवरंअष्टौकनकभारा
न्स्रवतितत्प्रभावाच्चसकलस्यैवराष्ट्रस्यउपसर्गानावृष्टिव्यालाग्निहोयदुर्भिक्षाभयंनभवति।अच्युतोपितद्दिव्यरत्नमुग्र
सेनस्यभूपतेर्योग्यमेतदितिलिप्सांचक्रे॥गोत्रभेदभयात्शक्तोपिनजहार॥सत्राजितोपिअच्युतोमामेतद्याचयिष्यतीत्यवग
तरत्नलोभःस्वभ्रात्रेप्रसेनायतद्रत्नमददात्।तच्चशुचिनाध्रियमाणमशेषमेवसुवर्णस्रावादिकंगुणजातमुत्पादयति।अ
न्यथाधारयंतंएवहंतीत्यविपिप्रसेनःकंठसक्तेनतेनस्यमंतकेनाश्वमारुह्याटव्यांमृगयामगच्छत्।तत्रसिंहाद्वधमवाप॥सा
श्वंचतंनिहत्यसिंहोप्यमलंमणिरत्नमास्याग्रेणादायगंतुमभ्युद्यतः॥ऋक्षाधिपतिनाजांबुवतादृष्टोघातितश्च।जांबवानप्य
मलंतन्मणिरत्नमास्यादायस्वबिलंप्रविवेश॥सुकुमारकसंज्ञायचबालकायक्रीडनकमकरोत्।अनागच्छतिचतस्मिन्प्र
सेनेकृष्णोमणिरत्नमभिलषितवान्॥नचप्राप्तवान्नूनमेतदस्यकर्मनान्येनप्रसेनोहतइतिअखिलएवयदुलोकःपरे
स्परंकर्णाकर्ण्यकथयत्।विदितलोकापवादश्चभगवान्यदुसैन्यपरिवारःप्रसेनाश्वपदवीमनुससार।ददर्शचाश्वसमा
वतंप्रसेनंसिंहेनविनिहतंअखिलजनमध्येचसिंहपदंदर्शनकृतपरिशुद्धिःसिंहपदमनुसमार।ऋक्षविनिहतंसिंहमप्य

चतु॰
१९

न्येभूमिभागेदृष्ट्वाततश्चतद्रत्नगौरवात्ऋक्षस्यापिपदान्यनुययो।गिरितटेचसकलमेवतत्यदुसैन्यमवस्थाप्यतत्पदानुसारी
ऋक्षबिलंप्रविवेश।अर्द्धप्रविष्टोधात्र्याःसुकुमारकमुल्लापयंत्यावाणींशुश्राव।सिंहप्रसेनमवधीत्सिंहोजांबवताहतः।सुकुमारक
मारोदीःतवह्येषस्यमंतकः।इत्याकर्ण्यचोपलब्धस्यमंतकोबिलंप्रविवेश।प्रविष्टकुमारक्रीडनकीकृतंचधाआहस्तेतेजोभिर्ज्व
ल्यमानंस्यमंतकंददर्श।तंचस्यमंतकाभिलाषिचक्षुषमपूर्वपुरुषमागतमवेक्ष्यत्रीत्राहित्राहीतिव्याजहार।तदार्त्तनादश्रवणा
दानंतरंचामर्षपूर्णहृदयःसजांबवानाजगाम।तयोश्चपरस्परमुद्धतामर्षयोर्युद्धमेकविंशतिदिनान्यभवत्।तेचयदुसैनिकास्त
त्रसप्ताष्टदिनानितन्निष्क्रांतिमुदीक्षमाणास्तस्थुः।अनिष्क्रममाणेचमधुरिपौअसाववश्यमंतर्बिलेस्यंतनाशमाप्तोभविष्यत्य
न्यथातस्यजीवतः।कथमेतावंतिदिनानिशत्रुजयेव्याक्षेपोभवतीतिकृताध्यवसायाद्वारकामागत्यहतःकृष्णइतिकथयामा
सुः।तद्बांधवाश्चतत्कालोचितमखिलक्रियाकलापंचक्रुः।तस्यचास्ययुध्यमानस्यातिश्रद्धादत्तविशिष्टपात्रोपयुक्तान्नतो
यादिनाकृष्णस्यबलप्राणपुष्टिरभूत्।इतरस्यानुदिनमतिगुरुपुरुषभिद्यमानस्यअतिनिष्ठुरप्रहारपातपीडिताखिलावयवस्य
निराहारतयाचबलहानिः।निर्जितश्चभगवताजांबवान्प्रणिपत्यव्याजहार।असुरसुरयक्षगंधर्वराक्षसादिभिरपिअ
खिलैर्भगवान्जेतुंशक्यः॥किमुतावनिगोचरैरल्पवीर्यैर्नरावयवभूतैश्चतिर्यग्योन्यनुभूतिभिःकिंपुनरस्मद्विधैः।अव
श्यंभगवतोअस्मत्स्वामिनोनारायणस्यसकलजगत्परायणस्यांशेनभवताभवितव्यं।इत्युक्तस्तस्मैभगवानखिलमव

निभारावतारमाचचक्षे। प्रीत्याभ्यंजितकरतलस्पर्शिनेनचैनमपगतयुद्धखेदंचकार। सचप्रणिपत्यैनंपुनरपिप्रसाद्यजांब
वतीकन्यांगृहागतायार्घभूतांग्राहयामास। स्यमंतकमणिमपिप्रणिपत्यतस्मैददौ। अच्युतोप्यतिप्रणतात्तस्मादग्राह्य
मपितन्मणिरत्नमात्मसंशोधनायजग्राह। सहजांबवत्याद्वारकामाजगाम। भगवदागमनोद्भूतहर्षोत्कर्षचद्वारकावासिज
नस्यकृष्णावलोकनात्तत्क्षणमेवातिपरणतवयसोपिनवयौवनमिवाभवत्। आनाकदुंदुभिंचदिष्ट्यादिष्ट्येतिसकल
यादवाःस्त्रियस्यसंभाजयामासुः। भगवानपियथानुभूतमशेषयादवसमायेजेयथावदाचचक्षे। स्यमंतकंचसत्राजिता
यात्वामिथ्याभिशस्तिविशुद्धिमवाप। जांबवतींचातःपुरेनिवेशयामास। सत्राजितोपिमयास्याभूतमलिनमारोपितमिति
जातसंत्रासःस्वसुतांसत्यभामांभगवतेभार्यांददौ। तांचाक्रूरकृतवर्मशतधनुःप्रमुखायादवाःप्रागवरयांबभूवुः। ततस्त
त्प्रदानादवज्ञातमिवात्मानंमन्यमानाःसत्राजितेवैरानुबंधंचक्रुः। अक्रूरकृतवर्मप्रमुखाश्चशतधन्वानमूचुः। अयमति
दुरात्मासत्राजितोयोऽस्माभिर्भवताचप्रार्थितोप्यात्मजामस्मान्भवंतंचावगणय्यकृष्णायदत्तवान्। तदलमनेनजीवता
घातयित्वैनंतन्महारत्नंत्वयाकिंनगृह्यते। वयमभ्युपपत्स्यामोयद्यच्युतःतवोपरिवैरानुबंधंकरिष्यतीत्येवमुक्तस्तथे
त्यसावप्याह। जतुगृहदग्धानांपांडुतनयानांविदितपरमार्थोपिभगवान्दुर्योधनप्रयत्नशैथिल्यार्थंकुल्यकरणायवार
णावतंजगाम। गतेचतस्मिन्सुप्तमेवसत्राजितंशतधन्वाजघान। मणिरत्नंचाददे। पितृवधामर्षपूर्णाचसत्यभामाशीघ्रं

स्यंदनमारूढावारणावतंगत्वाभवतेऽहंप्रतिपादितेतक्षांतिमताशतधन्वनाअस्मत्पिताव्यापादितः तच्चस्यमंतकमणिरत्नम
पहृतंतदियमस्माकमवमाननातदालोच्ययद्युक्तंतत्क्रियतामितिकृष्णमाह। तयाचैवमुक्तःपरितुष्टांतःकरणोपिकृष्णः
सत्यभामाममर्षताम्रलोचनःप्राह। सत्येममैवमाननानाहमेतांतस्यदुरात्मनःसहिष्ये। नह्यनुल्लंवरपादपंतत्कृतनीडाश्र
यिणोविवध्यंतेतदामल्पर्थममुनाअस्मत्पुरतःशोकप्रेरितवाक्यपरिवादेनेत्युक्त्वाद्वारकामभ्येत्यैकांतेबलंवावासुदेवःप्रा
ह। मृगयागतंप्रसेनमटव्यांमृगपतिर्जघान। सत्राजितोप्यधुनाशतधन्वनानिधनंप्रापितः। तदुभयविनाशात्तन्मणिरत्नमा
वाभ्यांसामान्यंभविष्यतितदुत्तिष्ठारुह्यतांरथः। शतधनुर्निधनायोद्यमंकुर्वित्यभिहितस्तथेतिसमन्विच्छितवान्। कृतोद्य
मोतावुभावप्युपलभ्यशतधन्वाकृतवर्माणमुपेत्यपार्ष्णिपूरणनिमित्तमनोदयत्। आहचैनंकृतवर्मानाहंबलदेववासु
देवाभ्यांसहविरोधायालमित्युक्तश्चाक्रूरमनोदयत्। असावप्याह। नहिकश्चिद्भगवतापादप्रहारपरिकंपितजगत्त्रयेणा
ऽसुरपुरवनितावैधव्यकारिणा। प्रबलरिपुचक्राप्रतिहतचक्रेण। चक्रिणामदमुदितनयनावलोकिताखिलविशातनेना
तिगुरुवैरिवारणापकर्षणाविष्कृतमहिमोरुसीरिणाचसकलजगद्वंद्यानाममराणामपियोयोद्धुंसमर्थःकिमुताहं। तद
न्यतःशरणंप्रार्थ्यतामित्युक्तः। शतधनुराह। यद्यस्मत्परित्राणासमर्थंभवानात्मानमवगच्छति। तदयमस्मत्तस्तावन्म
णिसंगृह्यरक्ष्यतामित्येवमुक्तःसोप्याह। यद्यंतायामप्यवस्थायांनकस्यचिद्भवान्कथयिष्यतीति। तदहमेनंग्रहीष्या

वि॰पु॰ २१ मितथेत्युक्ते चाक्रूरस्तन्मणिरत्नं जग्राह। शतधनुरप्यतुलवेगां शतयोजनवाहिनीं वडवामारुह्योपक्रांतः। सैन्यसुग्रीवमे
घपुष्पबलाहकाश्वचतुष्टययुक्तरथावेव वासुदेवौ तमनुप्रयातौ। सा च वडवा योजनशतप्रमाणं मार्गमतीता पुनरपि
वाह्यमाना मिथिलावनोद्देशे प्राणानुत्ससर्ज। शतधनुरपि तां परित्यज्य पदातिरेवाद्रवत्। कृष्णोपि बलभद्रमाह। तावद
त्रैव स्यंदने भवता स्थेयं। यावदहमेतमेवाधमाचारं पदातिरनुगम्य यावत्। घातयामि अत्र हि भूभागे दृष्टदोषा हया नैते
अश्वा भवतेमं भूमिभागमुल्लंघ्य नेयाः। तथेत्युक्त्वा बलभद्रो रथस्थ एव तस्थौ। कृष्णोपि द्विक्रोशमात्रं भूमिभागमपसृ
त्य दूरस्थितस्यैव चक्रं क्षिप्त्वा शतधनुषः शिरश्चिच्छेद। तत्शरीरांबरादिषु बहुप्रकारमन्विष्यन्नपि स्यमंतकं नावाप।
यदा तदोपगम्य बलभद्रमाह। वृथैवमस्माभिर्घातितः शतधनुर्न प्राप्तमखिलजगत्सारभूतं तन्मणिरत्नं स्यमंतकाख्यं।
इत्याकर्ण्योद्भूतकोपो बलदेवो वासुदेवमाह। धिक् त्वां यस्त्वमेवमर्थलिप्सुरेतत्ते भ्रातृत्वान्मर्षयेतदयं पंथाः स्वेच्छया गम्यतां।
न मे द्वारकया न त्वया न चाशेषबंधुभिः कार्यं अलमलमेभिर्ममाग्रतोऽलीकशपथैरित्याक्षिप्य तथा तेन प्रसाद्यमानोऽपि न त
स्थौ। विदेहपुरीं प्रविवेश। जनकराजश्चार्घपूर्वकमेनं स्वगृहं प्रवेशयामास। स तत्रैव च तस्थौ। वासुदेवोऽपि द्वारकामाज
गाम। यावच्च जनकराजगृहे बलभद्रोऽवतस्थे। तावद्धार्तराष्ट्रो दुर्योधनस्तत्सकाशाद्गदाशिक्षामशिक्षयत। अथ वर्षत्रयांते चतु॰
च बभ्रूग्रसेनप्रभृतिभिर्यादवैर्न तद्रत्नं कृष्णेनापहृतमिति कृतावगतिभिर्विदेहपुरं गत्वा बलदेवः संप्रसाद्य द्वारकामानीतः। २१

अक्रूरोप्युत्तममणिसमुद्भूतसुवर्णेर्ध्यानवरतं यज्ञानीजे सवनगतौ हि क्षत्रियवैश्यौ निघ्नन् ब्रह्महा भवतीत्येवं प्रकारं दी
क्षाकवचं प्रविष्ट एव तस्थौ॥ द्विषष्टिवर्षाण्येवं तन्मणिप्रभावात् तत्रोपसर्गदुर्भिक्षमरकादिकं नाभूत्। अथाक्रूरपक्षीयै
र्भोजैः शत्रुघ्ने सात्वतस्य पुत्रे व्यापादिते भोजैः सहाक्रूरो द्वारकामपहायापक्रांतः। तदपक्रांतिदिनादारभ्य तत्रोपसर्ग
व्यालानावृष्टिमरकाद्युपद्रवा बभूवुः। अथ यादवा बलभद्रोग्रसेनसमवेता अमंत्रयन्। भगवानुरगारिकेतनश्च किमिदमे
कदैव प्रचुरोपद्रवागमनमेतदालोच्यतामित्युक्ते। अंधकनामा यदुवृद्धः प्राह अस्याक्रूरस्य पिता श्वफल्को यत्र यत्रा
भूत् तत्र दुर्भिक्षमरकाद्यनावृष्टिप्रभृतिकं नाभूत्। काशिराजस्य विषयेऽन्यनावृष्ट्यां श्वफल्को नीयत। तत्र तत्क्षणादेव देवो व
वर्ष काशिराजपत्न्याश्च गर्भे कन्या पूर्वमासीत् सा च पूर्णेपि प्रसूतिकाले नैव निश्चक्राम। एवं च तस्य गर्भस्य द्वादशवर्षाण्य
निःक्रामतो ययुः। काशिराजश्च तामात्मजां गर्भस्थामाह। पुत्रि कस्मान्न जायसे निष्क्रम्यतामास्यं ते द्रष्टुमिच्छामि। एतां च मात
रं किमिति चिरं क्लेशयसीत्युक्ता गर्भस्थैवं व्याजहार। यद्येतिकेकां गां दिने दिने तात ब्रह्मणेभ्यः प्रयच्छसि तदहमन्यैस्त्रिभि
र्वर्षैरस्माद्गर्भात् तातावश्यं निष्क्रमिष्यामीत्येतच्च तद्वचनमाकर्ण्य दिने दिने ब्राह्मणाय गां प्रादात् सापि तावता कालेन जाता।
ततस्तस्याः पिता गांदिनीति नाम चकार। तां च गांदिनीं कन्यां श्वफल्काय प्रियोपकारिणे गृहागतायार्घभूतां प्रादात्। सा च गांदि
नी प्रतिदिनं यावज्जीवं ब्राह्मणाय गां दत्तवती तस्यामयमक्रूरः श्वफल्काज्जज्ञे। तदस्यैवं गुणमिथुनादुत्पत्तिः कथमस्मिन्

पक्रांते दुर्भिक्षमरकाद्युपद्रवा न भविष्यंतीति तदयमानीयतामलमत्रातिगुणवत्यपराधान्वेषणेनेति यदुवृद्धस्यैतद्वचनमाकर्ण्य
केशवोग्रसेनबलभद्रपुरोगमैर्यदुभिः कृतापराधेपितितिक्षाभवं अभयं दत्वा श्वाफल्किः स्वपुरमानीतः तत्र चागतमात्र
एव ततस्तस्य मणेरनुभावादनावृष्टिमरकदुर्भिक्षव्यालाद्युपद्रवः प्रशाम। कृष्णश्च चिंतयामास सत्यमेतत्कारणं यदयं गांदि
न्यां श्वफल्केनाक्रूरो जनितः सुमहाभाग्यमनावृष्टिदुर्भिक्षमरकाद्युपद्रवप्रतिशमनकारी प्रभवः तन्नूनं अस्य सकाशे मणिः
स्यामंतकाख्यास्तिष्ठतीति तस्य ह्येवंविधाः प्रभवाः श्रूयंते। अपि च यज्ञादनंतरमन्यक्रत्वंतरं च तस्मादन्यत् यज्ञातरं यज
तीत्यल्पोपादानेन चास्य असंशयमत्रासौ वरमणिस्तिष्ठति। इति कृताध्यवसायोऽन्यत्प्रयोजनमुद्दिश्य कलयादवसमाजमात्म
गृह एवाचीकरत्। तत्रोपविष्टेष्वखिलेषु यदुषु पूर्वं प्रयोजनमुपन्यस्य पर्यवसिते च तस्मिन्प्रसंगागतपरिहासकथामक्रू
रेण सह कृत्वा जनार्दनस्तमक्रूरमाह। दानपते जानीम एवं। वयं। यथा शतधन्वना तदिदमखिलजगत्सारभूतं स्यमंतकं म
णिरत्नं समर्पितं। तद्देशराष्ट्रोपकारकं भवतः सकाशे तिष्ठति। तिष्ठतु सर्व एव वयं तत्प्रभावफलभुजः किं त्वेष बलभद्रोऽस्मा
नाशंकितवान् तदस्मत्प्रीतये दर्शयेत्यभिहितः सरत्नः सोऽचिंतयत्। किमत्रानुष्ठेयमन्यथा चेद्ब्रवीमि। अहं तत्केवलांब
रतिरोधानक्षम। इति संचिंत्य तमखिलजगत्कारणभूतं नारायणमहाक्रूरः भगवन्मेतत्स्यमंतकरत्नं शतधनुषा सम
र्पितं अपगते च तस्मिन्नद्य श्वः परश्वो वा भगवान्मां याचयिष्यतीति। एतावंतं कालमतिकृच्छ्रेणाधारयं। अस्य च धारणान

क्लेशेन अहमशेषोपभोगेष्वसंगिमानसो न वेद्मि स्वसुखकलामपि। एतावन्मात्रमप्यशेषराष्ट्रोपकारि धारयितुं न शक्नोतीति
मा भवान्मंस्यत इत्यात्मना न चोदितं। तदिदं स्यमंतकरत्नं गृह्यतामिच्छया यस्याभिमतं तस्य समर्प्यतां। ततोऽसौ वरवस्त्रनिगो
पितानिल्पुकनकसमुद्गकं प्रकटीकृतवान्। ततश्च निष्क्राम्य स्यमंतकमणिं तस्मिन्यदुसमाजे मुमोच। मुक्तमात्रे चना
तिकांत्या तदखिलमास्थानमुद्योतितं। अथाहाक्रूरः स एव मणिर्यः शतधन्वना अस्माकं समर्पितो। यस्यायं स एनं गृह्णा
त्विति। तमालोक्य सर्वयादवानां साधु साध्विति अतिविस्मयमनसां वाचोऽश्रूयंत। तमालोक्यातीव बलभद्रो ममायमच्यु
तेनैव सामान्यः समन्विष्टतः इति कृतस्पृहोऽभूत्। ममेदं पितृधनमित्यतीव च सत्यभामापि स्पृहां चकार। बलसत्यान
ावलोकनात्कृष्णोप्यात्मानं गोचक्रांतरास्थितमिव मेने। सकलयादवप्रत्यक्षं चाक्रूरमाह। एतद्धि मणिरत्नं आत्मसंशोध
नाय एषां यदुनां दर्शितं। एतच्च मम बलभद्रस्य च सामान्यं पितृधनं चैतत्सत्यायाः। नन्यस्यै। तदेतत्तु सर्वकालं शुचिना ब्र
ह्मचर्यगुणवता ध्रियमाणं अशेषराष्ट्रस्योपकारि। अशुचिना ध्रियमाणं आधारमेव हंत्यतोऽहमस्य षोडशस्त्रीसहस्रप
रिहादसमर्थो धारणे। कथं चैतत्सत्यभामा स्वीकरोतु। आर्यबलभद्रेणापि मदिरापानाद्यशेषोपभोगपरित्यागः कार्यः त
दलं यदुलोकोऽहं च बलभद्रः सत्यां च त्वां दानपते प्रार्थयाम एतद्भवानेव धारयितुं समर्थः त्वत्स्थं चास्य राष्ट्रस्योपका
रकं। तद्भवानशेषराष्ट्रनिमित्तं एतत्पूर्ववद्धारयितुं। अन्यन्न वक्तव्यं। इत्युक्तो दानपतिस्तथेत्याह। जग्राह च तन्महारत्नं

वि॰पु
२३

ततःप्रभृत्यक्रूःप्रकटेनैवतेनातिजाज्वाल्यमानेनात्मकंठासक्तेनादित्यइवांशुमालीचचार।इत्येतांभगवतोमिथ्याभिशस्ति
क्षालनांयःस्मरतिनतस्यकदाचिदल्पापिमिथ्याभिशस्तिर्भवव्याहतेंद्रियश्चअखिलपापमोक्षमवाप्नोति।।इतिचतुर्थेंशे
त्रयोदशोध्यायः।।१३।। ।।श्रीपराशरउवाच।अनमित्रसुतःशिनिर्नामाभवत्।तस्यापिसत्यकः।सत्यकेःसात्यकिःयुयुधान
नामा।तस्मादप्यंगः।तत्पुत्रश्चकुणिः।कुणेर्युगंधरइतिशैनेयाः।अनमित्रस्यान्वयेवृष्णिः।तस्मात्स्वफल्कः।तत्प्रभावःकथि
तएव।स्वफल्कस्यान्यःकनीयांश्चित्रकोनामभ्राता।स्वफल्कादक्रूरोगांदिन्यामभवत्।तथोपनेगु।मृदु।रपि।शारमेय।
गिरक्षत्रो।पक्षत्र।शत्रुघ्न।रिप्रमर्दनधर्मदृक्।धृष्ट।गंध।मोह।जेवाह।प्रतिवाहाख्याःपुत्राः।सुताराख्याच।कन्या।देवा।
नुपदेवश्चाक्रूरपुत्रौ।पृथुप्रमुखाश्चित्रकस्यपुत्राबहवोऽभवत्।ककुरभजमानशुचिकंबलबर्हिषाख्यास्तथांतकस्य
चत्वारःपुत्राः।ककुरात्धृष्टः।तस्माच्चकपोतरोमा।ततश्चविरोमा।ततश्चबिरोमा।तस्मादपितुंबरुसखा।भवसंज्ञश्च।
दनोदकदुंदुभिः।ततश्चाभिजित्।ततःपुनर्वसुः।तस्याहुकःपुत्रः।श्चाहुकीकन्या।आहुकस्यदेवकोग्रसेनौद्वौपुत्रौ।देवा।
नुपदेवो।देवरक्षिता।सुदेवकस्यापिचत्वारःपुत्राः।तेषांचवृकदेवीदेवरक्षिताश्रीदेवा।शांतिदेवासहदेवादेवकीचस पवदेवा
प्तभगिन्यःताश्चसर्वाएववसुदेवउपयेमे।उग्रसेनस्यापिकंसान्यग्रोध।सुनाम।कंक।शंकु।भूमि।राष्ट्रपाल।बुद्ध।ए च॰
मुष्टि।तुष्टि।मत्संज्ञाःपुत्राः।कंसा।कंसवतीसुतनू।राष्ट्रपालीकंकाचोग्रसेनतनुजाः।भजमानाच्चविदूरथःपुत्रोऽभवत्। २३

विदूरथात्शूरःशूरात्शमीशमिनःप्रतिक्षत्रःतस्मात्स्वयंभोजः।ततश्चहृदिकःतस्यापिकृतवर्माशतधनुर्देवमीढुषाख्याःपुत्रा
बभूवुः।देवमीढुषस्यापिशूरस्यमार्षानामपत्न्यभवत्।तस्यांचासौदशपुत्राःनजयत्।वसुदेवपूर्वान्वसुदेवस्यजातमात्रस्यैव
एतद्गृहेभगवदंशावतारमव्याहतदृष्ट्यापश्यद्भिर्देवैर्दिव्यानकोदुंदुभयश्चवादिताः।ततदस्यैवानकदुंदुभिसंज्ञामवापा।त
स्यापिदेवभागोदेवश्रुताधृष्टिकुंधकृ।वत्सवान्।दसृंजयंश्याम।श्यामीक।गंडूष।संज्ञानवभ्रातरोभवन्।पृथा।श्रुतदेवा।श्रुति
कीर्ति।श्रुतश्रवा।राजाधिदेवी।चवसुदेवादीनांपंचभगिन्योऽभवन्।शूरस्यचकुंतिर्नामसखा।तस्मैचापुत्रायपृथामात्मजांवि
धिनाशूरोदत्तवान्।तांचपांडुरुवाह।तस्याश्चधर्मानिलशक्रैर्युधिष्ठिरभीमसेनोर्जुनाख्यास्त्रयःपुत्राःसमुत्पादिताः।पूर्वमनू
ढायाश्चभगवताभास्वताकानीनःकर्णोनामपुत्रोऽजन्यत।तस्याश्चसपत्नीनामाभूत्।नासत्यदस्राभ्यामपिनकुलसह
देवौपांडोःपुत्रौजनितौ।श्रुतदेवांतुवृद्धश्रवानामकारूषउपयेमे।तस्यांदंतवक्रोनाममहासुरोजज्ञे।श्रुतकीर्तिमपिकैक
यराजउपयेमे।तस्यांसंतर्दनादयःकैकयाःपंचपुत्राबभूवुः।राजाधिदेव्यां।आवंत्यौ।विंदानुविंदौजज्ञाते।श्रुतश्रवांचेदिरा
जोदमघोषोनामउपयेमे।तस्यांशिशुपालमुत्पादयामास।सहिपूर्वमपिउदारविक्रमःसंपन्नोदैत्यानामादिपुरुषोहिरण्य
कशिरभवत्।यश्चभगवतासकललोकगुरुणाघातितः।पुनरप्यक्षतवीर्यशौसंपत्पराक्रमगुणसमाक्रांतसकलत्रैलोक्य
श्वप्रतापोदशाननोऽभवत्।बहुकालोपभुक्तभगवत्सकाशादवाप्तशरीरपातोद्भवपुण्यफलोभगवतेचराघवरूपेणासो

BHAU DAJI MEMORIAL

BHAU DAJI MEMORIAL

पिनिधनमुपपादित॥चेदिराजदमघोषस्यात्मजः शिशुपालनामाभवत्।शिशुपालत्वेचभगवतोभूभारावतारणायावतीर्णां
शस्यपुंडरीकनयनाख्यस्योपरिद्वेषानुबंधमतितरांचकार।भगवताचनिधनमुपनीतस्तत्रैवपरमात्मभूतेमनसएकाग्रत
यासायोज्यमवाप।भगवान्हिप्रसन्नोयथाभिलषितंददाति।अप्रसन्नोपिविनिघ्नन्दिव्यमनुपमंस्थानंप्रयच्छति॥ ॥छ॥
इतिश्रीविष्णुपुराणेचतुर्थेंशेचतुर्दशोध्यायः॥ ॥छ॥मैत्रेयउवाच॥हिरण्यकशिपुत्वेचरावणत्वेचविष्णुना॥अवापनिहतो
भोगानप्राप्यानमरैरपि॥नलयंतत्रतेनैवसंप्राप्तःसकथंपुनः॥निहतःशिशुपालत्वेसायोज्यंशाश्वतेहरौ॥एतदिच्छाम्यहंश्रो
तुंसर्वधर्मभृतांवर।कौतूहलपरेणैतत्पृष्टोमेवक्तुमर्हसि॥पराशरउवाच॥दैत्येश्वरस्यतुवधायअखिललोकोत्पत्तिस्थिति
विनाशकारिणापूर्वंतनुग्रहणंकुर्वतानृसिंहरूपमाविःकृतं।तत्रहिरण्यकशिपोर्विष्णुरयमित्येतन्मनसिनाभूत्।निरतिशयपुण्य
जातसंभूतमेतत्सत्वमिति।रजोद्रेकप्रेरितोकाकाग्रमतिस्तद्भावनायोगात्ततोवाप्तवधहेतुकींनिरतिशयामेवाखिलत्रैलो
क्याधिक्यधारिणींदशाननत्वेभोगसंपदमवाप।नातस्तस्मिन्ननादिनिधनेपरमभूतेभगवत्यनालंबनीकृतेमनस्तल्लयं
दशाननत्वेपिअनंगपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपदर्शनमेवासीन्नायमच्युतइत्यासक्तिर्विपद्य
तोंऽतःकरणस्यमनुष्यबुद्धिरेवकेवलमस्याभूत्।पुनरप्यच्युतविनिपातनमात्रफलमखिलभूमंडलश्लाघ्यचेदिकुलजन्मा
व्याहतंवैश्वर्यंशिशुपालत्वेचावाप।तत्रकृष्णावतारेत्वखिलानामेवभगवन्नाम्नांकारणभवे।ततश्चसत्कारकृतानांतेषांअ

शेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्द्धितविद्वेषानुबंधिचित्तोऽतिनिंदनसंतर्जनादिषुउच्चारणमकरोत्।तच्च
रूपमुत्फुल्लपद्मदलाक्षमत्युज्वलपीतवस्त्रधार्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशंखचक्रगदाधर
मतिप्ररूढवैरानुभावादटनभोजनस्नानासनशयनादिष्वशेषावस्थांतरेषुनैवापाययावस्यात्मचेतसःततस्तमेवचाक्रोशे
षुउच्चारयंस्तमेवहृदयेनधारयन्नात्मवधायभगवद्धस्तचक्रांशुमालोज्वलमक्षयंतेजःस्वरूपंपरमब्रह्मभूतंअपगतद्वे
षादिदोषोभगवंतमद्राक्षीत्।तावच्चभगवच्चक्रेणाशुव्यापादितःतत्स्मरणदग्धाखिलाघसंचयोभगवतानेनांतमुपा
नीतस्तस्मिन्नेवलयमुपययौ।एतत्तवाभिहितमयंहिभगवान्कीर्त्तितःसंस्मृतश्चद्वेषानुबंधेनापिअखिलसुरासुरादि
दुर्लभंफलंप्रयच्छति॥किमुतसम्यग्भक्तिमतां।वसुदेवस्यानकदुंदुभेःपौरवीरोहिणीमदिराभद्रादेवकीप्रमुखाबह्व्यःपत्न्योभ
वन्।बलभद्रसारणशठदुर्मदादीन्पुत्रान्रोहिण्यामानकदुंदुभिरुत्पादयामास।बलदेवोपिरेवत्यांनिशठोल्मुकौपुत्राव
जनयत्।वार्षिमर्द्दिशिशुसत्यधृतिप्रमुखास्तस्यात्मजाः।भद्राश्वभद्रबाहुदुर्दमभूताद्याःपौरव्याःकुक्षिजाः।नंदोपनंदकृतका
यमदिरायास्तनयाः।भद्रायाश्चोपनिधिगदाद्याः।वैशाल्यांचकौशिकमेकमजनयत्।आनकदुंदुभेर्देवक्यांकीर्त्तिमत्सुषेणोद
यीभद्रसेनऋजुदासभद्रकाख्याःषट्पुत्राजज्ञिरे।तांश्चसर्वानेवकंसोघातितवान्।अनंतरंचसप्तमंगर्भंअर्द्धरात्रेभगवत्प्र
हितानिद्रारोहिण्याजठरमाकृष्यानीतवती।कर्षणाच्चासावपिसंकर्षणाख्यामगमत्।ततश्चसकलजगन्महातरुमूलभू

तो। अतीतभविष्यदादिसकलसुरासुरमुनिजनमनसामप्यगोचरोऽब्जसंभवप्रमुखैः प्रणम्यावनिभारहरणाय प्रसादितो
भगवाननादिमध्यो देवकीगर्भमधिष्ठितवती। तदा च सुप्रसन्नादित्यचंद्रादिग्रहं अव्यालादिभयं स्वस्थमानसमखिलमेवै
तज्जगत् अपास्ताधर्ममभवत् तस्मिंश्च पुंडरीकनयने जायमाने जातेन तेनाखिलमेवैतत् सन्मार्गवर्त्ति जगदक्रियत। भगव
तोप्यत्र मर्त्यलोकेऽवतीर्णस्य षोडशसहस्राण्येकशताधिकानि भार्याणामभवन्। तासां च रुक्मिणीसत्यभामाजांबवतीबालहा
सिनीप्रमुखा अष्टौ पत्न्यः प्रधानाः। तासु चाष्टावयुतानि लक्षं च पुत्राणां भगवानखिलमूर्त्तिरनादिमानजनयत्। तेषां च प्रद्युम्न
चारुदेष्णशांबादयः त्रयोदश प्राधानाः। प्रद्युम्नोपि रुक्मिणस्तनयां ककुद्मतीनामोपयेमे। तस्यामस्यानिरुद्धो जज्ञे। अनिरुद्धो
पि रुक्मिण एव पौत्रीं सुभद्रांनामोपयेमे यस्यामस्य वज्रो जज्ञे। वज्रस्य प्रतिबाहुस्तस्यापि सुचारुः एवमनेकशतसहस्रपुरुष
संख्यस्य यदुकुलस्य पुरुषसंख्यानं वर्षशतैरपि शक्तुं शक्यते। यतो हि श्लोकाविमावत्र चरितार्थौ। तिस्रः कोट्यः सहस्राणाम
ष्टाशीतिशतानि च। कुमाराणां गृहाचार्याश्चापयोग्यासु पारगाः॥ संख्यानं यादवानां कः करिष्यति महात्मनां। यत्रायुतानामयुत
लक्षेणास्ते सदाहुकः। देवासुरे हताच दैतेयाः सुमहाबलाः ते चोत्पन्ना मनुष्येषु जनोपद्रवकारिणः। तेषामुच्छेदनार्थाय भुवि
देवा यदोः कुले। अवतीर्णाः कुलशतं तत्रैकाभ्यधिकं द्विज। विष्णुस्तेषां प्रमाणत्वे प्रभुत्वे च व्यवस्थितः। निदेशस्थायिनस्तस्य
ववृधुः सर्वयादवाः॥ प्रसूतिं वृष्णिवीराणां यः शृणोति सदा नरः॥ स सर्वपातकैर्मुक्तो विष्णुलोकं प्रपद्यते॥ इति चतुर्थेंऽशे पंच

दशमः॥ ॥१५॥ ॥पराशर उवाच॥ इत्येष कथितस्ते समासतो यदोर्वंशः॥ तुर्वसोर्वंशमवधारय। तुर्वसोर्वन्हिरात्मजो वन्हेर्गोभानुस्त
तश्च त्रैसानुः तस्माच्च करंधमस्तस्यापि मरुत्तः सोऽनपत्योऽभवत्। ततश्च पौरवं दुष्यंतं सपुत्रमकल्पयत्। एवं ययातिशापात्तद्वंशः पौरव
वंशमाश्रितवान्॥ ॥इति चतुर्थेंऽशे षोडशोऽध्यायः॥ पराशर उ०॥ ॥द्रुह्यो सुतनयो बभ्रुः ततः सेतुः सेतुपुत्र आरद्वान्नाम तदा
त्मजो गांधारः तस्य च घर्मः घर्मात् घृतो घृतात् दुर्मदः ततः सेतुप्रचेताः प्रचेतसः पुत्रशतं अधर्मबहुलानामुदीच्यानां म्लेंछाना
मधिपत्यमकरोत्॥ ॥चतुर्थेंऽशे सप्तदशोध्यायः॥१७॥ ॥पराशर उवाच॥ ययातेश्चतुर्थपुत्रस्यानोः सभानरचक्षुपरमच
क्षुसंज्ञास्त्रयः पुत्रा बभूवुः। सभानरपुत्रः कालकालनरः कालनरात्संजयः। संजयात्पुरंजयस्तस्माज्जनमेजयस्तस्मान्महाशाल
स्तस्माच्च महामनास्तस्यापि उशीनरतितिक्षू द्वौ पुत्रौ उत्पन्नौ। उशीनरस्यापि शिबिनृगनवकृमिदर्वाख्याः पंच पुत्रा बभूवुः। वृषदर्भ
सुवीरकैकयमद्रकाश्चत्वारः शिबिपुत्राः॥ तितिक्षोरुषद्रथः पुत्रोभूत्॥ तस्यापि हेमो हेमस्य सुतपाः सुतपसश्च बलिः यस्य क्षेत्रे दी
र्घतमसा मुनिना अंगवंगकलिंगसुह्मपुंड्राख्यं बालेयं क्षत्रमजन्यत्। तन्नामसंततिसंज्ञाश्च पंचैव विषया बभूवुः। अंगात् अ
नपानस्तस्यात्मजो दिविरथनामा। तस्यापि धर्मरथस्ततश्चित्ररथो रोमपादसंज्ञो यस्याजपुत्रो दशरथः शांतां नाम कन्यामन
पत्याय दुहितृत्वे युयो रोमपादाच्चतुरंगः तस्माच्च पृथुलाक्षस्ततश्चंपो यश्चंपां निवेशयामास। चंपस्य हर्यंगो नामात्मजोऽभवत्।
हर्यंगाद्भद्ररथस्ततो बृहद्रथः बृहद्रथाद्बृहत्कर्मा बृहत्कर्मणश्च बृहद्भानुः तस्माद्बृहन्मनाः तस्यापि जयद्रथो जयद्रथाद्ब्रह्मक्ष

वि०पु०
२६

त्रांतरालसंभूत्यांपत्न्यांविजयंनामपुत्रमजीजनत्।विजयश्चधृतिंनामपुत्रंअवाप।तस्यापिधृतव्रतःपुत्रोऽभूत्॥धृतव्रतात्सत्य
कर्मासत्यकर्मणस्त्वधिरथोयोसौगांगागतोमंजुषागतंपृथापविद्धंकर्णमवाप।कर्णाद्वृषसेनइत्येतेअंगाः॥अतश्चपुरुवंशंश्रो
तुमर्हसि॥७॥ ॥इतिचतुर्थेंऽशेअष्टादशोध्यायः॥ ॥पराशरउवाच॥पुरोर्जनमेजयःपुत्रस्तस्यापिप्रचिन्वान्प्रचिन्वतःप्र
वीरस्तस्मान्मनस्युर्मनस्योश्चाभयदोऽस्मात्सुद्युम्नस्ततोबहुगवस्ततःसंयातिःसंयातेरहंयातिस्ततोरौद्राश्व।ऋतेयुकृतेयुकु
क्षेयुस्थंडिलेयुघृतेयुजलेयुधर्मेयुसन्नतेयुवनेयुनामानोरौद्राश्वस्यदशात्मजाबभूवुः ऋतेयोःरंतिनारःपुत्रोऽभवत्॥प्र
तुमप्रतिरथंध्रुवंच॥रंतिनारःपुत्रानवाप।अप्रतिरथस्यापिकण्वःपुत्रोऽभवत्।तस्यापिमेधातिथिर्यतःकाण्वयनाद्विजा
बभूवुः।रंतिनारस्यदुष्कंताद्याश्चत्वारःपुत्राबभूवुःदुष्यंताच्चक्रवर्त्तीभरतोबभूव।यन्नामहेतुर्देवैःश्लोकोगीयते।माताभ
स्त्रापितुःपुत्रोयेनजातःसएवसः।भरस्वपुत्रंदुष्यंतमावमंस्थाःशकुंतलां।रेतोधाःपुत्रउन्नयतिनरदेवयमक्षयात्।त्वंचास्याधाता
गर्भस्यसत्यमाहशकुंतला।भरतस्यपत्नीनांयेनवपुत्राबभूवुः।नैतेममानुरूपाइत्यभिहितास्तान्मातरोजघ्नुः।परित्यागभया
त्ततोऽस्यवितथेपुत्रजन्मनिपुत्रार्थिनोमरुत्सोमयाजिनोबृहस्पतिवीर्यादुतथ्यपत्नीममतासमुत्पन्नोभरद्वाजाख्योनामपुत्रो
मरुद्भिर्दत्तोऽस्यापिनामनिर्वचनश्लोकोगीयते।मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते।यातौयतदुक्त्वापितरौभरद्वाजस्ततःस्वयं
भरद्वाजस्यच।तस्यवितथेपुत्रजन्मनिमरुद्भिर्दत्तस्ततोवितथसंज्ञामवाप।वितथस्यभवमन्युःपुत्रोऽभवत्।बृहत्क्षत्रमहा

चतु०
२६

वीर्यनरगर्गाद्याभवमन्युपुत्राःनरस्यसंकृतिःसंकृतेर्गुरुधीरंतिदेवौ।गर्गाच्चशिनिःततश्चगार्ग्याःशैन्याःक्षत्रोपेताद्विजात
योबभूवुः।महावीर्याद्दुरुक्षयोनामपुत्रोऽभवत्।तस्यत्रय्यारुणपुष्करिणौकपिलश्चपुत्रत्रयंबभूव।तच्चततयमपिपश्चा
द्विप्रतामुपजगाम।बृहत्क्षत्रस्यसुहोत्रःसुहोत्राद्धस्ती।यइदंहास्तिनपुरंआरोपयामास।अजमीढपुरुमीढास्त्रयोहस्ति
नस्तनयाः।अजमीढात्कण्वःकण्वान्मेधातिथिः।यतःकाण्वायनाद्विजाः।अस्यान्यःपुत्रोबृहदिषुःबृहदिषोर्बृहद्धनुःतत
श्चबृहत्कर्माततश्चजयद्रथःतस्मादपिविश्वजित्ततसेनजित्रुचिराश्वकाव्यदृढहनवत्ससंज्ञाःसेनजित्पुत्रारुचिराश्वः
रुचिराश्वपुत्रःपृथुसेनःपृथुसेनात्पारःपारान्नीपःतस्यैकशतंपुत्राणांतेषांप्रधानःकांपिल्याधिपतिःसमरःसमरस्या
पिपारसंपारसदश्वास्त्रयःपुत्राःपारात्पृथुःपृथोःसुकृतिःसुकृतेर्विभ्राजस्ततश्चाणुहोयःशुकदुहितरंकृत्वीनामोपयेमे।
अणुहद्ब्रह्मदत्तः।ततश्चविष्वक्सेनःविष्वक्सेनादुदक्सेनस्ततोभल्लाटस्तस्यात्मजोद्विमीढःद्विमीढस्यतुयवीनरसंज्ञः।
तस्यापिधृतिमान्तस्मात्सत्यधृतिःततश्चदृढनेमिःतस्माद्सुपार्श्वस्ततःसुमतिस्ततश्चसन्नतिमतःकृतःपुत्रोऽभूत्।
यंहिरण्यनाभोयोगमध्यापयामास।यश्चतुर्विंशतिंसामगानांसंहिताश्चकार।कृताच्चयायुधोयेनप्राचुर्येणनीपक्षयः
कृतः।उग्रायुधात्क्षेम्यःक्षेम्यात्सुवीरःतस्मात्पुरंजयःतस्माच्चबहुरथःइत्येतेपौरवाः।अजमीढस्यनलिनीपत्नीना
मअभूत्।तस्यांनीलसंज्ञःपुत्रोऽभवत्।तस्मादपिशांतेःपुरजानुःतस्माच्चार्कःततश्चहर्यश्वोत्मुद्गलसंजयबृहदि

वि०पु०
२८

षुयवीनानेरक्तो पित्याः पंचानामेषां विषयाणां रक्षणायालमेते सत्पुत्रा इति पित्राभिहिताः पांचालाः मुद्गलाच्च मौल्याः क्षत्रोपेता द्विजातयो बभूवुः। मुद्गलात् वध्यश्वो वध्यश्वात् दिवोदासो हिल्याः पांच मिथुनमभवत्। शरद्वतश्चाहिल्यायां शतानंदोऽभवत्। शतानंदात् सत्यधृतिर्धनुर्वेदांतगो जज्ञे। सत्यधृतेस्तु वराप्सरसमुर्वसीं दृष्ट्वा रेतः स्कंदं शरस्तंबे पपात। तच्च द्विधागतमपत्यद्वयं कुमारः कन्यका चाभवत्। मृगयामुपगतः शंतनुर्दृष्ट्वा कृपया जग्राह। ततः कुमारः कृपः कन्या चाश्वत्थाम्नो जननी कृपी द्रोणपत्न्यभवत्। दिवोदासस्यापि मित्रेयुः पुत्रो मित्रेयोश्च च्यवनो नाम राजा च्यवनात् सुदासः सुदासात् सौदासः सौदासात् सहदेवः तस्यापि सोमकः सोमकाज्जंतुः पुत्रशतज्येष्ठोऽभवत्। तेषां यवीयान् पृषतः पृषतात् द्रुपदस्तस्मात् धृष्टद्युम्नस्ततो धृष्टकेतुः। अजमीढस्यान्यः ऋक्षनामा पुत्रोऽभवत्। ऋक्षात् संवरणः पुत्रोऽभवत्। संवरणाच्च कुरुः॥ य इदं धर्मक्षेत्रं चकार सुधनुर्जन्हुपरिक्षित्प्रमुखाः कुरोः पुत्रा बभूवुः। सुधनुषः सुतः सुहोत्रः तस्मात् च्यवनः च्यवनात् कृतकः ततश्चोपरिचरो वसुः। बृहद्रथप्रत्यग्रकुशास्तंबमाचिल्लमत्स्यप्रमुखा वसोः पुत्राः सप्ताजायंत। बृहद्रथात् कुशाग्रः कुशाग्रात् ऋषभः ऋषभात् पुष्पवात् तस्मात् सत्यहितः तस्मात् सुधन्वा तस्य च जंतुः बृहद्रथाच्चान्यः शकलद्वयजन्मा जरासंधनामा। तस्मात् सहदेवः सहदेवात् सोमापिस्ततश्च श्रुतश्रवा इत्येते मागधा भूभृतः॥ ॥इति श्रीविष्णुपुराणे चतुर्थेंशे एकोनविंशोध्यायः॥१९॥ ॥पराशर उवाच॥ परिक्षितो जन्मेजयश्रुतसेनउग्रसेनभीमसेनाश्चत्वारः पुत्राः। जन्होश्च सुरथो नामा

चतु०
२८

त्मजो बभूव। तस्य च विदूरथः ततः सार्वभौमः सार्वभौमाज्जयसेनस्तस्मादाराबी। ततश्चायुतायुतायोरक्रोधनः तस्माद्देवाथितिथि ततश्च देवऋक्षाद्भीमसेनः ततश्च दिलीपो दिलीपात् प्रतीपस्तस्यापि देवापिशंतनुबाह्लीकसंज्ञास्त्रयः पुत्रा बभूवुः देवापिर्बाल एवारण्यं विवेश। शंतनुस्तु महीपालोऽभवत्। अयं च तस्य श्लोकः पृथिव्यां गीयते। यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः। शांतिमाप्नोति येनाग्र्यां कर्मणा तेन शंतनुः। तस्य शंतनो राष्ट्रे द्वादशवर्षाणि देवो न ववर्ष ततश्चाशेषराष्ट्रविनाशमवेक्ष्यासौ राजा ब्राह्मणानपृच्छत्। कस्मादस्मिन् राष्ट्रे देवो न वर्षति। कोममापराध इति ते तमूचुः। अग्रजस्य ते राज्यार्हेयमवनिस्त्वया भुज्यते इति परिवेत्ता त्वं इत्युक्तः स राजा पुनस्तानपृच्छत्। किं मयात्र विधेयमिति। ततस्ते तं पुनरप्यूचुः। यावद्देवापिर्न पतनादिदोषैरभिभूयते। तावदेव तु तस्यार्हं राज्यं तदलमेतेन तस्मै दीयतामिति तस्य मंत्रिणा प्रवरेणाश्मरावेण तत्रारण्ये तपस्विनो वेदवादविरोधवक्तारः प्रयुक्ताः तैरस्यातिऋजुमतेर्महीपतिपुत्रस्य बुद्धिर्वेदवादविरोधिमार्गानुसारिण्यक्रियत। राजा च शंतनुर्द्विजजनवचनोत्पन्नपरिवेदनशोकस्तान् ब्राह्मणानग्रतः कृत्वा अग्रजराज्यप्रदानायारण्यं जगाम। तमाश्रममुपागताश्च तमवनिपतिपुत्रं देवापिमुपतस्थुः। ते देवादानुविद्धावनिवचोसिराज्यमग्रजेन कर्त्तव्यमित्यर्थवेति तमूचुः। असावपि देवापिर्वेदवादविरोधियुक्तिदूषितमनेकप्रकारं तानाह। ततस्ते ब्राह्मणाः शंतनुमूचुः। आगच्छ भो राजन्नलमत्रातिनिर्बंधन प्रशांत एवासावनावृष्टिदोषः पतितोऽयमनादिकालमहितवेदवचनदूषणोच्चारणात्। पतिते चाग्रजे नैव परिवेत्तृत्वं भवतीत्युक्तः शंतनुः स्वनगरमाग

विष्णु०
२८

त्यराज्यमकरोत्।वेदवादविरोधिवचनोच्चारणदूषितेचतस्मिन्देवापौतिष्ठत्यपिज्येष्ठभ्रातरिअखिलसस्यनिष्पत्तयेववर्षभग
वान्पर्जन्यः।बाल्हिकस्यसोमदत्तःपुत्रोभूत्।सोमदत्तस्यापिभूरिभूरिश्रवःशलसंज्ञास्त्रयःपुत्राबभूवुः।शंतनोरपिसुरनद्यां
जान्हव्यांउदारकीर्तिरशेषशास्त्रार्थवेत्ताभीष्मःपुत्रोभूत्।सत्यवत्यांचचित्रांगदविचित्रवीर्यौद्वौपुत्रौउत्पादयामासशंतनुः।चित्रां
गदस्तुबालएवचित्रांगदेनगंधर्वेणाहवेनिहतः।विचित्रवीर्योपिकाशिराजतनयेअंबिकाअंबालिकेउपयेमे।तदुपभोगाति
खेदाच्चयक्ष्मणागृहीतःपंचत्वमगमत्।सत्यवतीनियोगाच्चमत्पुत्रःकृष्णद्वैपायनोमातुर्वचनमनतिक्रमणीयमितिविचित्रवी
र्यक्षेत्रेधृतराष्ट्रंपांडुंतत्प्रहितभुजिष्यायांचविदुरमुत्पादयामास।धृतराष्ट्रोपिदुर्योधनदुःशासनादिप्रधानंपुत्रशतमु
त्पादयामास।पांडोरप्यरण्येमृगशापोपहतप्रजननसामर्थ्यस्यापिधर्मवायुशक्रैर्युधिष्ठिरभीमसेनार्जुनाःकुंत्यांनकुलस
हदेवौचाश्विभ्यांमाद्र्यांपंचपुत्राःसमुत्पादिताः।तेषांचद्रौपद्यांपंचपुत्राबभूवुः।युधिष्ठिरात्प्रतिविंध्योभीमश्रुतसोमःश्रुत
कीर्त्तिरर्जुनात्शतानीकोनकुलात्श्रुतकर्मासहदेवात्चापरेचपांडवानामात्मजास्तद्यथा।योधीयीयुधिष्ठिरात्देवकना
मपुत्रमवाप।हिडंबाघटोत्कचंनामभीमात्पुत्रंलेभे।काशीवभीमादेवसर्वत्रगंपुत्रमवाप।सहदेवाच्चविजयासुहोत्रंनाम
पुत्रंप्राप्तवती।करेणुमत्यांनकुलोनिरमित्रमजीजनत्।अर्जुनस्यापिउलूप्यांनागकन्यायांइरावान्नामपुत्रोऽभूत्।मणि
पूरपतिपुत्र्यांचपुत्रिकाधर्मेणबभ्रुवाहंनामपुत्रमर्जुनोऽजनयत्।सुभद्रायांचार्भकत्वेपियोसवपितिबलपराक्रमः

चतु०
२८

समस्तारातिरथविजेतासोभिमन्युरजायत।अभिमन्योरुत्तरायांपरिक्षीणेषुकुरुषुअश्वत्थामप्रयुक्तब्रह्मास्त्रेणगर्भए
वभस्मीकृतोभगवतःसकलसुरारवंदितचरणयुगलस्यात्मेच्छकारणमानुषरूपिणोऽनुभावात्पुनर्जीवितमवाप्यपरिक्षि
ज्जज्ञे।योयंसांप्रतमेतद्भूमंडलमखंडितायतिधर्मेणपालयति॥२०॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशेविंशोध्यायः॥२०॥ ॥
श्रीपराशरउवाच॥अतःपरंभविष्यानहंभूमिपालान्कीर्त्तयिष्यामियोयंसांप्रतमवनीपतिःपरीक्षित्अस्यापिपरीक्षितोज
नमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारःपुत्राभविष्यंति।तस्याप्यपरःशतानीकोभविष्यति।योसौयाज्ञवल्क्याद्वेदमधीत्य
पादस्त्राण्यवाप्यविषयरक्तचित्त।वृत्तिश्चशौनकोपदेशात्आत्मज्ञानप्रवणःपरंनिर्वाणमाप्स्यति।शतानीकादप्यश्वमेध
दत्तोभविता।तस्मादप्यधिसीमकृष्णः।अधिसीमकृष्णान्निचक्नुः।योयंगंगयापहृतेहस्तिनापुरेकौशांब्यांनिवत्स्यति।तस्मा
प्युष्णःपुत्रोभविष्यति।उष्णाच्चित्ररथस्ततश्चशुचिरथस्तस्मात्वृष्णिमान्ततःसुषेणस्तस्मादपिसुनीथःसुनीथात्नृचः
ततोनृचक्षुस्तस्यापिसुखीबलपरिप्लवःतस्मात्सुतश्चसुनयःतस्यापिमेधावीमेधाविनोनृपंजयःततोदुर्बलःतस्मात्तिग्मा
द्बृहद्रथोबृहद्रथाद्वसुदानःततोपरःशतानीकःतस्माच्चोदयनउदयनाद्वहीनरःतस्माद्दंडपाणिःततोनिरमित्रःतस्मा
च्चक्षेमकः।अत्रायंश्लोकः।ब्रह्मक्षत्रस्ययोयोनिर्वंशोराजर्षिसत्कृतः।क्षेमकंप्राप्यराजानंससंस्थांप्राप्स्यतेकलौ॥२१॥
इतिश्रीविष्णुपुराणेचतुर्थेंशेएकविंशोध्यायः॥२१॥ ॥श्रीपराशरउवाच॥अतश्चेक्ष्वाकवोभविष्याःपार्थिवाःकथ्यंते॥

बृहद्बलस्यपुत्रोबृहत्क्षणः तस्मादुरुक्षयः तस्माच्चवत्सव्यूहः।ततश्चप्रतिव्योमतस्यापिदिवाकरः तस्मात्सहदेवः।सहदेवाद्बृ
हदश्वस्तत्सूनुर्भानुथस्तस्यचप्रतीताश्वस्तस्यापिसुप्रतीकस्ततश्चमरुदेवोवान्सुनक्षत्रस्तस्मात्किन्नरः किन्नरादंतरिक्षस्तस्मात्सु
पर्णस्ततश्चामित्रजित् ततश्चबृहद्भ्राजस्तस्यापिधर्मिणः कृतंजय।कृतंजयाद्रणंजयः रणंजयात्संजयः तस्मात्शाक्यात्शु
द्धोदनः।शुद्धोदनाद्राहुलः।ततप्रसेनजित्।ततःक्षुद्रकः ततःकुंडकः तस्मात्सुरथः तत्पुत्रःसुमित्रः अंत्यइति।एतेचेक्ष्वाकु
वोबृहद्बलान्वयाः अत्रानुवंशश्लोकः।इक्ष्वाकूणामयंवंशः सुमित्रांतोभविष्यति।यतस्तंप्राप्यराजानंससंस्थांप्राप्स्यते
कलौ॥७॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशे॥२२॥श्रीपराशरउवाच॥ मागधानांबार्हद्रथानांभाविनामनुक्रमंकथयिष्या
मि।अत्रहिवंशेमहाबलाजरासंधप्रधानाबभूवुः॥जरासंधसुतात्सहदेवात्सोमाविः तस्यानुश्रुतवान्।तस्याप्ययुतायुस्त
तश्चनिरमित्रस्तत्तनयः सुनक्षत्रः।तस्मादपिबृहत्कर्माततश्चसेनजित्।तस्यानुश्रुतंजयः।श्रुतंजयाद्विप्रः।तस्यचपुत्रः
शुचिनामाभविष्यंति।तस्यापिक्षेमाविः।ततश्चसुव्रतः।सुव्रताद्धर्मः।ततश्चसुश्रमः।तस्यदृढसेनः ततःसुमतिः तस्मात्सु
बलः सुबलात्सुनीतोभविता।ततःसत्यजितसत्यजितोविश्वजित्।तस्यापिपुरंजयइत्येतेबार्हद्रथाभूपतयोवर्षसहस्रमे
कंभविष्यंति॥७॥ ॥इतिश्रीविष्णुपुराणेचतुर्थेंशेत्रयोविंशोध्यायः॥२३॥ ॥श्रीपराशरउ०॥योरिपुंजयोनामबार्हद्रथों
त्यः तस्यशुनकोनामामात्योभविष्यतिसचैनंस्वामिनंहत्वास्वपुत्रंप्रद्योतनामानंअभिषेक्ष्यति।तस्यापिपालकनामापुत्रोभ

विता।ततश्चविशाखायूपः तत्पुत्रोजनकः तस्यनंदिवर्द्धनः।इत्येतेअष्टत्रिंशदुत्तरंअब्दशतंपंचद्योतनाः पृथिवींभोक्ष्यंति॥तत
श्चशिशुनागः तत्पुत्रश्चकाकवर्णोभविता।ततश्चपुत्रःक्षेमधर्मातस्यापिक्षत्रौजाः तत्पुत्रोबिंदुसारः।ततश्चजातशत्रुः तस्माद्दर्भ
कोदर्भकाच्चोदयः तस्मादपिनंदिवर्द्धनः ततोमहानंदी इत्येतेशैशुनागादशभूमिपालाः त्रीणिवर्षशतानिद्विषष्ट्यधिकानिमहानं
न्दिसुतश्चशूद्रीगर्भोद्भवोऽतिलुब्धोमहापद्मोनंदः परशुरामइवापरोखिलक्षत्रियांतकारीभविष्यति।ततःप्रभृतिशूद्राभूमिपा
लाभविष्यंति।सचैकछत्रमनुल्लंघितशासनोमहापद्मः पृथिवींभोक्ष्यति।तस्याप्यष्टौसुताः सुमाल्यद्याभवितारः।तस्यचमहा
पद्मस्यानुपृथिवींभोक्ष्यंति।महापद्मस्तनयाश्चएकंवर्षशतमवनीपतयोभविष्यंति।नववैतन्नंदान्कौटिल्योब्राह्मणाःसमुद्ध
रिष्यति।तेषामभावेमौर्याश्चपृथिवींभोक्ष्यंति।कौटिल्यएवचंद्रगुप्तंराज्येऽभिषेक्ष्यति।तस्यापिपुत्रोबिंदुसारोभविष्यति।तस्मा
प्यशोकवर्द्धनस्ततःसुयशाः ततश्चदशरथः ततश्चसंगतः ततश्चशालिशूकः।तस्मात्सोमशर्मातस्यापिसोमशर्मणःशत
धन्वातस्यातुबृहद्रथनामाभविताएवमेतेमौर्यादशभूपतयोभविष्यंतिअब्दशतंसप्तत्रिंशदुत्तरंतेषामंतेपृथिवींदश
शुंगाभोक्ष्यंति।पुष्यमित्रःसेनापतिःस्वामिनंहत्वाराज्यंकरिष्यतिअस्याप्यग्निमित्रः ततोभागवतस्तस्माद्देवभूतिः इत्ये
तेदशशुंगाद्वादशोत्तरंपृथिवींभोक्ष्यंति।ततःकण्वानेषाभूमिर्यास्यति।देवभूतिंशुंगराजानंव्यसनिनंतस्यैवामात्यःकण्वो
वासुदेवनापुत्रःश्रीमातिकर्णिः।तस्यापिपूर्णोत्संग तत्पुत्रश्चमातकर्णिः।तस्माच्चलंबोदरः।तस्मादिवलिः ततःमानिपस्वय स्वा

मवनीभोक्ष्यति।तस्यपुत्रोभूमिपुत्रस्तस्यापिनारायणः नारायणस्यात्मजः सुशर्मा एतेकाण्वायनाश्चत्वारःपंचचत्वारिंशतव
र्षाणिभूपतयोभविष्यंति।सुशर्माणंचकण्वंसभृत्यंबली इकनामाहत्वाध्यंभ्रजातीयोवसुधांभोक्ष्यति।ततश्चकृष्णनामात
द्भ्रातापृथिवीपतिर्भावीतस्यापिसुमेघस्वातिः।ततःपटुमांततश्चारिष्टकर्माततोहालोहालात्पत्तलकस्ततःपुरिल्लसेनस्ततःसुं
दरःसातशातकर्णिःतस्माच्चचकोरशांतकर्णिततःशिवस्वातिस्ततश्चगोमतीपुत्रः तत्पुत्रःपुलिमान्तस्यापिशातकर्णीत्रि
वश्रीस्ततश्चशिवस्कंधस्तस्मादपियज्ञश्रीस्ततोविजयस्ततश्चंद्रश्रीस्तस्यानुपुलोमाविः।एवमेतेत्रिंशत्चत्वारिअब्दशता
निषट्पंचाशदधिकानिपृथिवींभोक्ष्यंति।अंध्रभृत्याःसप्ताभीरादशगर्दभिलाश्चभूभुजोभविष्यं।ततःषोडशिकाश्चभूपत
योभवितारः ततश्चअष्टौयवनाःचतुर्दशतुषाराःपुंडाश्चत्रयोदशएकादशमूनाएतेपृथिवींत्रयोदशवर्षशतानिनवनवत्य
धिकानिभोक्ष्यंति।ततश्चपौरात्यकादशभूपतयोअब्दशतानित्रीणिपृथिवींभोक्ष्यंति।तेषुछिन्नेषुपुनःकिलकिलऽनामय
वनाभूपतयोभविष्यंति।मूर्द्धाभिषिक्तस्तेषांविंध्यशक्तिस्ततः परपुरंजयः ततोवामद्रः तस्मात्धर्मोधर्माद्वंगरः कृतनंदः
शिशुनंदः तद्भ्रातानंदियशाशिशुकप्रवीरोचेतितेवर्षशतंषड्वर्षाणिचभविष्यंति।ततस्तत्पुत्रास्त्रयोदशैतेबह्लिकाश्चत्रय
स्ततःपुष्पमित्रयदुमित्रादयःत्रयोदशमेकलाश्चकोसलानांनवैवभूपतयोभविष्यंतिनैषधास्तुतावंतएवमगधायांतुविश्व
स्फाटिकसंज्ञोन्यात्करिष्यति।कैवर्त्तपटुपलिंदब्रह्मणान्राज्येस्थापयिष्यति।उत्साद्याखिलक्षत्रजातिंनवनागाःपद्माव

त्यांकांत्यांमधुरायांअनुगंगाप्रयागंमगधान्भोक्ष्यंति।कोशलांध्रपौंड्रतामलिप्तकालतोयकान्जनपदान्मणिधान्यकवंशाभो
क्ष्यंति।तेपिराज्यमुषिकून्जनपदान्कनकाह्वयाभोक्ष्यंति।सौराष्ट्रावंतिश्चशूद्राभीरानर्बुदमरुभूविषयांश्चव्रात्यद्विजाभीर
शूद्रादयोभोक्ष्यंति।एतेचतुल्यकालासर्वेपृथिव्यांभूपतयोभविष्यंति।अल्पप्रसादाबृहत्कोपाः सर्वकालमनृताधर्मरुचयःस्त्री
बालगोवधकर्त्तारः परस्वादानरुचयोल्पसारा।उदितास्तमितप्रतापाःस्वल्पायुषोमहेच्छाःस्वल्पधर्माश्चभविष्यंति।तैश्च
विमिश्रजनपदाःतच्छीलवर्तितःराजश्रयशुष्मिणोम्लेच्छाचार्याश्चविपर्ययेणवर्त्तमानाःप्रजाःक्षपयिष्यंति।ततश्चानुदि
नस्वल्पाल्पह्रासात्व्यवच्छेदात्धर्मार्थयोर्जगतःसंसयोभविष्यति।ततश्चार्थएवाभिजनेहेतुःबलमेवाशेषधर्महेतुरभिरु
चिरेवदांपत्यसंबंधहेतुःअनृतवीर्यमेवव्यवहारजयहेतुः।विचारणमेवपांडित्यहेतुःदानमेवधर्महेतुःअनाढ्यतैवासा
धुत्वहेतुःउन्नतांबुदत्तैवपृथिवीहेतुःब्रह्मसूत्रत्वमेवविप्रत्वहेतुःलिंगधारणमेवाश्रमहेतुः।अन्यायएववृत्तिहेतुः।दौर्बल्य
मेवावृत्तिहेतुः।स्त्रीत्वमेवोपभोगहेतुः।अनार्यतैवसाधुत्वहेतुःकेशप्रसाधनमेवस्नानहेतुः।स्वीकरणमेवविवाहः॥सद्वेषधा
र्येवपात्रं।दूरायतनोदकमेवतीर्थांऽत्येवमनेकदोषोत्तरेतुभूमंडलेसर्ववर्णेष्वयोयोबलवान्ससभूपतिर्भविष्यति।एवंचा
तिलुब्धराजकरभारासहाः।शैलानामंतरद्रोणीःप्रजाःसंश्रयिष्यंति।मधुशाकलमूफलपत्रपुष्पाद्याहाराश्चभविष्यंति।त
रुवल्कलपर्णचीरप्रावरणाश्चातिबहुप्रजाःशीतवातातपवर्षसहाभविष्यंति।नचकश्चित्त्रयोविंशतिवर्षाणिजीविष्यति।अ

वि०पु०
३१

नवरतंचात्रकलियुगेक्षयमायातिअखिलएवैषजनःक्षयमुपेष्यति॥श्रौतस्मार्त्तेधर्मेविप्लवमत्यंतमुपगतेक्षीणप्रायेचकला
वशेषेजगत्स्रष्टुश्चराचरगुरोरादिमयस्यांतमयस्यसर्वमयस्यचात्मरूपिणोभगवतोवासुदेवस्यांशःशंबलग्रामेप्रधानब्र
णविष्णुयशसोगृहेष्टगुणर्द्धिसमन्वितःकल्किरूपीजगत्यत्रावतीर्यसकलम्लेच्छदस्युदुष्टाचरणचेतसामपरिछिन्नशक्ति
माहात्मःक्षयंकरिष्यतिमशेषाणांतेषामेवजनपदानाममलस्फटिकविशुद्धामतयोभविष्यंति।तेषांचबीजभूतानामशेषम
नुष्याणांपरिणतानामपितत्कालकृतापत्यप्रसूतिर्भविष्यति।तानिचतदपत्यानिकृतयुगधर्मानुसारीण्येवभविष्यंतिइति।अ
त्रोच्यते।यदाचंद्रःश्चसूर्यस्वतथातिशुक्रक्षबृहस्पती।एकराशौसमेष्यंति।भविष्यतितत:कृतं।अतीतावर्त्तमानाश्चतथै
वानागताश्चये।एतेवंशेषुभूपालाःकथितामुनिसत्तम।यावत्परीक्षितोजन्मयावन्नंदाभिषेचनं।एतद्वर्षसहस्रंतुज्ञेयंपं
चदशोत्तरं।सप्तर्षीणांतुयेपूर्वौदृश्यतेउदितौदिवि।तयोस्तुमध्यनक्षत्रंदृश्यतेयत्समंनिशि।तेनसप्तर्षयोयुक्तास्तिष्ठंत्य
पारिक्षितु ब्दशतंनृणां।तेतुपारीक्षितेकालेमघास्वासन्द्विजोत्तम।तदप्रवृत्तश्चकलिःद्वादशाब्दशतात्मकः।यदैवभगवद्विष्णो
रंशोयातोदिवंद्विज।वसुदेवकुलोद्भूतस्तदैवात्रागतःकलिः।गतेसनातनस्यांशेविष्णोस्तत्रभुवोदिवं।तत्याजसानुजो
राज्यंधर्मपुत्रोयुधिष्ठिरः।विपरीतानिदृष्ट्वाचनिमित्तानिसपांडवः।यातेकृष्णेचकारायसोभिषेकंपरीक्षितः।प्रयास्यं चतु०
तियदाचैतेपूर्वाषाढांमहर्षयः।तदानंदात्प्रभृत्येषकलिर्वृद्धिंगमिष्यति।यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि।प्रति ३१

पन्नंकलियुगंतस्यसंख्यांनिबोधमे।त्रीणि[illegible]लक्षाणिवर्षाणांद्विजमानुषसंख्यया।षष्टिंचैवसहस्राणिभविष्यत्येषवै
कलिः।शतानितानिदिव्यानिसप्तपंचवसंख्यया।यावत्सपादपद्माभ्यांपस्पर्शेमांवसुंधरां।तावत्पृथ्वीपरिष्वंगेसमर्थोनाभ
वात्कलिः।निःशेषेणततस्तस्मिन्भविष्यतिपुनःकृते।ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चद्विजसत्तम।युगेयुगेमहात्मानःसमत
ताःसहस्रशः।बहुत्वान्नामधेयानांपरिसंख्याकुलेकुले।पुनरुक्तबहुलात्तुनमयापरिकीर्त्तिताः।देवापिःपौरवोराजामरुश्चेक्ष्वा
कुवंशजः।महायोगबलोपेतौकलपग्रामसंश्रयौ।युग।कृतेयुगेरहागत्यक्षत्रप्रावर्त्तकौहितौ।भविष्यतोमनोर्वंशबीजभूतौव्य
वस्थितौ।एतेनक्रमयोगेनमनुपुत्रैर्वसुंधरा।कृतत्रेतादिसंज्ञानियुगानित्रीणिभुज्यते।कलौतुबीजभूतास्तुकेचितिष्ठंति
वैमुने।यथैवदेवापिमरूसांप्रतंसमवस्थितौ।एषतूद्देशतोवंशस्तवोक्तोभूभुजांमया।निखिलोगदितुंशक्योनैषजन्मश
तैरपि।एतेचान्येचबहवोयैरत्रक्षितिमंडले।कृतंममत्वंमोहांधैर्नित्यंनित्यकलेवरैः॥कथंममेयमखिलामत्पुत्रस्यकथं
मही।मद्वंशस्येतिचिंतार्त्ताजग्मुरंतमिमेनृपाः।तेभ्यःपूर्वतराश्चान्येतेभ्यस्तेभ्यस्तथापरे।भविष्यश्चैवयास्यंतितेषामन्ये
चयेप्यनु।विलोक्यात्मजयोद्योगयात्राव्यग्रनराधिपान्।पुष्पप्रहासैःशारदिहसंतीववसुंधरा।मैत्रेयपृथिवीगीतान्श्लो
काश्चात्रनिबोधतान्।नाहधर्मध्वजेनजनकायाऽसितोमुनिः।पृथिव्युवाच।कथमेषनरेंद्राणांमोहोबुद्धिमतामपि।येनफे
नसधर्माणोप्यतिविश्वस्तचेतसः।पूर्वमात्मजयंकृत्वा॥जेतुमिच्छंतिमंत्रिणः।ततोभृत्यांश्चपौरांश्चजिगीषंतेतथापिर

उ

वि०पु० ३२ न्॥ क्रमेणानेनजेष्यामोवयंपृथ्वींससागरां॥इत्यासक्तधियोमृत्युंनपश्यंतित्यविदूरजं।समुद्रावरणंयातियन्मंडलमथो
वशं। कियदात्मजयस्यैतन्मुक्तिरात्मजये फलं।उत्सृज्यपूर्वजा यातोयांनादायगतःपिता। तांममेतिविमूढत्वाज्जेतुमिछंति
पार्थिवाः।मत्कृतेपितृपुत्राणांभ्रातॄणांचापिविग्रहाः।जायंतेस्यंतमोहेनममत्वादृतचेतसां। पृथ्वीममेयंसकलंममे
यमेषाममेयंममवंशाश्वतेयं॥योयोमृतेन्यत्रबभूवराजाकुबुद्धिरासीदितितस्यतस्य। दृष्ट्वाममत्वादृतेचित्तमेकंविहायमां
मृत्युपथंव्रजंतं।तस्यानुजस्तस्यकथंममत्वेहृद्यास्पदंतत्प्रभवंकरोति। पृथ्वीममेषाशुपरित्यजैनांवदंतियेदूतमुखैःस्व
शत्रून्।निराधिपास्तेषुममातिहासपुनश्चमूढेषुदयाभ्युपेति। पराशरउवाच॥ इत्येतेधरणीगीताःश्लोकामैत्रेययैःश्रु
तैः।ममत्वंविलयंयातितापन्यस्तंयथाहिमं॥इत्येषकथितःसम्यक्मनोर्वंशोमयातव।तत्रस्थितिप्रवृत्तस्यविष्णोरंशांशा
कानृपाः।शृणोतियइमंभक्त्यामनोर्वंशमनुक्रमात्।तस्यपापमशेषंवैप्रणश्यत्यमलात्मनः।धनधान्यर्द्धिमतुलांप्राप्नो
त्यव्याहतेंद्रियः।श्रुत्वैचमखिलंवंशंप्रशस्तंसोमसूर्ययोः॥इक्ष्वाकुजन्हुमांधातृसगराविक्षितान्रघून्॥ययातिनहु
षाद्यांश्चज्ञात्वानिष्ठामुपागतान्।महाबलान्महावीर्याननंतबलसंचयान्।कृतान्कालेनबलिनाकथाशेषान्नराधि
पान्।श्रुत्वानपुत्रदारादौगृहक्षेत्रादिकेतथा।द्रव्यादौवाकृतप्रज्ञोममत्वंकुरुतेनरः।तप्तंतपोयैःपुरुषप्रवीरैरुद्बाहु चतु० ३२
भिर्वर्षगणाननेकान्।इष्ट्वातियज्ञैर्बलिनोतिवीर्याकृतास्तुकालेनकथावशेषाः॥पृथुःसमस्तान्प्रचचारलोकान्

वि०पु० ३३ व्याहतोयोरिविदारिचक्रः।सकालवाताभिहतःप्रणष्टःक्षिप्तंयथाशाल्मलितूलमल्पं॥यःकार्त्तवीर्योबुभुजेपृथिव्यांद्वी
पानमाक्रम्यहतारिचक्रः।कथाप्रसंगेष्वभिधीयमानःसएवसंकल्पविकल्पहेतुः।दशाननाविक्षितराघवाणांऐश्वर्य
मुद्भासितदिग्वितानं।भस्मापिजातंनकथंक्षणेनभ्रूभंगपातेनधिठांतकस्य।कथाशरीरत्वमवापयद्वैमांधातृना
माभुविचक्रवर्ती॥श्रुत्वापितत्कोहिकरोतिसाधुर्ममत्वमात्मन्यपिमंदचेताः।भगीरथाद्याःसगरःककुस्थोदशाननोराघ
वलक्ष्मणौच।युधिष्ठिराद्याश्चबभूवुरेतेसत्यंनमिथ्याक्वनुतेनविद्मः।येसांप्रतंयेचनृपाभविष्याःप्रोक्तामयाविप्ररोग्र
वीर्याः।तेतेतथान्येपितथाभिधेयाःसर्वेभविष्यंतियथैवपूर्वे॥एतद्विदित्वाननरेणकार्यंममत्वमात्मन्यपिपंडितेन॥
तिष्टंतुतावनयात्मजायाक्षेत्रयाशादयोयेतुशरीरतोन्ये॥ ॥इतिश्रीविष्णुपुराणेपाराशर्यांसंहितायांचतुर्थेंशेचतु
र्विंशोध्यायः॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥समाप्तश्चतुर्थोंशः॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

चतु० ३३

॥ विष्णुपुराणचतुर्थांश ॥

DR. BHAU DAJI MEMORIAL

विष्णुपुराणपंचमांश

DR. BHAU DAJI MEMORIAL

वि०पु०
१

श्रीगणेशायनमः॥श्रीविष्णवेनमः॥ मैत्रेयउवाच॥नृपाणांकथितःसर्वोभवतावंशविस्तरः॥वंशानुचरितंचैवयथावदनुव
र्णितं॥अंशावतारोब्रह्मर्षेयोयंयदुकुलोद्भवः॥विष्णोस्तंविस्तरेणाहंश्रोतुमिच्छाम्यशेषतः॥चकारयानिकर्माणिभगवान्पु
रुषोत्तमः॥अंशांशेनावतीर्योर्व्यांतत्रतानिमुनेवद॥पराशरोवाच॥मैत्रेयश्रूयतामेतत्यत्पृष्टोहमिहत्वया॥विष्णोरंशांश
संभूतिचरितंजगतोहितं॥देवकस्यसुतांपूर्वंवसुदेवोमहामुने॥उपयेमेमहाबाहुर्देवकींदेवतोपमां॥कंसस्तयोर्वररथंनोद
यामाससारथिः॥वसुदेवस्यदेवक्याःसंयोगेभोजवर्धनः॥अथांतरिक्षेवागुच्चैःकंसमाभाष्यसादरं॥मेघगंभीरनिर्घोषासमा
भाष्येदमब्रवीत्॥यामेनांवहसेमूढसहभर्त्तारथेस्थितं॥अस्यास्तवाष्टमोगर्भःप्राणानपहरिष्यति॥इत्याकर्ण्यसमादायष
कंसोमहाबलः॥देवकींहंतुमारब्धोवसुदेवोब्रवीदिदं॥नहंतव्यामहाबाहोदेवकीभवतातव॥समर्पयिष्येसकलान्गर्भाना
स्योदरोद्भवान्॥पराशरोवाच॥तथेत्याहचतंकंसोवसुदेवंद्विजसत्तम॥नघातयामासचतांदेवकींतस्यगौरवात्॥एतस्मिन्नेव
कालेतुभूरिभारावपीडिता॥जगामधरणीमेरौसमाजेत्रिदिवौकसो॥सब्रह्मकान्सुरान्सर्वान्प्रणिपत्याथमेदिनी॥कथया
मासतत्सर्वंखेदात्करुणभाषिणी॥भूमिरुः॥अग्निःसुवर्णस्यगुरुःगवांसूर्यपरोगुरुः॥ममाप्यखिललोकानांवंद्योनारायणो
गुरुः॥प्रजापतिर्ब्रह्मापूर्वेषामपिपूर्वजः॥कलाकाष्ठानिमेषात्माकालश्चाव्यक्तमूर्त्तिमान्॥तदंशभूतःसर्वेषांसमूहोवःसुरोत्त पं च०
मः॥आदित्यामरुतःसाध्यरुद्रावस्वश्विवन्हयः॥पितरोलोकपालानांस्त्रष्टारोऽत्रिपुरोगमाः॥एतत्तस्याप्रमेयस्यरूपंविष्णोर्मह १

त्मनः॥ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः॥अहंचविषयाश्चैतत्सर्वंविष्णुमयंजगत्॥तथाप्यनेकरूपस्यतस्यरूपाण्य
हर्निशं॥बाध्याबद्धकतांयांतिकल्लोलाइवसागरे॥तत्सांप्रतमिमेदैत्याःकालनेमिपुरोगमाः॥मर्त्यलोकंसमक्राम्यबाधंतेहर्निशं
प्रजाः॥कालनेमिर्हतोयोसौविष्णुनाप्रभविष्णुना॥उग्रसेनसुतःकंसःसंभूतःसमहासुरः॥अरिष्टोधेनुकःकेशीप्रलंबोनरकस्त
था॥सुंदोसुरस्तथात्युग्रोबाणश्चापिबलेःसुतः॥तथाप्यन्यसुमहावीर्यानृपाणांभवनेषुये॥समुत्पन्नादुरात्मानास्तानसंख्यातुमु
त्सहे॥अक्षौहिण्योत्रबहुलादिव्यमूर्त्तिधराःसुराः॥महाबलानांदुष्टानांदैत्येंद्राणांममोपरि॥तद्भूरिभारपीडार्त्तानशक्तोम्यमरेश्व
राः॥बिभर्त्तुमात्मानमहंइतिविज्ञापयामिवः॥क्रियतांतन्महाभागाममभारावतारणं॥यथारसातलंनाहंगच्छेयमतिविह्वला॥
श्रीपराशरउ०॥इत्याकर्ण्यधरावाक्यमशेषैस्त्रिदशैस्ततः॥भुवोभारावतारार्थंब्रह्माप्राहप्रनोदितः॥ब्रह्मोवाच॥यथाहवसुधा
सर्वंसत्यमेतद्दिवौकसः॥अहंभवोभवंतश्चसर्वंनारायणात्मकं॥विभूतयस्तुयास्तस्यतासामेवपरस्परं॥आधिक्यन्यूनताबा
ध्यबाधकत्वेनवर्त्तते॥तदागच्छतगच्छामःक्षीराब्धेस्तटमुत्तमं॥तत्राराध्यहरिंतस्मिंसर्वंविज्ञापयामिवै॥सर्वदेवजगत्यर्थंस
सर्वात्माजगन्मयः॥स्वल्पांशेनावतीर्योर्व्यांधर्मस्यकुरुतेस्थितिं॥पराशरोवाच॥इत्युक्त्वाप्रययौविप्रसहदेवैःपितामहः॥समा
हितमतिश्चैवतुष्टावगरुडध्वजं॥ब्रह्मोवाच॥द्वेवेद्येत्वमाम्नायपराचैवापरातथा॥तेएवभवतोरूपंमूर्त्तामूर्त्तात्मिवप्रभो
हेत्वंब्रह्मसन्नणीयोसिस्थूलात्मन्सर्वसर्ववित्॥शब्दब्रह्मपरंधामब्रह्मब्रह्ममयंचयत्॥ऋग्वेदस्त्वंयजुर्वेदःसामवेद

वि०पु०
२

स्तथर्वंच॥शिक्षाकल्पोनिरुक्तंचछंदोज्योतिषमेवच॥इतिहासपुराणेचतथाव्याकरणंप्रभुः॥मीमांसान्यायिकंतद्वत्धर्मशास्त्रा
ण्यधोक्षजः॥आत्मात्मदेहगुणवत्विचाराचारियद्वचः॥तदस्यापद्यतेनान्यदध्यात्मात्मस्वरूपवत्॥त्वमव्यक्तमनिर्देश्यंग
विद्यानामकर्मवत्॥अपाणिपादरूपंचशुद्धंनित्यंपरंपदं॥शृणोष्यकर्णःपरिपश्यसित्वमचक्षुरेकोबहुरूपरूपः॥अपा
दहस्तोजवनोग्रहीतात्वंवेत्सिसर्वंनचसर्ववेद्यः॥अणोरणीयांसमनुस्वरूपंत्वांपश्यतोज्ञाननिवृत्तिरग्र्या॥धीरस्यधीर्य
स्यबिभर्त्तिनान्यत्वरेण्यरूपात्परतःपरात्मन्॥त्वंविश्वनाभिर्भुवनस्यगोप्तासर्वाणिभूतानितवांतराणि॥यद्भूतभव्यं
तदनोरणीयःपुमांस्त्वमेकःप्रकृतेःपरस्तात्॥एकश्चतुर्द्धाभगवान्हुताशोवर्च्चोविभूतिंजगतोददातित्वंविश्वतश्चक्षुरनंत
मूर्त्ते॥त्रेधापदंत्वंनिदधेविधातः॥यथाग्निरेकोबहुधासमिध्यतेविकारभेदैरुविकाररूपः॥तथाभवान्सर्वगतैकरूपोरू
पाण्यनेकान्यनुपश्यसीशः॥एकस्त्वमग्र्यंपरमंपदंयत्पश्यंतित्वांसूरयोज्ञानदृश्यं॥त्वत्तोनान्यत्किंचिदस्तिस्वरूपंयद्वाभू
तंयच्चभाव्यंपरात्मन्॥व्यक्ताव्यक्तस्वरूपस्त्वंसमष्टिव्यष्टिरूपवान्॥सर्वज्ञसर्वदृक्सर्वशक्तिज्ञानबलर्द्धिमान्॥अन्यूनश्चा
प्रवृद्धश्चस्वाधीनोनादिमान्वशी क्लमतंद्रीभयक्रोधकामादिभिरसंयुतः॥निरवद्यःपरःप्रांतेनिरधिष्ठोक्षरोक्रमः॥सर्वेश्वरः
पराधारःधाम्नांधामात्मकोक्षयः॥सकलावरणातीतनिरालंबनभावनः॥महाविभूतिसंस्थाननमस्तेपुरुषोत्तम॥ना
कारणात्कारणाद्वाकारणाकारणान्नच॥शरीरग्रहणंव्यापिन्धर्मत्राणायतेपरं॥पराशरउवाच॥इत्येवंसंस्तवंश्रुत्वा

पंच०
२

मनसाभगवानजः॥ब्रह्माणमाहप्रीतात्माविश्वरूपधरोहरिः॥श्रीभगवानुवाच॥भोभोब्रह्मंस्त्वयामत्तःसर्वदेवैर्यदिष्यते॥तदुच्य
तामशेषंवःसिद्धमेवावधार्यतां॥पराशरउवाच॥ततोब्रह्माहरेर्दिव्यंविश्वरूपमवेक्ष्यतत्॥तुष्टावभूयोदेवेषुसाध्वसावनतेषुसः॥
ब्रह्मोवाच॥नमोनमस्तेस्तुसहस्रमूर्त्तेसहस्रबाहोर्बहुवक्त्रपाद॥नमोनमस्तेजगतःप्रवृत्तिविनाशसंस्थानकराप्रमेय॥सू
क्ष्मातिसूक्ष्मातिबृहत्प्रमाणगरीयसामप्यतिगौरवात्मन्॥प्रधानबुद्धींद्रियवत्प्रधानमूलात्परात्मन्भगवन्प्रसीद॥एषाम
हीदेवमहीप्रसूतैर्महासुरैःपीडितशैलबंधाः॥परायणंत्वांजगतामुपैतिभारावतारार्थमपारपारं॥एतेवयंवृत्ररिपुस्तथायंना
सत्यदस्रौवरुणस्तथैषः॥इमेवरुद्राःवसवःससूर्याःसमीरणाग्निप्रमुखास्तथान्ये॥सुराःसमस्ताःसुरनाथकार्यमेभिर्मयायच्च
तदीशसर्वं॥आज्ञापयाज्ञांपरिपालयंतस्तवैवतिष्ठामसदास्तदोषाः॥पराशरोवाच॥एवंसंस्तूयमानस्तुभगवान्परमेश्व
रः॥उज्जहारात्मनःकेशौसितकृष्णौमहामुने॥उवाचचसुरानेतौमत्केशौचसुधातले॥अवतीर्यभुवोभारक्लेशहानिंकरिष्य
तः॥सुराःसकलाःस्वांशैरवतीर्यमहीतलं॥कुर्वंतुयुद्धमुन्मत्तैःपूर्वोत्पन्नैर्महासुरैः॥ततःक्षयमशेषास्तेदैतेयाधरणीतले॥
प्रयास्यंतिनसंदेहोमद्दृक्पातविचूर्णिताः॥वसुदेवस्ययापत्नीदेवकीदेवतोपमा॥तस्यायमष्टमोगर्भोमत्केशोभवितासुराः॥अ
वतीर्यचतत्रायंकंसंघातयितायुधि॥कालनेमिसमुद्भूतमित्युक्त्वांतर्दधेहरिः॥अदृश्यायततस्तेपिप्रणिपत्यमहामुने॥मेरुपृ
ष्ठंसुराजग्मुरवतेरुश्चभूतले॥कंसायचाष्टमोगर्भोदेवक्यांधरणीधरः॥भविष्यतीत्याचचक्षेभगवान्नारदोमुनिः॥कंसो

पितद्दुपश्कस्यनारदात्कुपितस्ततः॥देवकींवसुदेवंचगृहेगु— चधारयमत्॥जातंजातंचकंसायतेनैवोक्तंयथापुरा॥तथैववसु
देवोपिपुत्रमर्पितवान्द्विज॥हिरण्यकशिपोःपुत्राःषड्गर्भाइतिविश्रुताः॥विष्णुप्रयुक्तातान्निद्राक्रमाद्गर्भाननोदयत्॥योगनिद्राम
हामायावैष्णवीमोहितंयया॥अविद्ययाजगत्सर्वंतामाहभगवान्हरिः॥श्रीविष्णुरुवाच॥निद्रेगच्छममादेशात्पातालतलसंश्र
यान्॥एकैकश्येनषड्गर्भान्देवकीजठरंनय॥हतेषुतेषुकंसेनशेषाख्योंशस्ततोमम॥अंशांशेनोदरेतस्याःसप्तमःसंभविष्य
ति॥गोकुलेवसुदेवस्यभार्यान्यारोहिणीस्थिता॥तस्याःससंभूतिसमंदेविनेयस्त्वयोदरं॥सप्तमोभोजराजस्यभयाद्रोधोपरो
धतः॥देवक्याःपतितोगर्भइतिलोकोवदिष्यति॥गर्भसंकर्षणात्सोथलोकेसंकर्षणेतिवै॥संज्ञामवाप्यतेवीरःश्वेताद्रिशिखरो
पमः॥ततोहंसंभविष्यामिदेवकीजठरेशुभे॥गर्भेत्वयायशोदायांगंतव्यमवलंबितं॥प्रावृट्कालेचनभसिकृष्णाष्टम्यामहंनि
शि॥उत्पत्स्यामिप्रसूतिंचनवम्यांत्वमवाप्स्यसि॥यशोदाशयनेमांचदेवक्यास्त्वामनिंदिते॥मच्छक्तिप्रेरितमतिर्वसुदेवोनयिष्य
ति॥कंसश्चत्वामुपादायदेवशैलशिलातटे॥प्रक्षेप्स्यत्यंतरिक्षेचत्वंस्थानंसमवाप्स्यसि॥ततस्त्वांशतधाशक्रःप्रणम्यमम
गौरवात्॥प्रणिपातानतशिराभगिनीत्वेग्रहीष्यति॥ततःशुंभनिशुंभादीन्हत्वादैत्यान्सहस्रशः॥स्थानैरशेषैःपृथिवीम
शेषांमंडयिष्यसि॥संभूतिःसन्नतिःकीर्तिःक्षांतिर्द्यौःपृथिवीधृतिः॥लज्जापुष्टिरुषायाचकाचिदन्यात्वमेवसा॥येत्वमार्येति
दुर्गेतिवेदगर्भेंबिकेतिच॥भद्रेतिभद्रकालीतिक्षेम्याक्षेमंकरीतिच॥प्रातश्चैवापराह्णेचस्तोष्यंत्यानम्रमूर्त्तयां॥तेषांहिप्रार्थितं

सर्वंमत्प्रसादात्भविष्यति॥सुरामांसोपहारैश्चभक्ष्यभोज्यैश्चपूजिता॥नृणामशेषकामांस्त्वंप्रसन्नासंप्रदास्यसि॥तेसर्वेस
र्वदाभद्रेमत्प्रसादादसंशयं॥असंदिग्धाभविष्यंतिगच्छदेवियथोदितं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेप्रथमोध्यायः॥ ॥छ॥
श्रीपराशरउवाच॥यथोक्तंसाजगद्धात्रीदेवदेवेनवैपुरा॥षड्गर्भागर्भविन्यासंचक्रेचान्यस्यकर्षणं॥सप्तमेरोहिणींप्राप्तेग
र्भेगर्भंततोहरिः॥लोकत्रयोपकारायदेवक्याःप्रविवेशवै॥योगनिद्रायशोदायास्तस्मिन्नेवततोहनि॥संभूताजठरेतद्व
द्यथोक्तंपरमेष्ठिना॥ततोग्रहगणःसम्यक्प्रचचारदिविद्विज॥विष्णोरंशेभुवंयातेऋतवश्चाभवन्शुभाः॥नसेहेदेवकींद्र
ष्टुंकश्चिदप्यतितेजसा॥जाज्वल्यमानांतांदृष्ट्वामनांसिक्षोभमाययुः॥अदृष्टापुरुषस्त्रीभिर्देवकींदेवतागणाः॥बिभ्राणांव
पुषाविष्णुंतुष्टुवुस्तामहर्निशं॥प्रकृतिस्त्वंमहासूक्ष्माब्रह्मगर्भाभवत्पुरा॥ततोवाणीजगधातुवेदगर्भासिशोभने॥सृ
ज्यस्वरूपगर्भाचसृष्टिभूतासनातने॥बीजभूताचसर्वस्ययज्ञगर्भाभवत्त्रयी॥फलगर्भात्वमेवेज्यावह्निगर्भातथारणिः॥अ
दितिर्देवगर्भात्वंदैत्यगर्भातथादितिः॥ज्योत्स्नाशशांकगर्भात्वंज्ञानगर्भावसन्नतिः॥नयगर्भाधरानीतिर्लज्जात्वंप्रश्रयोद्वहा॥
कामगर्भातच्छात्वंत्वंतुष्टिःसंतोषगर्भिणी॥मेधावबोधगर्भासिधैर्यगर्भोद्वहाधृतिः॥ग्रहर्क्षतारकागर्भाद्यौरस्याखिलहेतुकी॥
एताविभूतयोदेवितस्यान्याश्चसहस्रशः॥असंख्याताजगद्धात्रिसांप्रतंजठरेतव॥समुद्राद्रिनदीद्वीपवनपत्तनभूषणाः॥
ग्रामखर्वटखेटाढ्यासमस्तापृथिवीशुभे॥समस्तवन्हयोंभांसिसकलाश्चसमीरणाः॥ग्रहर्क्षतारकाचित्रंविमान

शतसंकुलं॥अवकाशमशेषस्ययद्ददातिनभश्चतत्॥भूर्लोकोथभुवर्लोकःस्वर्लोकोप्यमहर्जयैः॥तपश्चब्रह्मलोकश्चब्रह्मां
डमषिलशुभे॥तदंतर्येस्थितादेवादैत्यगंधर्वचारणाः॥महोरगास्तथायक्षाराक्षसाःप्रेतगुह्यकाः॥मनुष्याःपशवश्चान्ये
येचजीवायशस्विनि॥तेरंतःस्थैरनंतोसौसर्वेशःसर्वभावनः॥रूपकर्मस्वरूपाणिनपरिच्छेदगोचरे॥यस्याखिलप्रमाण
नि॥सविष्णुर्गर्भगस्तव॥त्वंस्वाहात्वंस्वधाविद्यासुधात्वंज्योतिरंबरे॥त्वंसर्वलोकरक्षार्थंअवतीर्णामहीतले॥प्रसीददेविस
र्वस्यजगतस्त्वंशुभंकुरु॥प्रीसात्वंधारयेशानंधृतंजेनाखिलंजगत्॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेद्वितीयोध्यायः॥
पराशरउवाच॥एवंसंस्तूयमानासादेवैर्देवमधारयत्॥गर्भेणपुंडरीकाक्षंजगतांत्राणकारणं॥ततोखिलजगत्पद्म
बोधायाच्युतभानुना॥देवकीपूर्वसंध्यायामाविर्भूतंमहात्मना॥तज्जन्मदिनमत्यर्थमह्लादयेमलदिङ्मुखं॥बभूवसर्व
लोकस्यकौमुदीशशिनोयथा॥संतःसंतोषमधिकंप्रशमंचंडमारुताः॥प्रसादंनिम्नगायाताजायमानेजनार्दने॥सिंधवो
निजशब्देनवाद्यंचक्रुर्मनोरमं॥जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणा॥ससृजुःपुष्पवर्षाणिदेवाभुव्यंतरिक्षगाः॥जज्व
लुश्चाग्नयःशांताजायमानेजनार्दने॥मध्यरात्रेखिलाधारेजायमानेजनार्दने॥मंदंजगर्जुर्जलदाःपुष्पवृष्टिमुचोदिवि॥फु
ल्लेंदीवरपद्माभंचतुर्बाहुमुदीक्ष्यतं॥श्रीवत्सवक्षसंजातंतुष्टावानकदुंदुभिः॥अभिष्टुयचतंवाग्भिःप्रसन्नाभिर्महामतिः॥
विज्ञापयामासतदाकंसाद्भीतोद्विजोत्तम॥वसुदेवोवाच॥योनंतरूपोखिलविश्वरूपोगर्भेपिलोकान्वपुषाबिभर्ति॥प्रसी

दतामेषसदेवदेवोयोमाययाविष्कृतबालरूपः॥उपसंहारसर्वात्मन्रूपमेतच्चतुर्भुजं॥जानातुमावतारंतेकंसोयंदितिजात्म
जः॥श्रीभगवानुवाच॥स्तुतोहंयत्त्वयापूर्वंपुत्रार्थिन्यातदद्यते॥सफलंदेविसंजातंजातोहंयत्तवोदरात्॥पराशरोवाच
इत्युक्त्वाभगवांस्तूष्णींबभूवद्विजसत्तम॥वसुदेवोपितंरात्रावादायप्रययौबहिः॥मोहिताश्चाभवंस्तत्ररक्षिणोयोग
निद्रया॥मथुराद्वारपालाश्चव्रजत्यानकदुंदुभिः॥वर्षतांजलदानांचतोयमत्युल्बणंनिशि॥संछाद्यानुययौशेषःफ
णेनानकदुंदुभिं॥यमुनांचातिगंभीरांनानावर्त्तशताकुलां॥वसुदेवोवहन्विष्णुंजानुमात्रवहांययौ॥कंसस्यकरदाना
यतत्रैवाभ्यागतांतटे॥नंदादीन्गोपवृद्धांश्चयमुनायांददर्शह॥तस्मिन्कालेयशोदापिमोहितायोगनिद्रया॥तामे
वचकन्यांमैत्रेयप्रसूतामोहितेजने॥वसुदेवोपिविन्यस्यबालमादायदारिकां॥यशोदाशयनेतूर्णमाजगामामि
तद्युतिः॥ददृशेचप्रबुद्धासायशोदाजातमात्मजं॥नीलोत्पलदलश्यामंततोत्यर्थंमुदंययौ॥आनीयवसुदेवोपिदारिकां
निजमंदिरे॥देवकीशयनेन्यस्ययथापूर्वमतिष्ठत॥ततोबालध्वनिंश्रुत्वारक्षिणःसहसोत्थिताः॥कंसायावेदयामासु
र्देवकीप्रसवंद्विज॥कंसस्तूर्णमुपेत्यैनांततोजग्राहदारिकां॥मुंचमुंचेतिदेवक्यासन्नकंठंनिवारितः॥चिक्षेपचशिला
पृष्ठेसाक्षिप्तावितिस्थितां॥अवापरूपंसुमहत्सायुधमहाभुजं॥प्रजहासतथैवोच्चैःकंसंचरुषिताब्रवीत्॥किंम
याक्षिप्तयाकंसःजातोयस्त्वांवधिष्यति॥सर्वस्वभूतोदेवानामासीन्मृत्युःसतेपुरा॥तदेतत्संप्रधार्याशुक्रियतांहि

तमात्मनः॥इत्युक्त्वाप्रययौदेवीदिव्यस्रग्गंधभूषणा॥पश्यतोभोजराजस्यस्तुतादेवैर्विहायसा॥ ॥इतिविष्णुपुराणेपंचमेंशेतृ
तीयोध्यायः॥ ॥श्रीपराशरउवाच॥कंसस्तदोद्विग्नमनाःप्राहसर्वान्महासुरान्॥प्रलंबकेशिप्रमुखानाहूयासुरपुंगवः॥
कंसोवाच॥हेप्रलंबमहाबाहोकेशिन्धेनुकपूतने॥अरिष्टाद्यैस्तथाचान्यैःश्रूयतांवचनंमम॥मांहंतुममरैर्यत्नःकृतः
किलदुरात्मभिः॥मद्वीर्यतापितैर्वीरान्नत्वेतान्गणयाम्यहं॥किमिंद्रेणाल्पवीर्येणकिंहरेणैकचारिणा॥हरिणावापिकिंसा
ध्यंछिद्रेष्वसुरघातिना॥किमादित्यैःकिंवसुभिरल्पवीर्यैःकिमग्निभिः॥किन्नरैर्यक्षगंधर्वैर्मद्बाहुबलनिर्जितैः॥किंनदृष्टो
मरपतिर्मयासंयुगमेत्यसः॥पृष्ठेनैवोद्वहन्बाणानुपागच्छन्नवक्षसा॥मद्राष्ट्रेवारितावृष्टिर्यदाशक्रेणकिंतदा॥मद्बाण
भिन्नैर्जलदैर्नापोमुक्तायथेप्सिताः॥किमुर्व्यामवनीपालामद्बाहुबलनिर्जिताः॥सर्वेतेसंनतिंयाताजरासंधमृतेगुरुं॥अम
रेषुममावज्ञाजायतेदैत्यपुंगवाः॥हास्यंमेजायतेवीरास्तेषुयत्नपरेष्वपि॥तथापिखलुदुष्टानांतेषुमप्यधिकंमया॥अपकारा
यदैतेयायतनीयंदुरात्मनां॥तथेयश्विनःकेचित्पृथिव्यांयेचयज्विनः॥कार्योदेवापकारायतेषांसर्वात्मनांवधः॥उत्पन्नश्चापि
मृत्युर्मेभूतपूर्वःसमेकिल॥इत्येतद्बालिकाप्राहदेवकीगर्भसंभवा॥तस्माद्बालेषुपरमोयत्नःकार्योमहीतले॥यत्रोद्रिक्तंब
लंबालेसहंतव्यःप्रयत्नतः॥इत्याज्ञाप्यासुरान्कंसःप्रविश्यात्मगृहंततः॥मुमोचवसुदेवंचदेवकींचनिरोधनात्॥युवयोर्घाति
तागर्भावृथैवैतेमयाधुना॥कोप्यन्यएवनाशायबालोममसमुद्यतः॥तदलंपरितापेननूनंतद्भाविनोहिते॥अर्भकायुवयोः

कोवानायुषोंथत्येविहन्यते॥इत्याश्वास्यविमुक्त्वाचकंसस्तावपरिशंकितः॥अंतर्गृहंद्विजश्रेष्ठप्रविवेशतदास्वकं॥श्रीविष्णुपु
राणेपंचमेंशेचतुर्थोध्यायः॥ ॥पराशरोवाच॥विमुक्तोवसुदेवोपिनंदस्यशकटंगतः॥प्रहृष्टंदृष्टवान्नंदंपुत्रोजातोममेतिवै॥
वसुदेवोपितंप्राहदिष्ट्यादिष्टेतिसादरं॥वार्धक्येपिसमुत्पन्नस्तनयोयंतवाधुना॥दत्तोहिवार्षिकःसर्वोभवद्भिर्नृपतेःकरः॥
यदर्थमागतास्तस्मान्नात्रस्थेयंमहाधनाः॥यदर्थमागताःकार्यंनिष्पन्नंकिमास्यते॥भवद्भिर्गम्यतांनंदतच्छीघ्रंनंदगोकुलं॥
ममापिबालकस्तत्ररोहिणीप्रसवोहियः॥सरक्षणीयोभवतायथायंतनयोनिजः॥इत्युक्तेप्रययौगोपानंदगोपपुरोगमाः॥
शकटारोपितैर्भांडैःकरंदत्वामहाबलाः॥वसतांगोकुलेतेषांपूतनाबालघातिनी॥सुप्तंकृष्णमुपादायरात्रौतस्मैददौस्त
नं॥यस्मैयस्मैस्तनंरात्रौपूतनासंप्रयच्छति॥तस्यतस्यक्षणेनांगंबालकस्योपहन्यते॥कृष्णस्तस्याःस्तनंगाढंकराभ्याम
भिपीडितं॥गृहीत्वाप्राणसहितंपपौकोपसमन्वितः॥साविमुक्तमहारावाविच्छिन्नस्नायुबंधना॥पपातपूतनाभूमौ
म्रियमातिभीषणाः॥तन्नादश्रुतिसंत्राससविबुधास्तेव्रजौकसः॥ददृशुःसंपूतनासंगेकृष्णंतांचनिपातिते॥आदायकृष्णंसं
त्रस्तायशोदापिद्विजोत्तम॥गोपुच्छभ्रामणेनास्यबालदोषमपाकरोत्॥पुरीषमुपादायनंदगोपोपिमस्तके॥कृष्णस्यप्राद
दोरक्षांकुर्वंश्चैवतदुदीरयत॥नंदोवाच॥रक्षतुत्वामशेषाणांभूतानांप्रभवोहरिः॥यस्यनाभिसमुद्भूतपंकजादभव
ज्जगत्॥येनदंष्ट्राग्रविधृताधारयत्यवनीजगत्॥वराहरूपधृक्देवःसत्वांरक्षतुकेशवः॥गुह्यंसजठरंविष्णुर्जंघापा

वि॰पु॰
६

दंजनार्दनः॥नखांकुरविनिर्भिन्नवैरिवक्षःस्थलोविभुः॥नृसिंहरूपीसर्वत्ररक्षतुत्वांजनार्दनः॥वामनोरक्षतुसदाभवंतंयःक्ष
णादभूत्॥त्रिविक्रमक्रमाक्रांतत्रैलोक्यस्फुरदायुधः॥शिरस्तेपातुगोविंदःकंठंरक्षतुकेशवः॥गुह्यंसजठरंविष्णुर्जंघापादंजना
र्दनः॥मुखंबाहूप्रबाहूचमनःसर्वेंद्रियाणिच॥रक्षत्वव्याहतैश्वर्यस्तवनारायणोव्ययः॥शार्ङ्गचक्रगदापाणिःशंखनादहताः
क्षयं॥गच्छंतुप्रेतकूष्मांडराक्षसायेतवाहिताः॥त्वांपातुदिक्षुवैकुंठोविदिक्षुमधुसूदनः॥हृषीकेशोंबरेभूमौरक्षतुत्वांमहीध
रः॥एवंकृतस्वस्त्ययनोनंदगोपेनबालकः॥शायितःशकटस्याधोबालपर्यंकिकातले॥तेचगोपामहद्दृष्ट्वापूतनायाःक
लेवरं॥मृतायाःपरमंत्रासंविस्मयंचपरंययुः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेपंचमोध्यायः॥श्रीपराशरोवाच॥कदाचित्
शकटस्याधःशयानोमधुसूदनः॥चिक्षेपचरणावूर्ध्वंस्तन्यार्थीप्ररुरोदच॥तस्यपादप्रहारेणशकटंपरिवर्तितं॥विध्वस्तभां
डकुंभंतत्विपरीतंपपातवै॥ततोहाहाकृतःसर्वोगोपगोपीजनोद्विज॥आजगामाथददृशुर्बालमुत्तानशायिनं॥गोपाःकेनेति
केनेदंशकटंपरिवर्तितं॥तत्रैवबालकाश्चोचुर्बालेनानेनपातितः॥पुनरतीवासन्गोपाविस्मितमानसाः॥नंदगोपोपिजग्रा
हबालमत्यर्थविस्मितः॥यशोदाशकटारूढभग्नभांडकपालिकं॥शकटंचार्चयामासदधिपुष्पजलाक्षितैः॥गर्गश्चगो
कुलेतत्रवसुदेवप्रचोदितः॥प्रच्छन्नएवगोपानांसंस्कारानकरोत्तयोः॥ज्येष्ठंराममथैवाहकृष्णंचैवतथापरं॥गर्गोमतिम
तांज्येष्ठोनामकुर्वन्महामतिः॥स्वल्पेनैवहिकालेनरिंगिणौतौतदाव्रजे॥घृष्टजानुकरौविप्रबभूवतुरुभावपि॥करीषभस्म

पंच॰
६

दिग्धांगौरममाणावितस्ततः॥ननिवारयितुंसेहेयशोदातौनरोहिणी॥गोवाटमध्येक्रीडंतौवत्सवाटंगतौपुनः॥तदहर्जात
गोवत्सपुच्छाकर्षणतत्परौ॥यदायशोदातौबालावेकस्थानचरावुभौ॥शशाकनोवारयितुंक्रीडंतावतिचंचलौ॥दाम्नाब
ध्वातदामध्येबबंधाथतदूखले॥कृष्णमक्लिष्टकर्माणमाहचेदममर्षिता॥यदिशक्नोषिगच्छत्वमतिचंचलचेष्टित॥इ
त्युक्त्वाथनिजंकर्मसाचकारकुटुंबिनी॥व्यग्रायामथतस्यांसकर्षमाणउलूखलं॥यमलार्जुनमध्येनजगामकमलेक्षणः॥क
र्षतावृक्षयोर्मध्येतिर्यग्यातमुलूखलं॥भग्नावुत्तुंगशाखाग्रौतेनतौयमलार्जुनौ॥ततःकटकटाशब्दसमाकर्षणकातरः
आजगामव्रजजनोददृशेथमहाद्रुमौ॥भग्नस्कंधौनिपतितौभग्नशाखौमहीतले॥नवोद्गताल्पदंतांशुसितहासंचबालकं॥
तयोर्मध्यगतंबद्धंदाम्नागाढमुदूखले॥ततश्चदामोदरतांसययौदामबंधनात्॥गोपवृद्धास्ततःसर्वेनंदगोपपुरोगमाः॥
मंत्रयामासुरुद्विग्नामहोत्पातातिगौरवः॥स्थानेनेहनूनःकार्यंव्रजामोन्यन्महावनं॥उत्पाताबहवोह्यत्रदृश्यंतेनात्रहेतवः॥
पूतनायाविनाशश्चशकटस्यविपर्ययं॥विनावातादिदोषंचद्रुमयोःपतनंतथा॥वृंदावनमितःस्थानात्तस्माद्गच्छाममाचिरं॥
यावद्भौममहोत्पातदोषोनाभिभवेद्व्रजे॥इतिकृत्वामतिंसर्वेगमनेतेव्रजौकसः॥ऊचुःस्वंस्वंकुलंशीघ्रंगम्यतांमाविलंबत॥
ततःक्षणेनप्रययुःशकटैर्गोधनैस्तथा॥यूथशोवत्सपालाश्चकालयंतोव्रजौकसः॥द्रव्यावयवनिर्धूतंक्षणमात्रेणतत्तथा॥
काककाकीसमाकीर्णंव्रजस्थानमभूद्द्विज॥वृंदावनेभगवताकृष्णेनाक्लिष्टकर्मणा॥शुभेनमनसाध्यातंगवांसिद्धिमभी

वि॰पु॰
७

षता॥ततस्तत्रातिरूक्षेपि घर्मकालेद्विजोत्तम॥प्राव्रट्कालइवोद्भूतंनवशिष्यंसमंततः॥ससमावासितःसर्वोव्रजोवृंदावने
ततः॥शकटीवाटपर्यंतचंद्रार्द्धाकारसंस्थितिः॥वत्सपालेतुसंवृत्तौरामदामोदरौततः॥तत्रस्थानस्थितौगोष्ठेचेरतुर्बाललील
या॥बर्हिपत्रकृतापीडौवन्यपुष्पावतंसकौ॥गोपवेषकृतातोद्यौपत्रवाद्यकृतस्वनौ॥काकपक्षधरौबालौकुमाराविवपाव
कौ॥हसंतौचरमंतौचचेरतुस्तन्महावनं॥क्वचिद्धसंतावन्योन्यंक्रीडमानौतथापरैः॥गोपपुत्रैःसमंवत्सांश्चारयंतौविचेरतु॥काले
नगच्छतातौतुसप्तवार्षौबभूवतु॥सर्वस्यजगतःपालौवत्सपालौबभूवतु॥प्रावृट्कालोमुनेतीवमेघौघस्थगितांबरः॥बभू
ववारिधाराभिरैक्यंकुर्वन्दिशामिव॥प्ररूढनवशिष्पाढ्याशक्रगोपास्तृतामही॥तदामारकतेवासीत्पद्मरागविभूषिता॥ऊ
हुरुन्मार्गगामीनिनिम्नगांभांसिसर्वतः॥मनांसिदुर्विनीतानांप्राप्यलक्ष्मींनवामिव॥नरेजेंतर्हितश्चंद्रोनिर्मलोमलिनैर्घनैः॥
सद्वाक्यवादोमूर्खाणांप्रगल्भाभिरिवाकृतिः॥निर्गुणेनापिचापेनशक्रस्यगगनेपदं॥अवाप्यताविवेकस्यनृपस्येवपरिग्र
हे॥मेघपृष्ठेबलाकानांरराजविमलाततिः॥दुर्वृत्तेवृत्तचेष्टेवकुलीनस्यातिशोभना॥नबबंधांबरेस्थैर्यंविद्युदत्यंतचंचला॥
मैत्रीवप्रवरेपुंसिदुर्जनेनप्रयोजिता॥मार्गाबभूवुरस्पष्टानवशिष्पचयावृताः॥अर्थांतरमनुप्राप्ताःपंडितानामिवोक्तयः॥
उन्मत्तःशिखिसारंगेतस्मिन्कालेमहावने॥कृष्णरामौमुदायुक्तौगोपालैश्चेरतुःसह॥क्वचिद्गोपैःसमंरम्यंगेयतानरतावुभौ॥चे
रतुःक्वचिदत्यर्थंशीतवृक्षतलाश्रयौ॥क्वचित्कदंबस्रक्चित्रौमायूरस्रक्धरौक्वचित्॥विचित्रौक्वचिदासेतांविविधैर्गिरि

पंच॰
७

धातुभिः॥पर्णशय्यासुसंसुप्तौक्वचिन्निद्रांतरैषिणौ॥क्वचिद्गर्ज्जतिजीमूतेहाहाकारपरस्वनौ॥गायतामन्यगोपानांप्रशंसापर
मौक्वचित्॥मयूरकेकानुगतौगोपवेणुप्रवादकौ॥इतिनानाविधैर्भावैरुत्तमप्रीतिसंयुतौ॥क्रीडंतौतौवनेतस्मिंश्चेरतुस्तुष्टमा
नसौ॥किविकाचसमंगोभिर्गोपवृंदसमन्वितौ॥वर्षाकालेतथायोगंव्रजमेत्यमहाबलौ॥गोपैःसमानैःसहितौचक्रीडातेम
राविव॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेषष्ठोध्यायः॥ ॥६॥श्रीपराशरोवाच॥एकदातुविनारामंकृष्णोवृंदावनंगतः॥विचचारस
मंगोपैर्वन्यपुष्पस्रगुज्ज्वलः॥सजगामाथकालिंदींलोलकल्लोलमालिनीं॥तीरसंलग्नफेनौघैर्हसंतीमिवसर्वतः॥तस्यांचाति
महाभीमंविषाग्निसृतवारिणा॥ह्रदंकालियनागस्यददर्शोकालभाषणं॥विषाग्निनाप्रसरतादग्धतीरमहातरुं॥वाताहतां
बुविक्षेपस्पर्शदग्धविहंगमं॥तमतीवमहारौद्रंमृत्युवक्त्रमिवापरं॥विलोक्यचिंतयामासभगवान्मधुसूदनः॥अस्मिन्वस
तिदुष्टात्माकालियोसौविषायुधः॥योमयानिर्जितस्त्यक्त्वादुष्टोनष्टःपयोनिधिं॥तेनेयंदूषिताःसर्वायमुनासागरंगमा॥ननरै
र्गोधनैर्वापितृषार्त्तैरुपभुज्यते॥तदस्यनागराजस्यकर्त्तव्योनिग्रहोमया॥सर्वेपिचसुखंयेनचरेयुर्व्रजवासिनः॥एतदर्थंतु
लोकेस्मिन्नवतारोमयाकृतः॥यदेषामुत्पथस्थानांकार्याशास्तिर्दुरात्मनां॥तदेतन्नातिदूरस्थंकदंबंगुरुशाखिनं॥अधि
रुह्यपतिष्यामिह्रदेस्मिन्ननिलाशिनः॥पराशरोवाच॥इत्थंनिश्चित्यबध्वायगाढंपरिकरंततः॥निपपातह्रदेतस्मिन्सर्प
राजस्यवेगतः॥तेनापिपतनातत्रक्षोभितःसमहाह्रदः॥अत्यर्थंदूरजातांस्तुसिंचन्सोथमहीरुहान्॥तेहिदुष्टविषज्वा

वि॰पु॰ ल्लातसोंबुपवनोक्षित॥ जज्वलुः पादपासद्यो ज्वालाव्याप्तादिगंतराः॥ आफ्लोयामास तदा॥ कृष्णो नागह्रदे भुजं॥ तच्छब्दश्रव
८ णाच्चाशु नागराजोऽभ्युपागमत्॥ आताम्रनयनः कोपाद्विषज्वालावणैः फणैः॥ वृतो महाविषैश्चान्यैरुरगैरनलानिलैः॥ नागप
त्न्यश्च शतशो हारिहारोपशोभिताः॥ प्रकंपिततनूत्क्षेपचलकुंडलकांतयः॥ ततः प्रवेष्टितः सर्पैः स कृष्णो भोगबंधनं॥ ददंशु
विलैः श्चापि ते कृष्णं विषज्वालैर्मुखैः॥ तं तत्र पतितं दृष्ट्वा सर्पभोगनिपीडितं॥ गोपव्रजमुपागम्य चुक्रुशुः शोकलालसाः॥ एष मोह
तः कृष्णो मग्नो वै कलिये ह्रदे॥ भक्षिते सर्पराजेन तदागच्छत पश्यत॥ तत् श्रुत्वा ते तदा गोपा वज्रपातोपमं वचः॥ गोपाश्च
त्वरिता जग्मुर्यशोदाप्रमुखा ह्रदं॥ हाहाकाराविति जनो गोपी रामश्चाद्भुतविक्रमे॥ त्वरिता यमुनां जग्मुः कृष्णदर्शनलालसाः॥ दृष्ट
शुश्चापि ते तत्र सर्पराजवशंगतं॥ निःप्रयत्नीकृतं कृष्णं सर्पभोगेन तिष्ठतं॥ नंदगोपश्च निश्चेष्टो न्यस्यपुत्रमुखे दृशं॥ यशोदा च
महाभागा बभूव मुनिसत्तम॥ गोपगोप्योरुदंस्यसस्त्वाददृष्टुः शोककातराः॥ प्रोचुश्च केशवं प्रीत्या भयकातर्यगद्गदं॥ सर्वा यशो
दया सार्धं विशामोत्र महाह्रदे॥ नागराजस्य नो गंतुमस्माकं युज्यते व्रजं॥ विनाकृतान पश्यामः कृष्णेनानेन गोकुले॥ सुरम्यं ना
तिसेव्यं तवारिहीनं यथा सरः॥ यत्रनेंदीवरदलप्रख्यकांतिरयं हरिः॥ तेनापि मातुर्वासेन रतिरस्तीति विस्मयं॥ फुल्लपंकजदल ३
स्पष्टकांतिविलोचनं॥ अपश्यंतो हरिं दीनाः कथं गोष्ठे भविष्यथ॥ अत्यर्थमधुरालापस्मिताशेषमनोहरं॥ न विना पुंडरीकाक्षं पंच॰
यास्यामो नंदगोकुले॥ भोगेनावेष्टितस्यापि सर्पराजस्य पश्यत॥ स्मितशोभिमुखं गोपाः कृष्णस्यास्मद्विलोचने॥ इति गोपीवच ८

श्रुत्वा रौहिणेयो महाबलः॥ गोपांश्च त्रासविधुरान् विलोक्य स्तिमितेक्षणाः॥ नंदं च दीनमत्यर्थं न्यस्तदृष्टिं सुतानने॥ मूर्छाकुलां यशोदां
च कृष्णमाहात्म्यसंज्ञया॥ किमयं देवदेवेश भावो वै मानुषस्त्वया॥ व्यज्यतेत्यंतमात्मानं किमनंतं न वेत्स्ययत्॥ त्वमस्य जगतो नाभिरराणा
मिसंश्रयः॥ कर्त्तापहर्त्ता पाता च त्रैलोक्यं त्वं त्रयीमयः॥ सेंद्ररुद्राश्विवसुभिरादित्यैर्मरुदग्निभिः॥ चिंत्यसे त्वमचिंत्यात्मान् समस्तै
श्चैव योगिभिः॥ जगत्यर्थे जगन्नाथ भारावतरणेच्छया॥ अवतीर्णोत्र मर्त्येषु तवांशाश्चाहमग्रजः॥ मनुष्यलीला भगवान् भवता
भजतासुराः॥ विलंडंबयंस्त्वलीलां सर्व एव समासते॥ अवतार्य भवान् पूर्वं गोकुलेषु सुरांगनाः॥ क्रीडार्थमात्मनः पश्चाद्वती
र्णोसि शाश्वत॥ अत्रावतीर्णयोः कृष्ण गोपा एव हि बांधवाः॥ गोपाश्च सीदतः कस्मात्त्वं बंधून् समुपेक्ष्यसे॥ दर्शितो मानुषो भा
वो दर्शितं बालचापलं॥ तदयं दम्यतां कृष्ण दुष्टात्मा दशनायुधः॥ श्रीपराशरोवाच॥ इति संस्मारितः कृष्णः स्मितभिन्नोष्ठसंपुटः
आस्फोट्य मोचयामास स्वं देहं भोगबंधनात्॥ आनम्य चापि नागस्य हस्ताभ्यां मध्यमं फणं॥ अरुह्य नम्रशिरसः प्रननर्तोरुवि
क्रमः॥ व्रणाः फणेभवंचास्य कृष्णस्याङ्घ्रिनिकुट्टनैः॥ यत्रोन्नति च कुरुते ननामास्य शिरस्ततः॥ मूर्छामुपाययौ भ्रांत्या नागः कृ
स्रुत ष्णस्य रेचकैः॥ अङ्घ्रिपातनिपातेव वामरुधिरं बहु॥ तं निर्भुग्नशिरोग्रीवं आस्येभ्यः स्ततशोणितं॥ विलोक्य शरणं जग्मुस्तत्पत्न्यो
मधुसूदनं॥ नागपत्न्योवाच॥ ज्ञातोसि देवदेवेश सर्वज्ञत्वमनुत्तमं॥ परं ज्योतिरचिंत्यं यत्तदंशः परमेश्वर॥ न समर्थाः सुराः
स्तोतुं यमनन्यभवं प्रभुं॥ स्वरूपवर्णनं तस्य कथं योषित्करिष्यति॥ यस्याखिलं महीव्योमजलाग्निपवनात्मकं॥ ब्रह्मांडमल्प

वि०पु० कांत्रांत्रंस्तोस्यामस्तत्क्षपंवयं॥यंततोनविदुर्नित्यंयत्स्वरूपमयोगिनः॥परमार्थमणोरल्पंस्थूलात्स्थूलंनताःस्मतं॥नयस्यजन्म
धातायस्याचांतायनांतकः॥स्थितिकर्त्ताचनान्योस्तियस्यतस्मैनमःसदा॥कोपःस्वल्पोपितेनास्तिस्थितिपालनमेवच॥कारणंका
लियस्यास्यदमनेश्रूयतामतः॥स्त्रियोनुकंप्याःसाधूनांमूढाहीनाश्चजंतवः॥यतस्ततोस्यदीनस्यक्षम्यतांक्षमतांवरः॥सम
स्तजगदाधारोभवानल्पबलःफणी॥त्वत्पादपीडितोजह्यान्मुहूर्त्तार्द्धेनजीवितं॥क्वपन्नगोल्पवीर्योयंक्वभवान्भुवनाश्रयः॥प्री
तिद्वेषौसमेहृष्टगोचरौचयतोव्यय॥ततःकुरुजगत्स्वामिन्प्रसादमवसीदतः॥प्राणांस्त्यजतिनागोयंभर्त्तृभिक्षाप्रदीयतां॥
पराशरोवाच॥इत्युक्तेताभिराश्वस्यक्लांतदेहोपिपन्नगः॥प्रसीददेवदेवेतिप्राहवाक्यंशनैःशनैः॥तवाष्टगुणमैश्वर्यंनाथ
स्वाभाविकंपरं॥निरस्तातिशयंयस्यतस्यस्तोष्यामिकिंत्वहं॥त्वंपरस्त्वंपरस्माच्चपरस्त्वंपरमात्मकः॥परस्मात्त्वंपरंब्रह्मतस्य
स्तोष्यामिकिंत्वहं॥यस्माद्ब्रह्माचरुद्रश्चचंद्रेंद्रमरुदश्विनः॥वसवश्चसहादित्यैस्तस्यस्तोष्यामिकिंत्वहं॥एकावयवसूक्ष्मांशो
यस्यैतदखिलंजगत्॥कल्पनावयवस्यांशस्तस्यस्तोष्यामिकिंत्वहं॥सदसद्रूपिणोयस्यब्रह्माद्यास्त्रिदशेश्वराः॥परमार्थं
नजानातितस्यस्तोष्यामिकिंत्वहं॥ब्रह्माद्यैरर्चितोदेवैर्यस्यपुष्पानुलेपनैः॥चंदनादिसमुद्भूतैःसोर्च्यतेवाकथंमया॥यस्यावता
ररूपाणिदेवराजःसदार्चति॥नवेत्तिपरमंरूपंसोर्च्यतेवाकथंमया॥हृदिसंकल्प्ययद्रूपंध्यानेनार्चतियोगिनः॥भावपुष्पादि पंच०
नानाथसोर्च्यतेवाकथंमया॥सोहंतेदेवदेवेशनार्च्चनादौस्तुतौनच॥समर्थोवाकृपामात्रमनोवृत्तिःप्रसीदतु॥सर्पजातिरियंक्रू

रायस्यांजातोस्मिकेशव॥तत्स्वभावोयमत्रास्तिनापराधोयमच्युत॥सृज्यतेभवतासर्वंतथासंह्रियतेजगत्॥जातिस्वरूपस्वभाव
श्चसृज्यतेसृजतात्वया॥तथाहंभवतासृष्टोजात्यारूपेणचेश्वर॥स्वभावेनचसंयुक्तस्तथेदंचेष्टितंमया॥यद्यन्यथाप्रवर्त्तेयंदे
वदेवततोमयि॥नाज्येदंडनिपातस्तेतवैववचनंयथा॥तथापियंजगत्स्वामीदंडंपातितवान्मयि॥ससोढव्योमयादंडस्त्वत्तोन्यं
परमेश्वरः॥हतवीर्योहतविषोदमितोहंत्वयाच्युत॥जीवितंदीयतामेकमाज्ञापयकरोमिकिं॥श्रीभगवानुवाच॥नात्रस्थेयं
त्वयासर्पकदाचिद्यमुनाजले॥सभृत्यपरिवारस्त्वंसमुद्रसलिलेव्रज॥मत्पदानिचतेमूर्द्धिदृष्ट्वापन्नगसागरे॥गरुडःपन्नग
रिपुस्त्वयिनप्रहरिष्यति॥पराशरोवाच॥इत्युक्त्वासर्पराजंतंमुमोचभगवान्हरिः॥प्रणम्यसोपिकृष्णायजगामपयसांनि
धिं॥पश्यतांसर्वभूतानांसभृत्यापत्यबांधवैः॥समस्तभार्याभिःसहितःपरित्यज्यस्वकंह्रदं॥गतेसर्पेपरिष्वज्यमृतंपुनरि
वागतं॥गोपास्तेमूर्द्धिहार्देनसिषिचुर्नेत्रजैर्जलैः॥कृष्णमक्लिष्टकर्माणंअन्येविस्मितचेतसः॥तुष्टुवुर्मुदितागापादृष्ट्वाजौत्रिव
जलांनदीं॥गीयमानःसगोपीभिश्चरितैश्चारुचेष्टितः॥संस्तूयमानोगोपैश्चकृष्णोव्रजमुपागमत्॥सहितोबलदेवेननंदेनचयशो
दया॥ ॥इतिविष्णुपुराणेपंचमेंशेसप्तमोध्यायः॥ ॥श्रीपराशरोवाच॥ततोगाःपालयंतौतौसहितौबलकेशवौ॥रममाणौवनेत
स्मिन्रम्यंतालवनंगतौ॥तच्चतालवनंनित्यंधेनुकोनामदानवः॥मृगमांसकृताहारःसदाध्यास्तेखराकृतिः॥तत्तुतालवनंपक्वफ
लसंपत्समन्वितं॥दृष्ट्वास्पृहान्वितागोपाःफलदानेब्रुवन्वचः॥हेरामहेकृष्णसदाधेनुकेनैषरक्ष्यते॥भूप्रदेशोयतस्तस्मात्फलानि

मानिसंतिवै॥ फलानि पक्कतालानां गंधामोदितदिग्वनं॥ यद्यमुत्तुमभीप्सामः पात्यतां यदि रोचते॥ इति गोपकुमाराणां श्रुत्वा संकर्षणो व
चः॥ कृष्णश्च पातयामास भुवि तालफलानि वै॥ फलानां पततां शब्दमाकर्ण्यासुरराड्डरः॥ आजगाम सुदुष्टात्मा कोपाद्दैतेयगर्दभः॥
पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बलं बली॥ जघानोरसि ताभ्यां च स च तेनाप्यगृह्यत॥ गृहीत्वा भ्रामणेनैव सोंबरे गतजीवितं॥ त
स्मिन्नेव स चिक्षेप वेगेन तृणराजनि॥ ततः फलान्यनेकानि तालाग्रान्निपतन्खरः॥ पृथिव्यां पातयामास महावातेरिताइव॥ अन्यान
प्यस्य वै ज्ञातीनागतान्दैत्यगर्दभान्॥ कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च वीर्यवान्॥ क्षणेनालंकृता पृथ्वी पक्वैस्तालफलैस्तदा॥
दैत्यगर्दभदेहैश्च मैत्रेय शुशुभेधिकं॥ ततो गावो निराबाधास्तस्मिंस्तालवने द्विज॥ नवशष्पं सुखं चेरुर्यन्न भुक्तमभूत्पुरा॥ ॥
॥इति श्रीविष्णुपुराणे पंचमेंशे ऽष्टमोध्यायः॥ ॥पराशर उवाच॥ तस्मिन्रासभदैतेये सानुगे विनिपातिते॥ सुगम्यं गोपगोपीनां रम्यं
तालवनं बभौ॥ ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ॥ हत्वा धेनुकदैतेयं भांडीरवटमागतौ॥ क्ष्वेडमानौ प्रगायंतौ विचिन्वंतौ च पा
दपान्॥ प्रनोदयंतौ गा दूरे व्याहरंतौ च नामभिः॥ नियोगपाशस्कंधौ तौ वनमालाविभूषणौ॥ शुशुभाते महात्मानौ बालशृंगाविवर्ष
भौ॥ सुवर्णांजनचूर्णाभ्यां तौ तदा भूषितांबरौ॥ महेंद्रायुधसंकाशौ श्वेतकृष्णाविवांबुदौ॥ चेरतुर्लोकसिद्धाभिः क्रीडाभिरितरेतरं॥
समस्तलोकनाथानां नाथभूतौ भुवं गतौ॥ मनुष्यधर्माभिरतौ मानयंतौ मनुष्यतां॥ तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनं॥
ततः संदोलिकाभिश्च नियुद्धैश्च महाबलौ॥ व्यायमं चक्रतुस्तत्र क्षेपणीयैस्तथाश्मभिः॥ तल्लिप्सुरसुरस्तत्र उभयोरममा

णयोः॥ आजगाम प्रलंबाख्यो गोपवेषतिरोहितः॥ सोवगाहत निःशंकस्तेषां मध्यममानुषः॥ मानुषं वपुरास्थाय प्रलंबो दानवोत्तमः॥
तयोश्छिद्रांतरप्रेप्सुरविषह्यममन्यत॥ कृष्णं ततो रौहिणेयं हंतुं चक्रे मनोरथं॥ हरिणाक्रीडनं नाम बालक्रीडनकं ततः॥ प्रकुर्वंतो
हि ते सर्वे द्वौ द्वौ युगपदुत्थितौ॥ श्रीदाम्ना सह गोविंदः प्रलंबेन तथा बलः॥ गोपालैरपरैश्चान्ये गोपाला दुद्रुवुः सह॥ श्रीदामानं ततः
कृष्णः प्रलंबं रौहिणीसुतः॥ जितवान्कृष्णपक्षीयैर्गोपैरन्यैः पराजितः॥ ते वाहयंतस्त्वन्योन्यं भांडीरस्कंधमेत्य वै॥ पुनर्निवर्त्तिताः स
र्वे ये ये तत्र पराजिताः॥ संकर्षणं तु पृष्ठेन शीघ्रमुत्क्षिप्य दानवः॥ न तस्थौ प्रजगामैव सचंद्र इव तोयदः॥ असहन्रौहिणेयस्य स भा
रं दानवाधमः॥ ववृधे स महाकायः प्रावृषीव बलाहकः॥ संकर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिं॥ स्रग्दामलंबाभरणं मुकुटाटो
पमस्तकं॥ रौद्रं शकटचक्राक्षं पादन्यासचलत्क्षितिं॥ ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत्॥ कृष्ण कृष्ण हृतोयामि पर्वतोदग्र
मूर्तिना॥ केनापि पश्य दैत्येन गोपालच्छद्मरूपिणा॥ यदत्र सांप्रतं कार्यं मया वलनिषूदन॥ तत्कथ्यतां प्रयात्येष दुरात्मातित्वरा
न्वितः॥ पराशर उवाच॥ तमाह रामं गोविंदः स्मितभिन्नोष्ठसंपुटः॥ रौहिणेयस्य माहात्म्यबलवीर्यप्रमाणवित्॥ किमयं मानुषो
भावो व्यक्तमेवावलंब्यते॥ सर्वात्मन्सर्वगुह्यानां गुह्यगुह्यात्मना त्वया॥ स्मराशेषजगन्नाथ कारणं कारणाग्रज॥ आत्मान
मेकं तद्वच्च जगत्येकार्णवे यमां॥ किं न वेत्सि यथाहं च त्वं चैकं कारणं भुवः॥ भारावतारणार्थाय मर्त्यलोकमुपागतौ॥ नभः शिरस्ते
बुमयी च मूर्त्तिः पादौ क्षितिर्वन्हिकमनंत वन्हिः॥ सोमो मनस्ते श्वसितं समीरो दिशश्चतस्रो व्ययबाहवस्ते॥ सहस्रवक्त्रो भगवान्म

BHAU DAJI

वि॰पु॰
११

हात्मासहस्रहस्तांघ्रिशरीरभेदाः॥सहस्रपद्मोद्भवयोनिराद्यः सहस्रशस्त्वामुनयोगृणंति॥दिव्यंहिरूपंतववेत्तिनान्योदेवैरशेषैरव
तारूपं॥तवार्चितेवेत्सिनकिंयदंतेत्वय्येवविश्वंलयमभ्युपैति॥त्वयाधृतेयंपृथिवीबिभर्त्तिचराचरंविश्वमनंतमूर्त्ते॥कृतादिभेदैरज
कालरूपोनिमेषपूर्वोजगदेतदत्सि॥अंतंयथावाडववन्हिनांबुहिमस्यरूपंपरिगृह्यकास्ते॥हिमाचलेभानुमतोंशुसंगात्जलत्वम
भ्येतिपुनस्तदेव॥एवंत्वयासंहरणेत्तमेतत्जगत्समस्तंपुनरप्यवश्यं॥तथैवसर्गायसमुद्यतस्यजगत्त्वमभ्येत्यनुकल्पमीश॥भवा
नहंचविश्वात्मनएकएवहिकारणं॥जगतोस्यजगत्यर्थेभेदेनावांव्यवस्थितौ॥तत्स्मर्यताममेयात्मन्त्वयात्माजहिदानवं॥मानुष्यमे
वावलंब्यंचबधूनांक्रियतांहितं॥पराशरउवाच॥इतिसंस्मारितोविप्रकृष्णेनसुमहात्मना॥विहस्यपीडयामासप्रलंबंबलवान्ब
ली॥मुष्टिनाचाहनन्मूर्ध्निकोपसंरक्तलोचनः॥तेनचास्यप्रहारेणबहिर्यातेविलोचने॥सनिष्कासितमस्तिष्कोमुखाच्छोणितमुद्व
मन्॥निपपातमहीपृष्ठेदैत्यवर्योममारच॥प्रलंबंनिहितंदृष्ट्वाबलेनाद्भुतकर्मणा॥प्रहृष्टास्तुष्टुवुर्गोपाःसाधुसाध्वितिचाब्रु
वन्॥संस्तूयमानोरामस्तुगोपैर्दैत्येनिपातिते॥प्रलंबेसहकृष्णेनपुनर्गोकुलमाययौ॥इतिश्रीविष्णुपुराणेपंचमेंशेनवमोध्या
यः॥ ॥पराशरउवाच॥तयोर्विहरतोरेवंरामकेशवयोर्व्रजे॥प्रावृड्व्यतीताविकसत्सरोजाचाभवत्शरत्॥अवापुस्तापमत्य
र्थंशफर्यःपल्वलोदके॥पुत्रक्षेत्रादिसक्तेनममत्वेनयथागृही॥मयूरामौनिनस्तस्थुःपरित्यक्तमदावने॥असारतांपरिज्ञा
यसंसारस्येवयोगिनः॥उत्सृज्यजलसर्वस्वंविमलाःसितमूर्त्तयः॥तत्यजुश्चांबरंमेघागृहंविज्ञानिनोयथा॥शरत्सूर्यांशुतप्ता

पंच॰
११

५२

निययुःशोषंपयांसिच॥बह्वालंबीममत्वेनहृदयानीवदेहिनां॥कुमुदैःशरदंभांसियोग्यतालक्षयंययुः॥अवबोधैर्मनांसीवसं
बंधममलात्मनां॥तारकाविमलेव्योम्निरराजाखंडमंडलः॥चंद्रश्चामलदेहात्मायोगीसाधुकुलेयथा॥शनकैःशनकैस्तीरंतत्य
जुश्चजलाशयाः॥ममत्वंक्षेत्रपुत्रादिरूढमुच्चैर्यथाबुधाः॥पूर्वत्यक्तैःसरोंभोभिःहंसायोगंपुनर्ययुः॥क्लेशैःकुयोगिनोशेषैरं
तरायहताइव॥निभृतोभवदत्यर्थंसमुद्रःस्तिमितोदकः॥क्रमादाप्तमहायोगोनिश्चलात्मायथायतिः॥सर्वत्रातिप्रसन्नानिसलिला
नितथाभवन्॥ज्ञातेसर्वगतेविष्णौमनांसीवसुमेधसां॥बभूवनिर्मलंव्योमशरदाध्वस्ततोयदं॥योगाग्निदग्धक्लेशौघंयोगिनामिव
मानसं॥सूर्यांशुजनितंतापंनिन्येतारापतिःशमं॥अहंमानोद्भवंदुःखंविवेकःसुमहानिव॥नभसोभ्रंभुवःपंकंकालुष्यंचांभसःश
रत॥इंद्रियाणींद्रियार्थेभ्यःप्रत्याहारइवाहरत्॥प्राणायामइवांभोभिःसरसांकृतपूरकैः॥अभ्यस्यतानुदिनंरेचकोकुंभकादिभिः॥
विमलांबरनक्षत्रेकालेचाभ्यागतेव्रजे॥ददर्शेंद्रमहारंभायोद्यतांस्तान्व्रजौकसः॥कृष्णस्तानुत्सुकान्दृष्ट्वागोपानुत्सवमानसान्॥कौ
तूहलादिदंवाक्यंप्राहवृद्धान्महामतिः॥कोयंशक्रमहोनामयेनवोहर्षमागताः॥प्राहतंनंदगोपश्चपृच्छंतमतिसादरं॥मेघानांपयसां
वेशोदेवराजःशतक्रतुः॥तेनसंचोदितामेघावर्षंत्यंबुमयंरसं॥तद्वृष्टिजनितंसस्यंवयमन्येचदेहिनः॥वर्त्तयामोपयुंजानाःत
र्पयामश्चदेवताः॥क्षीरवत्यइवागावोवत्सवत्यश्चनिर्वृताः॥तेनसंवर्द्धितैःशिष्पैःस्तुष्टाःपुष्टाभवंतिच॥नासस्यानातृणाभूमिर्न
चदुर्भिक्षितोजनः॥दृश्यंतेयत्रदृश्यंतेवृष्टिमंतोबलाहकाः॥भौममेतत्पयोदुग्धंगोभिःसूर्यस्यवारिदः॥पर्जन्यःसर्वलोकस्य

भवायप्सुविवर्षति॥तस्मात्प्रावृषिराजानःसर्वेशक्रंमुदान्विताः॥महैःसुरेशमर्च्चंतिवयमन्येचमानवाः॥पराशरउवाच॥नंदगोपस्यवचनंश्रुत्वेत्थंशक्रपूजने॥कोपायत्रिदशेंद्रस्यप्राहदामोदरस्तदा॥नवयंकृषिकर्त्तारोवणिज्याजीविनोनच॥गावोस्मद्दैवतंतातवयंवनचरायतः॥अन्विक्षिकीत्रयीवार्त्तादंडनीतिस्तथापरा॥विद्याचतुष्टयंचैतद्वार्त्तामनुश्रणुष्वमे॥कृषिर्वणिज्यातद्वच्चतृतीयंपशुपालने॥विद्याह्येकामहाभागवार्त्तावृत्तित्रयाश्रया॥कर्षुकाणांत्वियंवृत्तिःपण्यंविपणिजीविनां॥अस्माकंगाःपरावृत्तिर्वार्त्ताभेदैरियंत्रिभिः॥विद्ययायोययायुक्तःतस्यसादैवतंपरं॥तंस्यंसांसैवपूज्यार्चनीयाचसैवतस्योपकारयोन्यस्याःफलमश्नन्वैपूजयत्यपरांनरः॥इहचप्रेत्यचैवासौतातनाप्नोतिशोभनं॥कृष्यंताप्रथितासीमासीमांतंचपुनर्वनं॥वनांतागिरयःसर्वेतेचास्माकंपरागतिः॥नद्वारबंधावरणानगृहक्षेत्रिणस्तथा॥सुखिनस्त्वखिलेलोकेयथावैचक्रचारिणः॥श्रूयंतेगिरयश्चामीवनेस्मिन्कामरूपिणः॥तत्तद्रूपंसमास्थायरमंतेस्वेषुसानुषु॥यदाचैतेऽपराध्यंतेयेषांयेकाननौकसः॥तदासेहादिरूपैस्तान्घातयंतिमहीधराः॥गिरियज्ञस्त्वयंतस्मात्गोयज्ञश्चप्रवर्त्यतां॥किमस्माकंमहेंद्रेणगावःशैलाश्चदेवताः॥मंत्रयज्ञपराविप्राःसीतायज्ञाश्चकर्षुकाः॥गिरिगोयज्ञशीलाश्चवयमद्रिवनाश्रयाः॥तस्माद्गोवर्द्धनःशैलोभवद्भिर्विविधैर्धनैः॥अर्च्यतांपूज्यतांमेध्यान्पशून्हत्वाविधानतः॥सर्वघोषस्यसंदोहोगृह्यतांमाविचार्यतां॥भोज्यंतांतेनवैविप्राःस्तथायेचाभिवांछकाः॥तमर्चितंकृतेहोमेभोजितेषुद्विजातिषु॥शरत्पुष्पकृतापीडाःपरिगच्छंतुगोगणाः॥एतन्मममतंगोपाःसंप्रीत्याक्रियतेयदि॥ततःकृताभवेत्प्रीति

गवामद्रेस्तथामम॥पराशरउवाच॥इतितस्यवचःश्रुत्वानंदाद्याश्चव्रजौकसः॥प्रीत्युत्फुल्लमुखागोपाःसाधुसाध्वित्यथाब्रुवन्॥शोभनंतेमतंवत्सयदेतद्भवतोदितं॥तत्करिष्यामहेसर्वंगिरियज्ञःप्रवर्त्ततां॥तथाचकृतवंतस्तेगिरियज्ञंव्रजौकसः॥दधिपायसमांसाद्यैर्ददुःशैलबलिंततः॥द्विजांश्चभोजयामासुःशतशोथसहस्रशः॥अन्यानप्यागतानित्यंकृष्णेनोक्तेयथापुरा॥गावःशैलंतथाचक्रुरर्चितास्ताःप्रदक्षिणं॥वृषभाश्चापिनर्दंतःसतोयाजलदाइव॥गिरिमूर्द्धनिविष्णोपिशैलोहमितिमूर्तिमान्॥बुभुजेन्नंबहुविधंगोपवर्याहृतंद्विज॥अन्येनकृष्णोरूपेणगोपैःसहगिरेःशिरः॥अधिरुह्यार्चयामासद्वितीयामात्मनस्तनुं॥अंतर्द्धानंगतेतस्मिन्गोपालब्धातनोवरान्॥कृत्वागिरिमखंगोष्ठंनिजभ्यासेययुःपुनः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेदशमोध्यायः॥१०॥श्रीपराशरउवाच॥मखेप्रतिहतेशक्रोमैत्रेयातिरुषान्वितः॥संवर्त्तकंनामगणंतोयदानामथाब्रवीत्॥भोभोमेघानिशम्यैतद्वदतोवचनंमम॥अत्रानंतरमेवाशुक्रियतामविचारितं॥नंदगोपःसुदुर्बुद्धिर्गोपैरन्यैःसहायवान्॥कृष्णाश्रयबलाधातोमखभंगमचीकरत्॥आजीवोयःपरस्तेषांगोपत्वस्यचकारणं॥तागावोवृष्टिपातेनपीड्यंतांवदनान्मम॥अहमप्यद्रिशृंगाभंतुंगमारुह्यवारणं॥साहाय्यंवःकरिष्यामिवायंबुत्सर्गयोजितं॥पराशरउवाच॥इत्याज्ञप्ताःमहेंद्रेणमुमुचुस्तेबलाहकाः॥वातहर्षमहाभीममभावायगवांद्विज॥ततःक्षणेनधरणीककुभोंबरमेवच॥एकंधाराप्रपूरेणसर्वंवैवाभवन्मुने॥विद्युल्लताकशाघातात्त्रस्तैरिवघनैर्घनं॥नादापूरितदिक्चक्रैर्धारापूरमपात्यत॥अंधकारीकृतेलोकेवर्षद्भिरनिशंघनैः॥अधश्चो

ईंचनिर्यग्वजगदाधारवाभवत्॥गावश्वतोयपातेनवर्षवातेनवेगिना॥धुताप्राणानूजहुःकाचिन्नतश्रृंगशिरोधराः॥क्रोडेन
वत्सानाक्रम्यतस्थुरन्यामहामुने॥तथागावोविवत्साश्ववारयामासचापराः॥वत्साश्चदीनवदनाःपवनाकंपिकंधराः॥त्राहित्राही
तिवात्राब्दाःकृष्णमूचुरिवार्त्तकाः॥ततश्चगोकुलंसर्वगोपगोपीसमाकुलं॥अतीवार्त्तंहरिर्दृष्ट्वाचमैत्रेयाचिंतयत्तदा॥एतत्कृतंम
हेंद्रेणमखभंगविरोधिना॥तदेतदखिलंगोष्ठंत्रातव्यमधुनामया॥इममद्रिमहंधैर्यादुत्पाट्योरुशिलाघनं॥धारयिष्यामिगो
ष्टस्यपृथुछत्रमिवोपरि॥पराशरउवाच॥इतिकृत्वामतिंकृष्णोगोवर्द्धनमहीधरं॥उत्पाट्यैककरेणैवधारयामासलीलया॥गोपा
श्चाहजगन्नाथःसमुत्पाटितभूधरः॥विशध्वमत्रसहिताःकृतंवर्षनिवारणं॥सुनिर्वातेषुदेशेषुयथायोग्यमिहास्यतां॥प्रविश्य
तांनभेतव्यंगिरिपातननिर्भयैः॥इत्युक्तास्तेनतेगोपाविविशुर्गोधनैःसह॥शकटारोपितैर्भांडैर्गोप्यश्चासारपीडिताः॥कृष्णोपि
दंतधारैवंलेशैमत्यंतनिश्चलं॥व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षतः॥गोपगोपीजनैर्हृष्टैःप्रीतिविस्तारितेक्षणैः॥संस्तूय
मानचरितःकृष्णःशैलमधारयत्॥सप्तरात्रंमहामेघावर्वर्षुर्नंदगोकुले॥इंद्रेणनोदितामेघागोपानांनाशकारणात्॥ततोधृ
तेमहाशैलेपरित्रातेचगोकुले॥मिथ्याप्रतिज्ञोबलभिद्वारयामासतान्घनान्॥व्यभ्रेनभसिविप्रेंद्रवितथात्मानवस्यथ॥
निःसृतंगोकुलंहृष्टंस्वस्थानंपुनरागमत्॥मुमोचकृष्णोपितदागोवर्द्धनमहाचलं॥स्वस्थानेतमुखेहृष्टस्तैस्तुव्रजौकसैः॥
इतिश्रीविष्णुपुराणेपंचमेंशेएकादशोध्यायः॥ ॥पराशरउवाच॥धृतेगोवर्द्धनेशैलेपरित्रातेचगोकुले॥रोचयामासकृष्ण

स्यदर्शनंपाकशासनः॥सोधिरुह्यमहानागमैरावतममित्रजित्॥गोवर्द्धनगिरौकृष्णंददर्शत्रिदशेश्वरः॥चारयंतंमहावीर्यंगा
श्चगोपवपुर्धरं॥कृत्स्नस्यजगतोगोपंवृतंगोपकुमारकैः॥गरुडंचददर्शोच्चैरंतर्द्धानगतंद्विज॥कृतच्छायंहरेर्मूर्द्धिपक्षाभ्यांप
क्षिपुंगवं॥अवरुह्यसनाच्चैवदेकांतेमधुसूदनं॥कृष्णःसस्मितमाहेदंप्रीतिविस्फारितेक्षणः॥कृष्णकृष्णशृणुष्वेदंयदर्थम
हमागतः॥त्वत्समीपंमहाभागनैतच्चिंत्यंत्वयान्यथा॥भारावतरणार्थायपृथिव्याःपृथिवीतलं॥अवतीर्णोखिलाधारत्वमे
वपरमेश्वरः॥मखभंगविरुद्धेन ‾ कुलनाकाः॥समादिष्टामहामेघास्तैश्चतत्कदनंकृतं॥त्रातास्तास्त्वयागावःसमुत्पाट्य
गि महागिरिं॥तेनाहंतोवीरकर्मणात्यद्भुतेनते॥साधितंसाधितंकृष्णदेवानामद्यमन्येप्रयोजनं॥त्वयायमद्रिप्रवरःकरेणैकेनयद्धृ
तः॥गोभिश्चनोदितःकृष्णत्वत्समीपमुपागतः॥त्वयात्राताभिरत्यर्थंयुष्मत्सत्कारकारणात्॥सत्वांकृष्णाभि ‾ ष्यामिगवांवा
क्यप्रनोदितः॥उपेंद्रत्वेगवामिंद्रोगोविंदस्त्वंभविष्यति॥पराशरउवाच॥अथोपवाह्यादादायघंटामैरावताद्गजात्॥अ
भिषेकेतयाचक्रेपवित्रजलपूर्णया॥क्रियमाणाभिषेकेचगावःकृष्णस्यतत्क्षणात्॥प्रस्रवोद्भूतदुग्धार्द्रांसद्यश्चक्रुर्वसुं
धरां॥अभिषिच्यगवांवाक्यात्देवेंद्रोवैजनार्दनं॥प्रीत्यासप्रश्रयंकृष्णंपुनराहशचीपतिः॥गवामेतत्कृतंवाक्यंतथान्यदपिमे
शृणु॥यद्ब्रवीमिमहाभागभारावतरणेछया॥ममांशःपुरुषव्याघ्रपृथिव्यांपृथिवीधर॥अवतीर्णोर्जुनोनामसरक्ष्योभवता
सदा॥भारावतरणेसख्यंसतेवीरःकरिष्यति॥सरक्षणीयोभवतायथात्मामधुसूदन॥श्रीभगवानुवाच॥जानामिभारते

वि॰पु॰
१४

वंशेजातंपार्थंतवांशतः॥तमहंपालयिष्यामियावत्स्थास्यामिभूतले॥यावन्महीतलेशक्रस्थास्याम्यहमरिंदम॥नतावदर्जुनं
कश्चिद्देवेंद्रयुधिपेष्यति॥कंसोनाममहाबाहुर्दैत्योरिष्टस्तथापरः॥केशीकुवलयापीडोनरकाद्यास्तथापरे॥हतेष्वेतेषुदेवेंद्र
भविष्यतिमहाहवः॥तत्रविद्धिसहस्राक्षभारावतरणंकृतं॥सत्वंगच्छनसंतापंपुत्रार्थेकर्तुमर्हसि॥नार्जुनस्यरिपुःकश्चिन्मम
ग्रेप्रभविष्यति॥अर्जुनार्थेत्वहंसर्वान्युधिष्ठिरपुरोगमान्॥निवृत्तेभारतेयुद्धेकुंत्यैदास्याम्यविक्षितान्॥पराशरउवाच॥
इत्युक्तेतंपरिष्वज्यदेवराजोजनार्दने॥आरुह्यैरावतंनागंपुनरेवदिवंययौ॥कृष्णोपिसहितोगोभिर्गोपालैश्चपुनर्व्रजं॥आ
जगामाथगोपीनांदृष्टिपूतेनवर्त्मना॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेद्वादशोध्यायः॥ ॥छ॥ ॥पराशरउवाच॥गतेशक्रे
चगोपालाःकृष्णमक्लिष्टकारणं॥ऊचुःप्रीत्याधृतंदृष्ट्वागोवर्द्धनमहाचलं॥वयमस्मान्महाभागभवतामहतोभयात्॥गाव
श्चभवतात्रातागिरिधारणकर्मणा॥बालक्रीडेयमतुलागोपालत्वंजुगुप्सितं॥दिव्यंचकर्मभवतःकिमेतत्तातकथ्यतां॥कालि
योदमितस्तोयेप्रलंबोविनिपातितः॥धृतोगोवर्द्धनश्चायंशंकितानिमनांसितः॥सत्यंसत्यंहरेपादौस्पृशामोमितविक्रमः॥य
थात्वद्वीर्यमालोक्यनत्वांमन्यामहेनरं॥प्रीतिःसस्त्रीकुमारस्यव्रजस्यत्वयिकेशव॥कर्मचेदमशक्यंयत्समस्तैस्त्रिदशैर
पि॥बालत्वंचातिवीर्यंचजन्मचास्मास्वशोभनं॥चिंत्यमानममेयात्मन्शंकांकृष्णप्रयच्छति॥देवोवादानवोवात्वंयक्षो
गंधर्वएवच॥किंचास्माकंविचारेणबांधवोसिनमोस्तुते॥क्षणंभूत्वासौकृष्णःकिंचित्प्रणयकोपवान्॥इत्येवमुक्तस्तैर्गो

पंच॰
१४

पैःकृष्णोप्याहमुनिर्वचः॥मत्संबंधेयतेगोपायदिलज्जानजायते॥श्लाघ्योवाहंततःकिंवोविचारेणप्रयोजनं॥यदिवोस्तिमयिप्री
तिनानश्चिंसेहंभवतांयदि॥तदात्मबंधुसदृशीबुद्धिर्वैक्रियतांमंति॥नाहंदेवोनगंधर्वोनयक्षोनचदानवः॥अहंवोबांधवो
जातोमवश्चित्तमतोन्यथ॥इतिश्रुत्वाहरेर्वाक्यंबंधमौनास्ततोवनं॥ययुर्गोपामहाभागास्तस्मिन्प्रणयकोपिनि॥कृष्णस्तु
विमलंव्योपशारश्चंद्रस्यचंद्रिकां॥तथाकुमुदफुल्लामामोदितदिगंतरं॥वनराजींतथाकूजद्भृंगमालामनोरमं॥विलोक्यसह
गोपीभिर्मनश्चकेरतिंप्रति॥सहरामेणमधुरंअतीववनिताप्रियं॥जगौकलपदंशौरिर्नानातंत्रीकृतस्वनं॥रम्यंगीतध्वनिंश्रु
त्वासंत्यज्यावसथांस्तथा॥आजग्मुस्त्वरितागोप्ययत्रास्तेमधुसूदनः॥शनैःशनैर्जगौगोपीकाचित्तस्यलयानुगं॥दत्तावधाना
कृष्णेति काचित्तुतमेवमनसस्मरन्॥काचित्कृष्णेतिप्रोक्त्वालज्जामुपाययौ॥ययौकाचिच्चप्रेमांधातत्पार्श्वमविलज्जिता॥काचिदाव
सथस्यांतःस्थितादृष्ट्वाबहिर्गुरुं॥तन्मयत्वेनगोविंदंदध्यौमीलितलोचना॥तच्चित्ताविपुलाल्हादक्षीणपुण्यचयातथा॥
तदप्राप्तिमहादुःखविलीनाशेषपातका॥गोपीपरिवृतोरात्रिंचिंतयंतीजगत्सत्यंपरंब्रह्मस्वरूपिणं॥निरुच्छ्वासतयामुक्तिं
गतान्यागोपकन्यका॥गोपीपरिवृतोरात्रिंशरश्चंद्रमंमानयामासगोविंदोरासारंभरसोत्सुकः॥गोप्यश्चवृंदशःकृष्णचे
ष्टाविष्टमूर्तयं॥अन्यदेशंगतेकृष्णेचेरुर्वृंदावनांतरं॥कृष्णेहमेषललितंव्रजाम्यालक्ष्यतांगतिः॥अन्याब्रवीत्कृष्णस्यम
मगीतिर्निशाम्यतां॥दुष्टकालियतिष्ठात्रकृष्णोहमितिचापरा॥बाहुमास्फोट्यकृष्णस्यलीलासर्वस्वमाददे॥अन्याब्र

वि०पु०
१५

वीति गोपीभिः त्रांके स्थीयतामिति॥ अलं वृष्टिभयेनात्र धृतो गोवर्द्धनो मया॥ धेनुकोयं मया क्षिप्तो विचरंतु यथेच्छया॥ गावो
ब्रवीत्तथैवान्या कृष्णलीलानुकारिणी॥ एवं नानाप्रकारास्तु कृष्णचेष्टासु तास्तदा॥ गोप्यो व्यग्राः समं चेरुः रम्यं वृंदावनं वनं॥ प्र
यत्नानां ततस्तासां कृष्णमार्गानुसारणे॥ प्रावर्त्तत समुल्लापाः कृष्णस्यान्वेषणं प्रति॥ विलोक्यैका भुवं प्राह गोपी गोपवरांगनाः॥
पुलकांचितसर्वांगी विकासिनयनोत्पला॥ सख्यः पश्यत यातोयं केत्रावोनेन वर्त्मना॥ पदपंक्तिरियं तस्य चक्रस्वस्तिकभूषिता॥
ध्वजवज्रांकुशाब्जांकरेखावंत्यालि पश्य च॥ पदान्येतानि कृष्णस्य लीलालंकृतगामिनः॥ पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवं॥
नणाग्रांक्रांतमात्राणि पदान्यत्र महात्मनः॥ अत्रोपविश्य सा तेन काचित्पुष्पैरलंकृता॥ अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितो यया॥
पुष्पजेंधनसन्मानकृतमानामपास्य तां॥ नंदगोपसुतो यातो मार्गेणानेन पश्यत॥ अनुयातैयमन्याका नितंबभरमंथरा॥ या
गंतव्ये द्रुतं याति निम्नपादाग्रसंहतिः॥ हस्तन्यस्ताग्रहस्तेयं तेन याति सखी तथा॥ अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः॥ ह
स्तसंस्पर्शमात्रेण धूर्त्तेनैषा मितेतिकं॥ तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः॥ प्रविष्टो गहने कृष्णः पदमत्र न लक्ष्यते॥ नि
वर्त्तध्वं शशांकोकस्य न तद्दीधितिगोचरे॥ निवृत्तास्तास्तदा गोप्यो निराशाः कृष्णदर्शने॥ यमुनातीरमागत्य जगुस्तच्चरितं त
दा॥ ततो ददृशुरायांतं विकासिमुखपंकजं॥ गोपास्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टचेष्टितं॥ काचिदालोक्य गोविंदमायांतमतिह
र्षिता॥ कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदीरयत्॥ काचिद्भ्रूभंगुरं कृत्वा ललाटफलकं हरिं॥ विलोक्य नेत्रभृंगाभ्यां पपौ

पंच०
१५

तन्मुखपंकजं॥ काचितालोक्य गोविंदं निमीलितविलोचना॥ तस्यैव रूपं ध्यायंती योगारूढेव सा बभौ॥ ततः काचित्प्रियालापैः
काचिद्भ्रूभंगवीक्षितैः॥ निन्येनुनयमन्याश्च करस्पर्शेन माधवः॥ ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरं॥ रराम रासगोष्ठीभि
रुदारचरितो हरिः॥ रासमंडलबंधोपि कृष्णपार्श्वमनुज्झता॥ गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना॥ हस्ते प्रगृह्य चैकैकां
गोपिकां रासमंडली॥ चकार तत्करस्पर्शनिमीलितदृशं हरिः॥ ततः प्रववृते रासश्चलद्वलयनिस्वनैः॥ अनुयातशरत्कान्यागो
पगीतिरनुक्रमात्॥ कृष्णः शरच्चंद्रमसं कौमुदीकुसुमाकरं॥ जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः॥ परिवर्त्तश्रमेणैका चल
द्वलयशालिनी॥ ददौ बाहुलतां स्कंधे गोपी मधुनिघातिनः॥ काचित्प्रविलसद्बाहुं परिरभ्य चुचुंब तं॥ गोपी गीतस्तुतिव्याजनि
पुणा मधुसूदनं॥ गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ॥ पुलकोद्गमसमासाद्य स्वेदांबुघनतां गतौ॥ रासगेयं जगौ कृष्णो याव
त्तारतरध्वनिः॥ साधु कृष्णेति कृष्णेति तावत्ता द्विगुणं जगुः॥ गतेनुगमनं चक्रुः वलनेभिमुखं ययुः॥ प्रातिलोम्यानुलोमेन
भेजुर्गोपांगना हरिं॥ स तथा सह गोपीभिः रराम मधुसूदनः॥ यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभवत्॥ ता वार्यमाणाः पतिभिः पितृ
भिर्भ्रातृभिस्तथा॥ कृष्णं गोपांगना रात्रौ रमयंति रतिप्रियाः॥ सोपि कैशोरकवयो मानयन्मधुसूदनः॥ रेमे ताभिरमेयात्मा क्षपा
सु क्षपिताहितः॥ तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः॥ आत्मस्वरूपरूपोसौ व्यापी वायुरिव स्थितः॥ यथा समस्तभूतेषु न
भोऽग्निः पृथिवी जलं॥ वायुश्चात्मा तथैवासौ व्याप्य वायुरिव स्थितः॥ ॥इति श्रीविष्णुपुराणे पंचमेंशे त्रयोदशोध्यायः॥ ॥छ॥

वि०पु० पराशरोवाच॥प्रदोषार्धेकदाचित्तुरासासक्तेजनार्दने॥त्रासयन्समदोगोष्ठमरिष्टःसमुपागतः॥सतोयतोयदच्छायलीक्ष्ण
१६ शृंगोर्कलोचनः॥खुराग्रपातैरत्यर्थंदारयन्पृथिवीतलं॥लेलिहानःसनिशेषंजिह्वयोष्ठौपुनःपुनः॥संरंभाविद्धलांगूलःक
ठिनस्कंधमबंधनः॥उदग्रकुकुदाभोप्रमाणदुरतिक्रमः॥विपमूत्रालिप्तपृष्टांगोगवामुद्वेगकारकः॥प्रलंबकंठोतिमुखस्तरु
घातोकिताननः॥पातयन्सगवांगर्भान्दैसोवृषभरूपधृक्॥सूदयंस्तापसानुग्रोवनान्यटनियःसदा॥ततस्तमतिघोराक्ष
मवेक्ष्यातिभयातुराः॥गोपागोपस्त्रियाश्चैवकृष्णकृष्णेतिचुक्रुशुः॥सिंहनादंततश्चक्रेतलशब्दंचकेशवः॥तच्छब्दश्रवणाच्चा
सौदामोदरमुखंययौ॥अग्रन्यस्तविखाणाग्रःकृष्णकुक्षिकृतेक्षणः॥अभ्यधावतदुष्टात्माकृष्णंवृषभदानवः॥आयांतंदै
त्यवृषभंकृष्णोदृष्ट्वामहाबलं॥नचचालतदास्थानादवज्ञास्मितलीलया॥आसन्नंचैवजग्राहश्टगाभ्यांमधुसूदनः॥जघान
जानुनाकुक्षौविखाणग्रहणाकुलं॥तस्यदर्पबलंभंक्त्वागृहीतस्यविषाणयोः॥अपीडयदरिष्टस्यकंठंक्लिन्नमिवांबरं॥उत्पाद्य
श्टंगमेकंचतेनैवाताडयत्ततः॥ममारसमहादैत्योमुखाच्छोणितमुद्वहन्॥तुष्टुवुर्निहतेतस्मिन्दैत्येगोपाजनार्दनः॥जंभेह
तेसहस्राक्षंपुरादेवगणायथा॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेचतुर्दशोध्यायः॥ ॥पराशरोवाच॥ककुद्मिनिहतेरिष्टे
धेनुकेचनिपातिते॥प्रलंबेनिधनंनीतेधृतेगोवर्धनेचले॥दमितेकालियेनागेभग्नेबकमद्रूये॥हतायांपूतनायांचशकटे पं०च०
परिवर्त्तिते॥कंसाहनारदःप्राहयथावृत्तमनुक्रमात्॥यशोदादेवकीगर्भपरिवर्त्ताद्यशेषतः॥ततःश्रुत्वासकलंकंसोनार १६

दादेवकीदर्शनात्॥वसुदेवंप्रतितदाकोपचक्रेसुदुर्मतिः॥सतुकोपादुपालभ्यसर्वयादवसंसदि॥जगर्हियादवांश्चैवकार्यंचैत
दचिंतयत्॥यावन्नबलमारूढौरामकृष्णौसबालकौ॥तावदेवमयावध्यासवध्यौरूढयौवनौ॥चाणूरोनुमहार्योमुष्टिकश्चम
हाबलः॥एताभ्यांमलयुद्धेतैघातयिष्यामिदुर्मदौ॥धनुर्मषखमहायज्ञव्यजेनानीयतौव्रजान्॥तथातथायतिष्यामियास्येते
संक्षयंयथा॥पराशरोवाच॥श्वफल्कातनयंसोहंअक्रूरंयदुपुंगवं॥तयोरानयनार्थायप्रेषयिष्यामिगोकुलं॥वृंदावनचरं कु
घोरमादेक्ष्यामिचकेशिनं॥तत्रैवासावतिबलस्तावुभौघातयिष्यति॥गजकुवलयापीडोत्सकाशमिहागतौ॥घातयिष्यतिवागोपौ
वसुदेवसुतावुभौ॥पराशरोवाच॥इत्यालोच्यसदुष्टात्माकंसोनामजनार्दनौ॥हंतुकृतमतिर्वीरमक्रूरंवाक्यमब्रवीत्॥भोभो
दानपतेवाक्यंक्रियतांप्रीतयेमम॥इतःस्यंदनमारुह्यगम्यतांनंदगोकुलं॥वसुदेवसुतौयत्रविष्णोरंशासमुद्भवौ॥नाशाय
किलसंभूतौममदुष्टौप्रवर्धतः॥धनुर्महोममापात्रचतुर्दश्यांभविष्यति॥आययोभवतागत्वामल्लयुद्धायतावुभौ॥चाणूरमु
ष्टिकौमल्लौनियुद्धकुशलौमम॥ताभ्यांसहानयोर्युद्धंसर्वलोकस्यपश्यतः॥नागःकुवलयापीडोमहामात्रप्रनोदितः॥सवाहनि
नंदगोपंच ष्यतेपापौवसुदेवात्मजौशिशू॥तौहत्वावसुदेवंचंदुर्मदं॥हनिष्येपितरंचैवउग्रसेनंचदुर्मतिं॥ततःसमस्तगोपानांगोधनान्य
खिलान्यहं॥वित्तंचापहरेष्यामिदुष्टानांमद्वधेषिणां॥त्वामृतेयादवश्चैतेदुष्टदानपतेमम॥एतेषांतुवधायाहंयतिष्ये
नुक्रमात्ततः॥ततोनिःकंटकंसर्वराज्यमेतदयादवं॥प्रशाशिष्येत्वयातस्मात्मत्प्रीत्यावीरगम्यतां॥यथाचमाहिषंसर्पि

दधिचाप्युपगृह्यवै॥ गोपाः समानयंत्वाशु त्वयावाच्यास्तथातथा॥ पराशरोवाच॥ इत्युक्तस्तदाक्रूरो महाभगवतो द्विज॥
प्रीतिमानभवत्कृष्णं श्वो द्रक्ष्यामीति सत्वरः॥ तथेत्युक्त्वा तु राजानं रथमारुह्य शोभनं॥ निश्चक्राम तदा पुर्या मथुराया मधुप्रियः॥
इति श्री विष्णुपुराणे पंचमेंशे पंचदशोध्यायः॥ ॥ पराशरोवाच॥ केशी चापि बलोदग्रः कंसदूतप्रणोदितः॥ कृष्णस्य निधनाकां
क्षी वृंदावनमुपागतः॥ स खुरक्षतभूपृष्ठः सटाक्षेपधुतमुदः॥ द्रुतविक्रांतचंद्रार्कमार्गो गोपानुपाद्रवत्॥ तस्य हेषितशब्देन गो
पाला दैत्यवाजिनः॥ गोप्यश्च भयसंविग्ना गोविंदं शरणं ययुः॥ त्राहि त्राहीति गोविंदः श्रुत्वा तेषां तदा वचः॥ सतोयजलदध्वाने
गंभीरस्वरमुक्तवान्॥ अलं त्रासेन गोपालाः केशिनः किं भयातुरैः॥ भवद्भिर्गोपजातीवैर्वीरवीर्यं विलोप्यते॥ किमनेनाल्पसा
रेण हेषिताटोपकारिणा॥ दैतेयबलवाह्येन वल्गता दुष्टवाजिना॥ एह्येहि दुष्ट कृष्णोयं हं कृष्णस्त्विव पिनाकधृक्॥ पातयिष्या
मि दशनान्वदनादखिलांस्तव॥ ध्य गोविंदः केशिनः संमुखं ययौ॥ विवृतास्यश्च सोप्येनं दैतेयस्तमुपाद्रवत्॥ बाहुमाभो
गि— कृत्वा मुखे तस्य जनार्दनः॥ प्रवेशयामास तदा केशिनो दुष्टवाजिनः॥ केशिनो वदने तेन विशता कृष्णबाहुना॥
शातिता —नाः पेतुः सिताभ्रावयवा यथा॥ कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज॥ विनाशाय व्याधिरसंभूतेरूपेक्षितः
विपाटितोष्ठो बहुलं सफेनं रुधिरं वमन्॥ सोक्षिणी विवृते चक्रे विकृते मुक्तबंधने॥ जघान धरणीं पादैः शकृन्मूत्रं समुत्सृ
जन्॥ स्वेदार्द्रगात्रः श्रांतश्च निरुद्धासोभवत्ततः॥ व्यादितास्यो महारौद्रः सोसुरः कृष्णबाहुना॥ निपपात द्विधाभूतेवयथा

श्री

द्रुमः॥ द्विपादपृष्ठपुच्छार्द्धश्रवणैकाक्षिनासिके॥ केशिनस्ते द्विधाभूते शकले द्वे विरेजतुः॥ हत्वा तु केशिनं कृष्णो गोपालैर्मुदितैर्वृतः॥
अनायस्ततनुः स्वस्थो हसंस्तत्रैव तिष्ठवान्॥ ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः॥ तुष्टुवुः पुंडरीकाक्षं अनुरागमनोरमं॥
अथाहितर्हितो विप्रो नारदो जलदस्थितः॥ केशिनं निहतं दृष्ट्वा हरिं निर्भरमानसः॥ साधु साधु जगन्नाथ लीलयैव पदच्युत
निहतोयं त्वया केशी क्लेशितास्त्रिदिवौकसां॥ युद्धोत्सुकोहमत्यर्थं नरवाजिमहाहवं॥ अपूर्वं दृष्टमन्यत्र द्रष्टुं स्वर्गादुपागतं॥ तुर
गस्यास्य शक्रोपि कृष्णदेवाश्च बिभ्यति॥ धु सरज्ञाल षतोभ्रावलोकिनः॥ यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दनः॥ त
स्मात्केशवनाम्ना त्वं लोके ख्यातिं गमिष्यसि॥ स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेधुना पुनः॥ परश्वोहं समेष्यामि त्वया केशिनिषूदन॥
उग्रसेनसुते कंसे सानुगे विनिपातिते॥ भारावतरकर्त्ता त्वं पृथिव्याः पृथिवीधर॥ तत्रानेकप्रकाराणि युद्धानि पृथिवीक्षितां॥ द्र
ष्टव्यानि मया युष्मत्प्रणीतानि जनार्दन॥ सोहं यास्यामि गोविंद देवकार्यं महत्कृतं॥ त्वया सभाजितश्चापि स्वस्ति तेस्तु व्रजाम्यहं॥ प
राशरोवाच॥ नारदे तु गते कृष्णः सह गोपैरविस्मितः॥ विवेश गोकुलं गोपीनेत्रपानैकभाजनं॥ ॥ इति श्री विष्णुपुराणे पंचमेंशे
षोडशोध्यायः॥ पराशर उवाच॥ अक्रूरोपि विनिक्रम्य स्यंदनेनाशुगामिना॥ कृष्णसंदर्शनाकांक्षी प्रययौ नंदगोकुलं॥ चिं
तयामास चाक्रूरो नास्ति धन्यतरो मया॥ सोहमंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः॥ अद्य मे सफलं जन्म सुप्रभाता च मे निशा॥
य न्निद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखं॥ पापं हरति यत्पुंसां स्मृतं संकल्पनामयं॥ तत्पुंडरीकनयनं विष्णोर्द्रक्ष्याम्यहं
मुखं॥ निर्जग्मुश्च यतो वेदा वेदांगान्यखिलान्यपि॥ द्रक्ष्यामि तत्परं धाम धाम्नां भगवतो मुखं॥ यज्ञेषु यज्ञपुरुषः पुरुषैः पु

रूषोत्तमः॥ईज्यते यो खिलाधारस्तं द्रक्ष्यामि जगत्पते॥ दृष्ट्वा यमिंद्रो यज्ञानां शतेनामरराजतां॥ अवाप तमनंतादिमहं द्रक्ष्यामि
केशवं॥ न ब्रह्मा नेंद्ररुद्राश्विवस्वादित्यमरुद्गणाः॥ यस्य रूपं विजानंति स्प्रक्षत्यय समं हरिः॥ सर्वात्मा सर्ववित्सर्वः सर्वरूपेष्ववस्थि
तः॥ यो विश्वात्माव्ययो व्यापी स वक्ष्यति मया सह॥ मत्स्यकूर्मवराहाद्यैः सिंहरूपादिभिः स्थितिं॥ चकार जगतो यो यं सोद्य मामा
लपिष्यति॥ सांप्रतं च जगत्स्वामी कार्यमात्महृदि स्थितं॥ कर्तुं मनुष्यतां प्राप्तः स्वेच्छादेहधृगव्ययः॥ योनंतः पृथिवीं धत्ते शेषपर
स्थितिसंस्थितं॥ सोवतीर्णो जगत्यर्थे मामक्रूरेति वक्ष्यति॥ पितृपुत्रसुहृद्भ्रातृबंधुमयीं मां॥ यन्मायानलमुत्तर्तुं जगत्तस्मै न
मो नमः॥ यज्वभिर्यत्नपुरुषो वासुदेवश्च सात्वतैः॥ वेदांतवादिभिर्विष्णुः प्रोच्यते यो नतोस्मि तं॥ यथा तत्र जगद्धाम्नि धातर्येतत्
तिष्ठितं॥ सदसत्तेन सत्येन मय्यसौ यातु सौम्यतां॥ स्मृते सकलकल्याणभाजनं यत्र जायते॥ पुरुषस्तमजं नित्यं व्रजामि शरणं
हरिं॥ पराशर उवाच॥ इत्थं संचिंतयन्विष्णुं भक्तिनम्रात्ममानसः॥ अक्रूरो गोकुलं प्राप्तः किंचित्सूर्ये विराजति॥ स ददर्श त
दा कृष्णं तत्र गोदोहने गवां॥ वत्समध्ये गतं फुल्लनीलोत्पलदलच्छविं॥ उत्फुल्लपद्मपत्राक्षं श्रीवत्सांकितवक्षसं॥ प्रलंब
बाहुमासीनं तुगोरस्थलमुन्नतं॥ सविलासस्मिताधारं सत्राणं मुखपंकजं॥ तुंगरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितं॥ बि
भ्राणं वाससी पीते वन्यपुष्पविभूषितं॥ साईनीललताहस्तं सितांभोजावतंसकं॥ हंसेंदुकुंदधवलं नीलांबरधरं द्विज॥ त
सुस्यानुबलभद्रं च ददर्श यदुनंदनं॥ प्रांशुमुत्तुंगबाह्वंसं विकाशिमुखपंकजं॥ मेघमालापरिवृतं कैलासाद्रिमिवा
परं॥ तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः॥ पुलकांचितसर्वांगस्तदाक्रूरोभवन्मुने॥ एतत्परमं धाम तदेतत्परमं पदं॥

भगवद्वासुदेवांशो द्विधा यो यमवस्थितः॥ साफल्यमक्ष्णोर्युगमेतदत्र दृष्टे जगद्धातरि यातमुच्चैः॥ अप्यंगमेतद्भगवत्प्रसादाद
स्यांगसंगे फलवन्मम स्यात्॥ अप्येष पृष्ठे मम हस्तपद्मं करिष्यति श्रीमदनंतमूर्तिः॥ यस्यांगुलिस्पर्शहताखिलाघैरवाप्यते
सिद्धिरपास्तदोषा॥ येनाग्निविद्युद्रविरश्मिमालाकरालमत्युग्रमपास्य चक्रं॥ चक्रं घ्नता दैत्यपतेर्हृतानि दैत्यांगनानां नयनां
जनानि॥ यत्रांबु विन्यस्य बलिर्मनोज्ञानवाप भोगान्वसुधातलस्थः॥ तथामरत्वं त्रिदशाधिपत्यं मन्वंतरं पूर्णमपेतशत्रुः॥ अ
प्येष मां कंसपरिग्रहेण दोषास्पदीभूतमदोषदुष्टं॥ कर्तावमानोपहतं धिगस्तु तज्जन्मनः यः सुकृतेबहिर्यत्॥ ज्ञानात्मकस्या
मलसत्वराशेरपेतदोषस्य सदा स्फुटस्य॥ किं वा जगत्यत्र समस्तपुंसामज्ञातमस्यास्ति हृदि स्थितस्य॥ तस्मादहं भक्तिवि
नम्रचेता व्रजामि सर्वेश्वरमीश्वराणां॥ अंशावतारं पुरुषोत्तमस्य अनादिमध्यांतमयस्य विष्णोः॥ ॥इति श्रीविष्णुपुराणे पं
चमेंशे सप्तदशोध्यायः॥ पराशर उवाच॥ चिंतयन्निति गोविंदमुपगम्य स यादवः॥ अक्रूरोस्मीति चरणौ ननाम शिरसा हरेः॥
सोप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना॥ संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे॥ कृतसंवंदनौ तेन यथावद्बलके
शवौ॥ ततः प्रविष्टौ संहृष्टौ तमादायात्ममंदिरं॥ सह ताभ्यां तदाक्रूरः कृतसंवंदनादिकः॥ भुक्तभोज्यो यथान्यायमाचच
क्षे ततस्तयोः॥ यथा निर्भर्त्स्यते तेन कंसेनानकदुंदुभिः॥ यथा च देवकी देवी दानवेन दुरात्मना॥ उग्रसेने यथा कंसो दुरात्मा
चैव वर्त्तते॥ यं चैवार्थं समुद्दिश्य स कंसेन विसर्जितः॥ तत्सर्वं वि श्रुत्वा भगवान्केशिसूदनः॥ उवाचाखिलमेवैतत्ज्ञा

विष्णु० १९

तेदानपतेमया॥करिष्येचमहाभागयद्त्रोपचिकंमतं॥विचिंत्यंनान्यथैतत्तेविधिकंसंहृतंमया॥अहंरामथुरांस्वोयास्यावःसह
त्वया॥गोवृद्धाश्चयास्यंतिआदायोपायनंबहु॥नीतोयंनीयतांवीरनचिंतांकर्त्तुमर्हसि॥त्रिरात्राभ्यंतरेकंसंहनिष्यामिसहानुगं॥
पराशरउवाच॥समादिश्यततोगोपानक्रूरोपिसकेशवः॥सुष्वापबलभद्रश्चनंदगोपगृहेततः॥ततःप्रभातेविमलेकृष्ण
रामौमहामते॥अक्रूरेणसमंगंतुमुद्यतौमथुरांपुरीं॥दृष्ट्वागोपीजनःसर्वःस्रस्तवलयबाहुकः॥निश्वासातिदुःखार्त्तःप्रा
हचेदंपरस्परं॥मथुरांप्राप्यगोविंदःकथंगोकुलमेष्यति॥नगरस्त्रीकलालापंमधुश्रोत्रेणपास्यति॥विलासिवाक्यजातेषुना
गरीणांकृतास्पदं॥चित्तमस्यकथंभूयोग्राम्यगोपीषुयास्यति॥सारंगोष्ठस्यसर्वस्यविधिनाहरताहरिं॥प्रहृतंगोपयोषि
त्सुनिर्घृणेनदुरात्मना॥भावगर्भस्मितंवाक्यंविलासललितागतिः॥नागरीणामतीवैतत्कटाक्षेक्षितमेवच॥ग्राम्योहरिर
यंत्वासांविलासनिगडैर्गतः॥भवतीनांपुनःपार्श्वंकयायुक्त्यासमेष्यति॥एषएषरथमारुह्यमथुरांयातिकेशवः॥क्रूरेणाक्रूर
केणात्रनृशंसेनप्रतारितः॥किंनवेत्तिनृशंसोयमनुरागपरंजनं॥येनेममक्षराल्हादंनयत्यन्यत्रनोहरिं॥एषरामेणस
हितःप्रयात्यंननिर्घृणः॥रथमारोप्यगोविंदंत्वर्यतामस्यवारणे॥गुरूणामग्रतोवक्तुंकिंब्रवीषिननःक्षमं॥गुरवःकिंकरि
ष्यंतिदग्धानांविरहाग्निना॥नंदगोपमुखागोपागंतुमेतेसमुद्यताः॥नोद्यमंकुरुतेकश्चिद्गोविंदविनिवर्त्तने॥सुप्रभाता
द्यरजनीमथुरावासियोषितां॥पास्यंत्यच्युतवक्त्राब्जंयासांनेत्राणिसंगतां॥धन्यास्तेपथियेकृष्णमितोयांतमवारितं॥उ

पंच० १९

द्वहिष्यंतिपश्यंतःस्वदेहंपुलकांचितं॥मथुरानागरीपौरनयनानांमहोत्सवः॥गोविंदावयवैर्दृष्टैरतीवाद्यभविष्यति॥कोनुस्वः
सभाग्याभिर्दृष्टास्ताभिरधोक्षजं॥विस्तारकांतिनयनायाद्रक्ष्यंतानिवारितं॥अहोगोपीजनस्यास्यदर्शयित्वामहानिधिं॥उ
त्कृत्तान्यत्रनीतोयंविधात्राकरुणात्मना॥अनुरागेणशैथिल्यमस्मासुव्रजताहरेः॥शैथिल्यमुपयांत्याशुकरेषुव
लयान्यपि॥अक्रूरःक्रूरहृदयःशीघ्रंप्रेरयतेहयान्॥एवमार्त्तासुयोषित्सुघृणाकस्यनजायते॥एषकृष्णरथस्योच्चैश्चक्र
रेणुर्निरीक्ष्यतां॥दूरीभूतोहरिर्येनसोपिरेणुर्नलक्ष्यते॥इत्येवमतिहार्देनगोपीजननिरीक्षितः॥तत्याजव्रजभूभागं
सहरामेणकेशवः॥गच्छंतोजवनाश्वेनरथेनयमुनातटं॥प्राप्तामध्याह्नसमयेरामक्रूरजनार्दनः॥अथाहकृष्णमक्रूरो
भवद्भ्यांतावदास्यतां॥यावत्करोमिकालिंद्यामान्हिकार्हणमंभसि॥ततस्नातस्तथेत्युक्तेस्वाचांतःसुमहामतिः॥दध्यौब्र
ह्मपरंविप्रप्रविश्ययमुनाजले॥फणासहस्रमालाढ्यंबलभद्रंददर्शह॥कुंदामालांगमुन्निद्रपद्मपत्रारुणेक्षणं॥वृ
तंवासुकिपद्माद्यैर्महद्भिःपवनाशनैः॥संस्तूयमानमुद्गंधिवनमालाविभूषणं॥दधानमसितेवस्त्रेचारुपत्रावतंसकं॥
चारुकुंडलिनंमत्तमंतर्जलतलेस्थितं॥तस्योत्संगेघनश्याममाताम्रायतलोचनं॥चतुर्बाहुमुदारांगंचक्राद्यायुधभूषणं
पीतेवसानंवसनेचित्रमाल्यविभूषणं॥शक्रचापतडिन्मालाविचित्रमिवतोयदं॥श्रीवत्सवक्षसंचारुकेयूरमुकुटोज्व
लं॥ददर्शकृष्णमक्लिष्टंपुंडरीकावतंसकं॥सनंदनाद्यैर्मुनिभिःसिद्धयोगैरकल्मषैः॥संचिंत्यमानंतत्रस्थैर्नासाग्रन्य

वि॰पु॰
२०

स्तल्लोचने॥बलकृष्णौतदाक्रूरःप्रत्यभिज्ञायविस्मितः॥अचिंतयद्यथाशीघ्रंकथमत्रागताविति॥विवक्षोस्तंभयामासवाचंतस्य
जनार्दनः॥ततोनिष्क्रम्यसलिलाद्रथमभ्यागमत्पुनः॥ददर्शतत्रचैवोभौरथस्योपरिधिष्ठितौ॥रामकृष्णौयथापूर्वंमनुष्य
वपुषान्वितौ॥निमग्नस्तुपुनस्तोयेददृशेसतथैवतु॥संस्तूयमानौगंधर्वैर्मुनिसिद्धमहोरगैः॥ततोविज्ञा[illegible]सद्भावःसतुदा
नपतिस्तदा॥तुष्टावसर्वविज्ञानमयमच्युतमीश्वरं॥सन्मात्ररूपिणेचिंत्यमहिम्नेपरमात्मने॥व्यापिनेनेकरूपैकस्वरूपायनमो
नमः॥सर्वरूपायतेचिंत्यहविर्भूतायतेनमः॥नमोविज्ञानपारायपरायप्रकृतेःप्रभो॥भूतात्माचेंद्रियात्माचप्रधानात्मातथभ
वान्॥आत्माचपरमात्माचत्वमेकःपंचधास्थितः॥प्रसीदंसर्वसर्वात्मान्क्षराक्षरमयेश्वरः॥ब्रह्मविष्णुशिवाद्याभिःकल्पना
भिरुदीरितः॥अनाख्येयस्वरूपात्मन्अनाख्येयप्रयोजनं॥अनाख्येयाभिधानत्वांनतोस्मिपरमेश्वर॥यत्रविद्यतेनाद्य
नामजात्यादिकल्पना॥तद्ब्रह्मपरमंनित्यंअविकारिभवानुज॥नकल्पनामृतेर्थस्यसर्वस्याधिमोमतः॥ततःकृष्णाच्युता
नंतविष्णुसंज्ञाभिरीड्यसे॥सर्वार्थास्त्वमजविकल्पनाभिरेतैर्देवाद्यंजगदखिलंत्वमेवविश्वं॥विश्वात्मंस्त्वमितिविकारभा
वहीनंसर्वस्मिन्नहिभवतोस्तिकिंचिदन्यत्॥त्वंब्रह्मापशुपतिरर्यमाविधातात्वंत्रिदशपतिःसमीरणोग्निः॥तोयेशोधनप
तिरंतकस्त्वमेकोभिन्नार्थैर्जगदभिपासिशक्तिभेदैः॥विश्वंभवान्सृजतिपद्मभवादिरूपोविश्वेतेचगुणमयोयमजप्रपं
चः॥रूपंपरंसदि— —चकमक्षरंयत्॥ज्ञानात्मनेसदसतेप्रणतोस्मितस्मै॥नमोवासुदेवायनमःसंकर्षणायच॥प्रद्युम्ना

पं॰
२०

MEMORIAL

यनमस्तुभ्यमनिरुद्धायतेनमः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशोऽष्टादशोमः॥॥पराशरउवाच॥एवमंतर्जलेविष्णुमभिष्टुयस
यादवः॥अर्चयामाससर्वेशंध्यानपुष्पैर्मनोरमैः॥परित्यक्तान्यविषयंमनस्तत्रनिवेश्ययः॥ब्रह्मभूतेचिरंध्यात्वाविररामसमा
धितः॥कृतकृत्यमिवात्मानंमन्यमानोमहामतिः॥आजगामरथंभूयोनिर्गम्ययमुनांभसः॥रामकृष्णौचददृशेयथापूर्वमवस्थितौ॥
विस्मिताक्षंतदाक्रूरंतंचकृष्णोभ्यभाषत॥नूनंतेदृष्टमाश्चर्यमक्रूरयमुनाजले॥विस्मयोत्फुल्लनयनोभवान्संलक्ष्यतेयतः॥अ
क्रूरउवाच॥अंतर्जलेयदाश्चर्यंदृष्टंतत्रमयाच्युत॥तदत्रापिहिपश्यामिमूर्त्तिमत्पुरतःस्थितं॥जगदेतन्महाश्चर्यरूपंयस्यमहा
त्मनः॥तेनाश्चर्यपरेणाहंभवताकृष्णसंगतः॥तत्किमेतेनमथुरांप्रयामोमधुसूदन॥बिभेमिकंसात्धिक्जन्मपरपिंडोपजीवि
नां॥इत्युक्त्वाचोदयामासतान्हयान्वातरंहसः॥संप्राप्तश्चापिसायान्हेसोक्रूरोमथुरांपुरीं॥विलोक्यमथुरांकृष्णंरामंचाहसयाद
वः॥पद्भ्यांयातंमहाभागौरथेनैकोविश्राम्यहं॥गंतव्यंवसुदेवस्यसभवद्भ्यांतथागृहं॥युवयोर्हिकृतेपुंहः कंसेननिरस्यते॥प
राशरउवाच॥इत्युक्त्वाप्रविवेशाथसोक्रूरोमथुरांपुरीं॥प्रविष्टौरामकृष्णौचराजमार्गमुपागतौ॥स्त्रीभिर्नरैश्चसानंदलोचनैरभि
वीक्षितौ॥जग्मतुर्लीलयावीरौमत्तौबालगजाविव॥भ्रममाणौचतौदृष्ट्वारजकंरंगकारकं॥अयाचेतांसुरूपाणिवासांसिरुचि
राननौ॥कंसस्यरजकःसोथप्रसादारूढविस्मयः॥बहून्याक्षेपवाक्यानिप्राहोच्चैरामकेशवौ॥ततस्तलप्रहारेणकृष्णस्तस्यदु
रात्मनः॥पातयामासकोपेनरजकस्यशिरोभुवि॥हत्वादायाथवस्त्राणिपीतनीलांबरौततः॥कृष्णरामौमुदायुक्तौमालाका

रगृहंगतौ॥विकाशिनेत्रयुगलौमालाकारोतिविस्मितः॥एतौकस्यकुतोयातौमैत्रेयाचिंतयत्तदा॥पीतनीलांबरधरौतौदृष्ट्वातिमनो
हरौ॥सतर्कयामासतदाभुवंदेवावुपागतौ॥विकासिमुखपद्माभ्यांताभ्यांपुष्पाणियाचितः॥भुवंविष्टभ्यहस्ताभ्यांपस्पर्शशिरसा
महीं॥प्रसादपरमौनाथौममगेहमुपागतौ॥धन्योहमर्चयिष्यामीत्याहतौमाल्यजीविनः॥ततःप्रहृष्टवदनस्तयोःपुष्पाणिकामतः॥
चारूण्येतान्यथैतानिप्रददौसविलोभयन्॥पुनःपुनःप्रणम्योभौमालाकारोनरोत्तमौ॥ददौचारूणिपुष्पाणिगंधवंत्यमलानिच॥
मालाकारायकृष्णोपिप्रसन्नःप्रददौवरं॥श्रीस्त्वांमत्संश्रयाभद्रनकदाचित्त्यजस्यति॥बलहानिर्नतेसौम्यधनहानिरथापिवा॥या
वद्दिनानितावच्चनप्रणश्यतिसंततिः॥भुक्त्वाचविपुलान्भोगांस्त्वमंतेमत्प्रसादजं॥ममानुस्मरणंप्राप्यदिव्यंलोकमवाप्स्यसि॥धर्मे
मनश्चभद्रंतेसर्वकालंभविष्यति॥युष्मत्संततिजातानांदीर्घमायुर्भविष्यति॥नोपसर्गादिकंदोषंयुष्मत्संततिसंभवः॥अवाप्स्यति
महाभागयावत्सूर्योभविष्यति॥श्रीपराशरउवाच॥इत्युक्त्वातद्गृहात्कृष्णोबलदेवसहायवान्॥निर्जगाममुनिश्रेष्ठमालाकारेण
पूजितः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेएकोनविंशोध्यायः॥श्रीपराशरउवाच॥ ॥राजमार्गेततःकृष्णःसानुलेपनभाजनां॥
ददर्शकुब्जामायांतींनवयौवनगोचरां॥तामाहललितंकृष्णःकस्येदमुपलेपनं॥भवत्यानीयतेसत्यंवदेंदीवरलोचने॥सकामेनै
वसाप्रोक्तासानुरागाहरिंप्रति॥प्राहसाललितंकुब्जातद्दर्शनबलात्कृता॥कांतकस्मान्नजानासिकंसेनाभिनियोजितां॥नैकवक्रे
तिविख्यातामनुलेपनकर्मणि॥नान्यपिष्टंहिकंसस्यरोचतेह्यनुलेपनं॥भवाम्यहमतीवास्यप्रसादधनभाजनं॥कृष्णउवाच॥ ॥

सुगंधमेतद्राजार्हंरुचिरंरुचिरानने॥आवयोर्गात्रसदृशंदीयतामनुलेपनं॥पराशरउवाच॥श्रुत्वैतदाहसाकुब्जागृह्यतामितिसा
दरं॥अनुलेपनंचप्रददौगात्रयोग्यमथोभयोः॥भक्तिछेदानुलिप्तांगौततस्तौपुरुषर्षभौ॥सेंद्रचापौविराजेतांसितकृष्णाविवांबुदौ॥
ततस्तांचिबुकेशौरिरुल्लापनविधानवित्॥उल्लाप्यतोलयामासद्व्यंगुलेनाग्रपाणिना॥चकर्षपद्भ्यांचतदाऋजुत्वंकेशवोनयत्॥
ततःसाऋजुतांप्राप्तायोषितामभवद्वरा॥विलासललितंप्राहप्रेमगर्भभरालसं॥वस्त्रेप्रगृह्यगोविंदंव्रजगेहंममेतिवै॥आयास्येभ
वतोगेहमितितांप्रहसन्हरिः॥विससर्जजहासोच्चैरामस्यालोक्यचाननं॥भक्तिछेदानुलिप्तांगौनीलपीतांबरौचतौ॥धनुःशालां
ततोयातौचित्रमाल्यानुलेपनौ॥आयोगेधनुरत्नंतुताभ्यांपृष्टैस्तुरक्षिभिः॥आख्यातेसहसाकृष्णोगृहीत्वापूरयद्धनुः॥ततःपू
रयतातेनभज्यमानंबलाद्धनुः॥चकारसुमहच्छब्दंमथुरायेनपूरिता॥अनुरक्तौततस्तौतुभग्नेधनुषिरक्षिभिः॥रक्षिसैन्यंनि
कृत्योभौनिःक्रांतौकार्मुकालयात्॥अक्रूरागमवृत्तांतमुपलभ्यतथाधनुः॥भग्नंश्रुत्वापिकंसोपिप्राहचाणूरमुष्टिकौ॥कंसउ॰॥
गोपालदारकौप्राप्तौभवद्भ्यांतौममाग्रतः॥मल्लयुद्धेनहंतव्यौममप्राणहरौहितौ॥नियुद्धेतद्विनाशेनभवद्भ्यांतोममाहितोषितो
ह्यहं॥दास्याम्यभिमतान्कामान्नान्यथैतन्महाबलौ॥न्यायतोन्यायतोवापिभवद्भ्यांतौममाहितौ॥हंतव्यौतद्वधाद्राज्यंसामा
न्यंवाभविष्यति॥इत्यादिश्यसतौमल्लौततश्चाहूयहस्तिपं॥प्रोवाचोच्चैस्त्वयामल्लसमाजद्वारिकुंजरः॥स्थाप्यःकुवलयापीडस्ते
नतौगोपदारकौ॥घातनीयौनियुद्धायरंगद्वारमुपागतौ॥तमप्याज्ञायदृष्ट्वाचमंचान्सर्वानुपाकृतान्॥आसन्नमरणःकंस

सूर्योदयमुदैक्ष्यत॥ततःसमस्तमंचेषुनागरःसतदाजनः॥राजमंचेषुचारूढाःसहभृत्यैर्महीभृतः॥मल्लप्राश्निकवर्गश्चरंग
मध्येसमीपगः॥कृतःकंसेनकंसोपितुंगमंचेव्यवस्थितः॥अंतःपुराणांमंचाश्चतथान्येपरिकल्पिताः॥अन्येचकरमुख्यानामन्ये
नगरयोषितां॥नंदगोपादयोगोपामंचेष्वन्येष्ववस्थिताः॥अक्रूरवसुदेवौचमंचप्रांतेव्यवस्थितौ॥नागरीयोषितांमध्येदेवकी
पुत्रगर्द्धिनी॥अंतकालेपिपुत्रस्यद्रक्ष्यामीतिमुखंस्थिता॥वाद्यमानेषुतूर्येषुचाणूरेचातिवल्गति॥हाहाकारपरेलोकेआस्फो
टयतिमुष्टिके॥हत्वाकुवलयापीडंहस्त्यारोहप्रनोदितं॥मदासृगनुलिप्तांगौगजदंतधरावुभौ॥मृगमध्येयथासिंहौगर्वलील
वलोकिनौ॥प्रविष्टौस्तुमहारंगंबलभद्रजनार्दनौ॥हाहाकारोमहानूयज्ञेसर्वरंगेष्वनंतरं॥कृष्णोयंबलभद्रोयमितिलोकस्यवि
स्मयः॥सोयंयेनहताघोरापूतनासानिशाचरी॥क्षिप्तंचशकटंयेनभग्नौचयमलार्जुनौ॥सोयंयःकालियंनागंननर्त्तारूह्यबा
लकः॥धृतोगोवर्द्धनोयेनसप्तरात्रंमहागिरिः॥अरिष्टोधेनुकःकेशीलीलयैवमहात्मनः॥निहतायेनदुर्वृत्तादृश्यतामेषसोच्यु
तः॥सोयंचास्यमहाबाहोबलभद्रोग्रतोग्रतः॥प्रयातिलीलयायोषिन्मनोनयननंदनः॥अयंसकथ्यतेप्राज्ञैःपुराणार्थावलो
किभिः॥गोपालोयादवंवंशंमग्नमभ्युद्धरिष्यति॥अयंससर्वभूतस्यविष्णोरखिलजन्मनः॥अवतीर्णोमहीमंशोनूनंभारापहो
भुवः॥इत्येवंवर्णितेपौरेरामेकृष्णेचतत्क्षणात्॥उरस्ततापदेवक्याःस्निहश्रुतपयोधरं॥महोत्सवमिवासाद्यपुत्राननविलो
कनः॥युवेववसुदेवोभूद्विहायाभ्यागतांजरां॥विस्तारिताक्षियुगलोराजांतःपुरयोषितां॥नागरस्त्रीसमूहश्चद्रष्टुंनविरराम

लं॥सख्यःपश्यतकृष्णस्यमुखमत्यरुणेक्षणं॥गजयुद्धकृतायासस्वेदांबुकणिकांचितं॥विकाशिशारदंभोजमवश्यायजलोक्षि
तं॥परिभूयस्थितंजन्मसफलंक्रियतांदृशः॥श्रीवत्सांकंजगद्धामबालस्येतद्विलोक्यतां॥विपक्षक्षपणंवक्षोभुजयुग्मंचभा
मिनि॥किंनपश्यसिमुग्धेंदुमृणालधवलाननं॥बलभद्रमिमंनीलपरिधानमुपागतं॥वल्गतामुष्टिकेनैवचाणूरेणतथासखि॥
क्रियतेबलभद्रस्यहास्यामिषद्विलोक्यतां॥सख्यःपश्यतचाणूरोनियुद्धार्थमयंहरिं॥समुपैतिनसंत्यत्रकिंवृद्धायुक्तिकारिणः॥
नियुद्धप्राश्निकानांतुमहानेषव्यतिक्रमः॥यद्बालबलिनोर्युद्धंमध्यस्थैःसमुपेक्ष्यते॥क्वयौवनोन्मुखीभूतसुकुमारतनुर्हरिः॥
क्ववज्रकठिनाभोगशरीरोयंमहासुरः॥इमौसुललितौरंगेवर्त्तेतेनवयौवनौ॥दैतेयमल्लाश्चाणूरप्रमुखाश्चापिदारुणाः॥श्री
पराशरउवाच॥इत्थंपुरस्त्रीलोकस्यवदतश्चालयन्भुवं॥ववल्गबद्धकक्षांतजनस्यभगवान्हरिः॥बलभद्रोपिचास्फो
ट्यववल्गललितंयथा॥पदेपदेतदाभूमिर्नविशीर्णातदद्भुतं॥चाणूरेणततःकृष्णोयुयुधेमितविक्रमः॥नियुद्धकुशलोदैत्योब
लदेवेनमुष्टिकः॥संनिपातावधूतैश्चचाणूरेणसमंहरिः॥क्षेपणीयैर्मुष्टिभिश्चैवकीलवज्रनिपातनैः॥जानुभिश्चाश्मनिर्घातैः
तथाबाहुविवदितैः॥पादोद्धूतैःप्रमृष्टाभिस्तयोर्युद्धमभून्महत्॥अशस्त्रमतिघोरंचतयोर्युद्धंसुदारुणं॥बलप्राणविनि
ष्पाद्यसमाजोत्सवसंनिधौ॥यावद्यावच्चचाणूरोयुयुधेहरिणासह॥प्राणहानिमवापासौतावत्तावल्लवंनवं॥कृष्णोपियुयुधे
तेनलीलयैवजगन्मयः॥खेदाच्चालयताकोपान्निजशेखरकेसरं॥बलक्षयंविवृद्धिंचदृष्ट्वाचाणूरकृष्णयोः॥वारयामा

सतूर्याणिकंसःकोपपरायणः॥मृदंगादिषुतूर्येषुप्रतिषिद्धेषुतत्क्षणात्॥खसंगतान्यवाद्यंत देवतूर्याण्यनेकशः॥जयगोविंद
चाणूरंजहिकेशवदानवं॥अंतर्द्धानगतादेवास्तदोचुरतिहर्षिताः॥चाणूरेणचिरंकालंक्रीडित्वामधुसूदनः॥उत्पाद्यभ्रामया
मासतद्वधायकृतोद्यमं॥भ्रामयित्वाशतगुणंदैत्यमल्लममित्रजित्॥भूमावास्फोटयामासगगनेगतजीवितं॥भूमावास्फो
टितस्तेनचाणूरःशतधाव्रजत्॥रक्तश्रावमहापंकांचकारसतदाभुवं॥बलभद्रोपितत्कालंमुष्टिकेनमहाबलः॥युयुधे दै
त्यमल्लेनचाणूरेणयथाहरिः॥सोप्येवंमुष्टिनामूर्द्धिवक्षस्याहत्यजानुना॥पातयित्वाधरापृष्टे निःपिपेषगतायुषं॥कृष्णस्तोष
शलकं भूयोमल्लराजंमहाबलं॥वाममुष्टिप्रहारेणपातयामासभूतले॥चाणूरेनिहतेमल्लेमुष्टिकेविनिपातिते॥नीतेक्षयं
तोशलकेसर्वेमल्लाप्रदुद्रुवुः॥ववल्गातुःस्ततोरंगेकृष्णसंकर्षणावुभौ॥समानवयसोगोपान्बलादाकृष्यहर्षितो॥कंसो
पिकोपरक्ताक्षःप्राहोच्चैर्व्यायतान्नरान्॥गोपावेतौसमाजौघान्निष्क्राम्यतांबलादितः॥नंदोपिगृह्यतांपापोनिगडैरायसै
रिह॥अवृद्धार्हेणदंडेनवसुदेवोपिवध्यतां॥वल्गंतिगोपाःकृष्णेनयेचमेपुरतस्थिताः॥गोधनंनीयतांतेषांयच्चास्तिवसुकिं
चन॥एवमाज्ञापयानंतुप्रहस्यमधुसूदनः॥उत्पत्यारुह्यमंचंकंसंजग्राहवेगतः॥केशेष्वाकृष्य विगलत्किरीटमवनीतले॥
सकंसंपातयामासतस्योपरिपपातच॥निःशेषजगदाधारगुरुणापततोभुवि॥कृष्णेनत्याजितःप्राणानुग्रसेनात्मजोनृ
प॥मृतस्यकेशेषुतदागृहीत्वामधुसूदनः॥चकर्षदेहंकंसस्यरंगमध्येमहाबलः॥गौरवेणातिमहतापरिखातेनकृष्यता॥कृ

ताकंसस्यदेहेनवेगेनेवमहांभसः॥कंसेगृहीतेकृष्णेनतद्भ्राताभ्यागतोरुषा॥सुनामाबलभद्रेणलीलयैवनिपातितः॥ततोहाहाकृ
तंसर्वमभूत्तद्रंगमंडलं॥अवज्ञयाहतंदृष्ट्वाकृष्णेनमथुरेश्वरं॥कृष्णोपिवसुदेवस्यपादौजग्राहसत्वरः॥देवक्याश्चमहाबाहुर्बल
देवसहायवान्॥उत्थाप्यवसुदेवस्तंदेवकीचजनार्दनं॥स्मृतजन्मोक्तवचनौतावेवप्रणतौस्थितौ॥प्रसीदसीदतांदत्तोदेवानामभयं
प्रभो॥तथावयोःप्रसादेनकृतोभ्युद्धारईश्वर॥आराधितोयद्भगवानवतीर्णोगृहेमम॥दुर्वृत्तनिधनार्थायतेननःपावितंकुलं॥
त्वमंतःसर्वभूतानांसर्वभूतव्यवस्थितः॥प्रवर्त्ततेसमस्तात्मन्त्वत्तोभूतभविष्यति॥यज्ञैस्त्वमिज्यसेचिंत्यसर्वदेवमयोच्युत॥
त्वमेवयज्ञोयष्टाचयज्ञानांपरमेश्वरः॥सापन्हवंममनोयदेकृत्वयिजायते॥देवक्याश्चात्मनःप्रीत्यातदंत्येनविडंबना॥क्वकर्त्ता
सर्वभूतानामनादिनिधनोहरिः॥क्वमेमनुष्यकस्यैषाजिह्वापुत्रेतिवक्ष्यति॥जगदेतज्जगन्नाथमखिलंसंभूतमखिलंयतः॥क
यायुक्त्याविनामायांसोऽस्मत्तःप्रभविष्यति॥यस्मिन्प्रतिष्ठितंसर्वंजगत्स्थावरजंगमं॥सकोष्ठोत्संगशायनोमनुज्जायतेकथं॥
सत्वंप्रसीदपरमेश्वरपाहिविश्वंअंशावतारकरणैर्नममासिपुत्रः॥आब्रह्मपादपमयंजगदेतदीशत्वच्चोविमोहयसिकिंपरमे
श्वरात्मन्॥मायाविमोहितदृशातनयोममेतिकंसाद्भयंकृतमपास्तभयातितीव्रं॥नीतोसिगोकुलमरातिभयाकुलस्यवृद्धिं
गतोसिममनास्तिममत्वमीश॥कर्माणिरुद्रमरुदश्विशतक्रतूनांसाध्यानियस्यनभवंतिनिरीक्षितानि॥त्वंविष्णुरीशजग
तामुपकारहेतोःप्राप्तोसिनःपरिगतंविगतोहिमोहः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेविंशतिमोध्यायः॥ ॥श्रीपराशरउ०॥

नौसमुत्पन्नविज्ञानौ भगवत्कर्मदर्शनात्॥ देवकीवसुदेवौतु दृष्ट्वामायांहरिःपुनः॥ मोहाययदुचक्रस्य विततानसवैष्णवीं॥ उवाचचांबमीतातविरादुत्कंठितेनमो॥ भवंतौकंसभीतेनदृष्टौसंकर्षणेनच॥ कुर्वतांयातियःकालोमातापित्रोरपूजनं॥ तत्खंडमायुषोव्यर्थंसाधूनामुपजायते॥ गुरुदेवद्विजातीनांमातापित्रोश्चपूजनं॥ कुर्वतःसफलःकायोदेहिनस्तातजायते॥ तत्क्षांतव्यमिदंसर्वमतिक्रमकृतेपितः॥ कंसप्रतापवीर्याभ्यामावयोःपरवश्ययोः॥ पराशरउ०॥ इत्युक्त्वाथप्रणम्योभौयदुवृद्धाननुक्रमात्॥ यथार्हमभिपूज्याथचक्रतुःपौरमाननं॥ कंसपत्न्यस्ततःकंसंपरिवार्यहतंभुवि॥ विलेपुर्मातरश्चास्यदुःखशोकपरिप्लुताः॥ बहुप्रकारमत्यर्थंपश्चात्तापपरोहरिः॥ ताःसमाश्वासयामासस्वयमश्राविलेक्षणः॥ उग्रसेनंततोबंधान्मुमोचमधुसूदनः॥ अभ्यषिंचत्तथैवैनंनिजराज्येहतात्मजं॥ राज्येभिषिक्तःकृष्णेनयदुसिंहःसुतस्यसः॥ चकारप्रेतकार्याणियेचान्येतत्रघातिताः॥ कृतौर्ध्वदेहिकंचैनंसिंहासनगतंहरिः॥ उवाचाज्ञापयविभोयत्कार्यमविशंकितः॥ ययातिशापाद्वंशोयमराज्यार्होपिसांप्रतं॥ मयिभृत्येस्थितेदेवानाज्ञापयतुकिंनृपैः॥ इत्युक्त्वासोस्मरद्वायुमाजगामाशुतत्क्षणात्॥ उवाचचैनंभगवान्केशवःकार्यमानुषः॥ गच्छत्वंब्रूहिवायोत्रअलंगर्वेणवासव॥ दीयतामुग्रसेनायसुधर्माभवतासभा॥ कृष्णोब्रवीतिराजार्हमेतद्रत्नमनुत्तमं॥ सुधर्माख्यासभायुक्तमस्यांयदुभिरासितुं॥ श्रीपराशरउवाच॥ इत्युक्तःपवनोगत्वासर्वमाहशचीपतिं॥ ददौसोपिसुधर्माख्यांसभांवायोःपुरंदरः॥ वायुनाचाहृतांदिव्यांसभांतेयदुपुंगवाः॥ बुभुजुःसर्वरत्नाढ्यांगोविंदभुज

संश्रयात्॥ विदिताखिलविज्ञानौसर्वज्ञानमयावपि॥ शिष्याचार्यक्रमंवीरौख्यापयंतौयदूत्तमौ॥ ततःसांदीपिनींकाश्यमवंतिपुरवासिनं॥ शास्त्रार्थंजग्मतुर्वीरौबलदेवजनार्दनौ॥ तस्यशिष्यत्वमभ्येत्यगुरुवृत्तिपरौहितौ॥ दर्शयांचक्रतुर्वीरावाचारमखिलेजने॥ सरहस्यंधनुर्वेदंससंग्रहमधीयतां॥ अहोरात्रैश्चतुःषष्ट्यातदद्भुतमभूद्द्विज॥ सांदीपिनिरसंभाव्यंतयोःकर्मातिमानुषं॥ विचिंत्यतौततोमेनेप्राप्तौचंद्रदिवाकरौ॥ अस्त्रग्राममशेषंचप्रोक्तमात्रमवाप्यतौ॥ ऊचतुर्व्रियतांयातेदातव्यागुरुदक्षिणा॥ सोप्यतींद्रियमालोक्यतयोःकर्ममहामतिः॥ अयाचतमृतंपुत्रंप्रभासेलवणार्णवे॥ गृहीतास्त्रौततस्तौतुअर्घहस्तोमहोदधिः॥ उवाचनमयापुत्रोहृतःसांदीपिनेरिति॥ दैत्यःपंचजनोनामशंखरूपःसबालकं॥ जग्राहसोंऽतःसलिलेमग्मेवासुरसूदनः॥ इत्युक्तेंतर्जलेगत्वाहत्वापंचजनंचतं॥ कृष्णोजग्राहतस्यास्थिप्रभवंशंखमुत्तमं॥ यस्यनादेनदैत्यानांबलहानिरजायत॥ देवानांवर्धतेतेजोयात्यधर्मश्चसंक्षयं॥ तंपांचजन्यमापूर्यगत्वायमपुरींहरिः॥ बलदेवश्चबलवान्जित्वावैवस्वतंयमं॥ तंबालंयातनासंस्थंयथापूर्वशरीरिणं॥ पित्रेप्रदत्तवान्कृष्णोबलश्चबलिनांवरः॥ मथुरांचपुनःप्राप्ताउग्रसेनेनपालितां॥ प्रहृष्टपुरुषस्त्रीकामुभौरामजनार्दनौ॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२१॥ श्रीपराशरउवाच॥ जरासंधसुतेकंसउपयेमेमहाबलः॥ अस्तिंप्राप्तिंचमैत्रेयतयोर्भर्तृहणंहरिं॥ महाबलपरीवारोमगधाधिपतिर्बली॥ हंतुमभ्याययौकोपाज्जरासंधःसयादवं॥ उपेत्यमथुरांसोथरुरोधमगधेश्वरः॥ अक्षौहिणीभिः

वि०पु० सैन्यस्यत्रयोविंशतिभिस्ततः॥निःष्क्रम्याल्पपरीवारावुभौरामजनार्दनौ॥युयुधातेसमंतस्यबलिनोबलसैनिकैः॥ततो
२५ बलश्चकृष्णश्चमतिंचक्रेमहाबले॥आयुधानांपुराणानांमादानेमुनिसत्तम॥अनंतरंहरेःशार्ङ्गंतूणौचाक्षयसायकौ॥
आकाशादागतौविप्रतथाकौमोदकीगदा॥हलंचबलभद्रस्यगगनादागतंवरं॥मनसोभिमतंवीरंसौनंदंमुशलंतथा॥
ततोयुद्धेपराजित्यससैन्यंमगधाधिपं॥पुरींविविशतुर्वीरावुभौबलजनार्दनौ॥जितेतस्मिन्सुनिवृत्तेजरासंधेमहा
मुने॥जीवमानेगतेकृष्णोनेवामन्यततंजितं॥पुनरप्याजगामाथजरासंधोमहाबलः॥जितश्चरामकृष्णाभ्यामपक्रांतो
द्विजोत्तम॥दशचाष्टौचसंग्रामानेवमत्यंतदुर्मदः॥यदुभिर्मागधोराजाजिग्येकृष्णपुरोगमैः॥सर्वेष्वेवतुयुद्धेषुयादवैः
समरेजितः॥अपक्रांतोजरासंधःस्वल्पसैन्यैर्बलाधिकः॥नतद्बलंयादवानांजितंयत्तैरनेकशः॥तत्रसन्निधिमाहात्म्यं
विष्णोरंशस्यचक्रिणः॥मनुष्यधर्मशीलस्यलीलासाजगत्पतेः॥अस्त्राण्यनेकरूपाणियदरातिषुमुंचति॥मनसैव
जगत्सृष्टिंसंहारंचकरोतियः॥तस्यारिपक्षक्षपणेकोयमुद्यमविस्तरः॥तथापियेमनुष्याणांधर्मास्तदनुवर्त्तनं॥कुर्वन्
बलवतासंधिंहीनैर्युद्धंकरोत्यसौ॥सामचोपप्रदानंचतथाभेदप्रदर्शनं॥करोतिदंडपातंचक्वचिदेवपलायनं॥मनुष्यदे
हिनांचेष्टामित्येवमनुवर्त्तत॥लीलाजगत्पतेस्तस्यछंदतःसंप्रवर्त्तते॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२२॥श्रीपरा पंच०
शरउवाच॥गार्ग्यंगोष्ठेद्विजंश्यालःषंडमित्युक्तवान्मुने॥यदूनांसन्निधौसर्वेजहसुर्यादवास्ततः॥ततःकोपसमावि २५

ष्टोदक्षिणापथमेत्यसः॥सुतमिच्छन्तपस्तेपेयदुचक्रभयावहं॥आराधयन्महादेवंसोश्मचूर्णमभक्षयन्॥ददौवरंचतुष्टो
सौवर्षेद्वादशमेहरः॥सभाजयामासचतंयवनेशोह्यनात्मजं॥तद्योषित्संगतश्चास्यपुत्रोभूदलिसप्रभः॥तंकालयवनं
राज्येस्वयमेवनरेश्वरः॥अभिषिच्यवनंयातोवज्राग्रकठिनोरसं॥चतुर्वीर्यबलोन्मत्तःपृथिव्यांबलिनोनृपान्॥पप्रच्छनारदश्चा
स्मैकथयामासयादवान्॥म्लेच्छकोटिसहस्राणांसहस्रैरभिसंवृतः॥गजाश्वरथसंपन्नैश्चकारपरमोद्यमं॥प्रययौचाव्ययच्छिन्न
पवनेशोदिनेदिने॥यादवान्प्रतिसामर्षोमैत्रेयमथुरांपुरीं॥कृष्णोपिचिंतयामासक्षपितंयादवंबलं॥यवनेनरणेगम्यंमागधस्य
भविष्यति॥मागधास्त्वबलंक्षीणंसकालयवनोबली॥हंतातदिदमायातंयदूनांव्यसनंद्विज॥तस्माद्दुर्गंकरिष्यामियदूना तू
मरिदुर्जयं॥स्त्रियोपियत्रयुध्येयुःकिंपुनर्वृष्णिपुंगवाः॥मयिमत्तेप्रमत्तेवासुप्तेप्रवसितेपिवा॥यादवाभिभवंदुष्टामाकुर्वन्वै
रयोधिनः॥इतिसंचिंत्यगोविंदोयोजनानिमहोदधिं॥ययाचेद्वादशपुरींद्वारकांयत्रनिर्ममे॥महोद्यानामहावप्रांतडागशत
शोभितां॥प्राकारगृहसंबद्धामिंद्रस्येवामरावतीं॥मथुरावासिनंलोकंतत्रानीयजनार्दनः॥आसन्नेकालयवनेमथुरांचपु
नर्ययौ॥बहिरावसितेसैन्येमथुरायांनिरायुधः॥निर्जगामसगोविंदोददर्शयवनेश्वरं॥सज्ञात्वावासुदेवंतंबाहुप्रह
रणोनृपः॥अनुयातोमहायोगिचेतोभिःप्राप्यतेनयः॥तेनानुयातःकृष्णोपिप्रविवेशमहागुहां॥यत्रशेतेमहावीर्योमुचु
कुंदोनरेश्वरः॥सोपिप्रविष्टोयवनोदृष्ट्वाशय्यागतंनरं॥पादेनताडयामासमत्वाकृष्णंसुदुर्मतिः॥दृष्टमात्रश्चतेनासौज

ज्वालपवनोग्निना॥तत्क्रोधजेनमैत्रेयभस्मीभूतेचतत्क्षणात्॥सहिदेवासुरेयुद्धेगतोहत्वामहासुरान्॥निद्रार्त्तःसुमहा
कालंनिद्रांवव्रेवरंसुरात्॥प्रोक्तश्चदेवैःसंसुप्तंयस्त्वामुत्थापयिष्यति॥देहजेनाग्निनासद्यःसतुभस्मीभविष्यति॥एवंद
ग्ध्वासतंपापंदृष्ट्वाचमधुसूदनं॥कस्त्वमित्याहसोप्याहजातोहंशशिनःकुले॥वसुदेवस्यतनयोयदोर्वंशसमुद्भवः॥मुचुकुंदो
पितत्रासौवृद्धगर्गवचःस्मरन्॥संस्मृत्वाप्रणिपत्यैनंसर्वंसर्वेश्वरंहरिं॥प्राहज्ञातोभवान्विष्णोरंशस्त्वंपरमेश्वर॥पुराग
र्गेणकथितमष्टाविंशतिमेयुगे॥द्वापरांतेहरेर्जन्मयदुवंशेभविष्यति॥सत्वंप्राप्तोनसंदेहोमर्त्यानामुपकारकृत्॥तथापिसु
महत्तेजोनालंसोढुमहंतव॥यथाहिसजलांभोदनादधीरतरंतव॥वाक्यंनमतिचैवोर्वीयुष्मत्पादप्रपीडिता॥देवासुरेमहा
युद्धेदैत्यसैन्यमहाभयः॥नसेहुर्ममतेजश्चत्वत्तेजोनसहाम्यहं॥संसारपतितस्यैकोजंतोस्त्वंशरणंपरं॥सप्रसीदप्रपन्ना
र्त्तिहर्त्ताहरममाशुभं॥त्वंपयोनिधयःशैलाःसरितस्त्वंवनानिच॥मेदिनीगगनंवायुरापोग्निस्त्वंतथामनः॥बुद्धिरव्याकृतं
प्राणाःप्राणेशस्त्वंतथाच्युत॥पुंसःपरतरंयच्चव्याप्यजन्मविकल्पवत्॥शब्दादिहीनमजरममेयंक्षयवर्जितं॥अवृद्धिनाशं
तद्ब्रह्मत्वमाद्यंतविवर्जितं॥त्वत्तोमराःसपितरोयक्षगंधर्वकिंनराः॥सिद्धाश्चाप्सरसस्त्वत्तोमनुष्याःपशवःखगाः॥सरीसृपा
मृगाःसर्वेत्वत्तःसर्वेमहीरुहाः॥यच्चभूतंभविष्यच्चकिंचिदत्रचराचरं॥अमूर्त्तंमूर्त्तमथवास्थूलंसूक्ष्मंचरंस्थिरं॥तत्सर्वं
त्वंजगत्कर्त्तानास्तिकिंचित्त्वयाविना॥मयासंसारचक्रेस्मिन्भ्रमताभगवान्सदा॥तापत्रयाभिभूतेनप्राप्तानिर्वृतिःक्व

चित्॥दुःखोन्येवसुखानीतिमृगतृष्णाजलाशया॥मयानाथगृहीतानितानितापायमेभवन्॥राज्यमुर्वीबलंकोशोमित्रपक्ष
स्तथात्मजाः॥भार्याभृत्यजनायेचशब्दाद्याःविषयाःप्रभोः॥सुखबुध्यामयासर्वंगृहीतमिदमव्यय॥परिणामेतदेवेशतापात्म
कवभून्मम॥देवलोकगतिंप्राप्तोनाथदेवगणोपिहि॥मत्तःसाहाय्यकामोभूत्शाश्वतीकुत्रनिर्वृतिः॥त्वामनाराध्यजगतांसर्वे
षांप्रभवास्पदं॥शाश्वतीप्राप्यतेकेनपरमेश्वरनिर्वृतिः॥त्वन्मायामूढमनसोजन्ममृत्युजरादिकान्॥अवाप्यतापान्पश्यं
तिप्रेतराजानंतेनराः॥ततोनिजक्रियासूतिनरकेष्वतिदारुणं॥प्राप्नुवंतिनरादुःखमस्वरूपविदस्तव॥अहमत्यंतविषयीमो
हितस्तवमायया॥ममत्वगर्वगर्त्तांतान्भ्रमामिपरमेश्वर॥सोहंत्वांशरणमपारमीशमीड्यंसंप्राप्तःपरमपदंयतोनकिंचि
त्॥संसारश्रमपरितापतप्तचेतानिर्वाणेपरिणतधाम्निसाभिलाषः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२३॥ ॥छ॥ ॥
श्रीपराशरउवाच॥इत्थंस्तुतस्तदातेनमुचुकुंदेनधीमता॥प्राहससर्वभूतानामनादिर्भगवान्हरिः॥श्रीभगवानुवाच॥
यथाभिवांछितान्दिव्यान्भविष्यसिमहाकुले॥जातिस्मरोमत्प्रसादात्ततोमोक्षमवाप्स्यसि॥श्रीपराशरउवाच॥
इत्युक्तःप्रणिपत्येशंजगन्नाथमच्युतं॥गुहामुखाद्विनिःक्रांतोददृशेसोल्पकान्नरान्॥ततःकलियुगंज्ञात्वाप्राप्तंत
प्तुंनृपस्ततः॥नरनारायणस्थानंप्रययौगंधमादनं॥कृष्णोपिघातयित्वारिमुपायेनहितद्बलं॥जग्राहमथुरामेत्यहस्त्यश्व
स्यंदनोज्ज्वलं॥आनीयउग्रसेनायद्वारवत्यांन्यवेदयत्॥पराभिभवनिःशंकंबभूवचयदोःकुलं॥बलदेवोपिमैत्रेयप्रश॥

वि॰पु॰
२७

ताखिलविग्रहः॥जातिदर्शनसोत्कंठःप्रयायोनंदगोकुलं॥ततोगोपांश्चगोपीश्चयथापूर्वममित्रजित्॥तथैवाभ्यवदत्प्री
त्या बहुमानपुरःसरं॥सकैश्चित्संपरिष्वक्तःकांश्चिच्चपरिषस्वजे॥हास्यंचक्रेसमंकैश्चिद्गोपैर्गोपीजनैस्तथा॥प्रियाण्य
नेकान्यवदन्गोपासुचसोहेयुधा॥गोप्यश्चप्रेमकुपिताःप्रोचुःसेर्ष्यमथापराः॥गोप्यःपप्रच्छुरपरोनागरीजनवल्लभः॥
कच्चिदास्तेसुखंकृष्णश्चलसेमलवात्मकः॥अस्मच्चेष्टामपहासन्नकच्चित्पुरयोषितां॥सौभाग्यमानमधिकंकरोतिक्षण
सौहृदः॥कच्चित्स्मरतिनःकृष्णोगीतानुगमनंकलं॥अप्यसौमातरंद्रष्टुंसकृदप्यागमिष्यति॥अथवाक्यंतदालीपेरन्याश्च
क्रियतांकथाः॥यस्यास्माभिर्विनातेनविनास्माकंभविष्यति॥पितामातातथाभ्राताभर्त्ताबंधुजनश्चकिं॥नत्यक्तसुकृते
स्माभिरकृतज्ञध्वजोहिसः॥तथापिकिंचिदालापमिहागमनसंश्रयं॥करोतिकृष्णःकर्त्तव्यंभवताकृष्णनानृतं॥दामोद
रोसौगोविंदःपुरस्त्रीसक्तमानसः॥अपेतप्रीतिरस्मासुदुर्दर्शःप्रतिभातिनः॥श्रीपराशरउवाच॥आमंत्रितःसकृष्णे
तिपुनर्दामोदरेतिच॥जहसुःसुस्वरंगोप्योहरिणाहृतचेतसः॥संदेशैःसाममधुरैःप्रेमगर्भैरगर्वितैः॥रामेणाश्वासि
तागोप्यःकृष्णस्यातिमनोहरैः॥गोपैश्चपूर्ववद्रामःपरिहासमनोहरैः॥कथाश्चकाररेमेचसहतैर्व्रजभूमिषु॥ ॥इतिश्री
विष्णुपुराणेपंचमेंशे॥२४॥पराशरउवाच॥ ॥वनेविचरतस्तस्यसहगोपैर्महात्मनः॥मानुषच्छद्मरूपस्यशेषस्यध
रणीभृतः॥निःष्पादितोरुकार्यस्यकार्येणोर्वीविचारिणः॥उपभोगार्थमत्यर्थंवरुणःप्राहवारुणीं॥अभीष्टासर्वदायस्य

पंच॰
२७

मादिरेत्वंमहौजः॥अनंतस्योपभोगायतस्यगच्छमुदेशुभे॥इत्युक्तावारुणीतेनसन्निधानमथाकरोत्॥वृंदावनेवनोत्पन्नकदंबत
रुकोटरे॥विचरन्बलदेवोपिमदिरागंधमुत्तमं॥आघ्रायमदिरांवर्षमवापाथवरानन॥कदंबात्सहसामद्यधारांप्रेक्ष्यसलांग
ली॥गृहीत्वातांतटेनैवचकर्षमदविह्वलः॥पापेनायासिनायासिगम्यतामिच्छयात्मनः॥सकृष्णातेनसहसामार्गंसंत्यज्यनिम्न
गा॥यत्रास्तेबलदेवोसौप्लावयामासतद्वनं॥शरीरिणीतयोसन्नत्रासविह्वललोचना॥प्रसीदेत्यब्रवीद्रामंमुंचमांमुशलायुध॥
सोब्रवीदवजानासिममशौर्यबलेनहि॥सोहंत्वांहलपातेननयिष्यामिसहस्रधा॥श्रीपराशरउवाच॥इत्युक्तयातिसंत्रासात्तयान
द्यापसादितः॥भूभागेप्लावितेतस्मिन्मुमोचयमुनाजलं॥ततःस्नातस्यवैकांतिराजगाममहात्मनः॥अवतंसोत्पलंचारुगृहीत्वै
कंचकुंडलं॥वरुणप्रहितांचास्मैमालामम्लानपंकजां॥समुद्राभेतथावस्त्रेनीलेलक्ष्मीरयच्छत॥कृतावतंसःसतदाचारुकुंडल
भूषितः॥नीलांबरधरस्त्रग्वीशुशुभेकांतिसंयुतः॥इत्थंविभूषितोरेमेतत्ररामस्तदाव्रजे॥मासद्वयेनयातश्चपुनःसमधुरांपुरीं
रेवतींनामतनयांरेवतस्यमहीपतेः॥उपयेमेबलस्तस्यांजज्ञातेनिषठोल्मुकौ॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२५॥ ॥छ॥ ॥
भीष्मकःकुंडिनेराजाविदर्भविषयेभवत्॥रुक्मीतस्याभवत्पुत्रोरुक्मिणीचवरानना॥रुक्मिणींचकमेकृष्णःसाचतंचारुहासि
नी॥नददौयाचतेचैनांरुक्मीद्वेषेनचक्रिणे॥ददौचशिशुपालायजरासंधप्रचोदितः॥भीष्मकोरुक्मिणासाईंरुक्मिणीमुरु
विक्रमः॥विवाहार्थंततःसर्वेजरासंधमुखान्नृपाः॥भीष्मकस्यपुरींजग्मुःशिशुपालप्रियैषिणः॥कृष्णोपिबलभद्राद्यैःयदु

भिःपरिवारितःप्रययौकुंडिनंद्रष्टुंविवाहंचैवभूभृतः॥श्वोभाविनीविवाहेतुतांकन्यांहृतवान्हरिः॥विपक्षभावमासज्यरामज्ये
ष्ठेषुबंधुषु॥ततश्चपौंड्रकःश्रीमान्दंतवक्रोविदूरथः॥शिशुपालजरासंधशाल्वाद्याश्चमहीभृतः॥कुपितास्तेहरिंहंतुंचक्रु
रुद्योगमुत्तमं॥निर्जिताश्चसमागम्यरामाद्यैर्यदुपुंगवैः॥कुंडिनंनप्रवेक्ष्यामित्यहत्वायुधिकेशवं॥कृत्वाप्रतिज्ञांरुक्मीचहंतुंकृ
ष्णमभिद्रुतः॥हत्वाबलंसनागाश्वपत्तिस्यंदनसंकुलं॥निर्जितःपातितश्चोर्व्यांलीलयैवसचक्रिणा॥हंतुंकृतमतिःकृष्णोरुक्मि
णंयुद्धदुर्मदं॥प्रणम्ययाचितोब्रह्मन्रुक्मिण्याभगवान्हरिः॥एकएवममभ्रातानहंतव्यस्त्वयाधुना॥क्रोधंनियम्यदेवेशभ्रा
तृभिक्षाप्रदीयतां॥इत्युक्तेसपरित्यक्तःकृष्णेनाद्भुतकर्मणा॥रुक्मीभोजकटंनामपुरंकृत्वाचसत्तटे॥निर्जित्यरुक्मिणंस
म्यगुपयेमेसरुक्मिणीं॥राक्षसेनविवाहेनसंप्राप्तांमधुसूदनः॥तस्यांजज्ञेथप्रद्युम्नोमदनोंशाश्चवीर्यवान्॥जहारशंबरो
यंवैजघानसचशंबरं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२६॥ ॥मैत्रेयउवाच॥शंबरेणहृतोवीरःप्रद्युम्नःसकथंमुने॥शं
बरश्चमहावीरःप्रद्युम्नेनकथंहतः॥श्रीपराशरउवाच॥षष्ठेन्हिजातमात्रंचप्रद्युम्नंसूतिकागृहात्॥ममैषहंतेतिमुनेहृ
तवान्कालशंबरः॥हत्वाचिक्षेपचैवैनंग्राहोग्रेलवणार्णवे॥कल्लोलजनितावर्त्तेसुघोरेमकरालये॥पतितंतत्रचैवैकोम
त्स्योजग्राहबालकं॥नममारचतस्यापिजठरानलदीपितः॥मत्स्यबंधैश्चमत्स्योसौमत्स्यैरन्यैःसहद्विज॥घातितोसुरवर्या
यशंबरायनिवेदितः॥तस्यमायावतीनामपत्नीसर्वगृहेश्वरी॥कारयामाससूदानामाधिपत्यमनिंदिता॥दारितेमत्स्यजठरे

ददर्शोचातिशोभनः॥कुमारोमन्मथतरोर्दग्धस्यप्रथमांकुरं॥कोयंकथमयंमत्स्यजठरेप्रविवेशितः॥इत्येवंकौतुकाविष्टांतां
तन्वींप्राहनारदः॥अयंसमस्तजगतःसृतिसंहारकर्मणा॥शंबरेणहृतःकृष्णतनयःसूतिकागृहात्॥क्षिप्तसमुद्रेमत्स्येन
निगीर्णस्तेवशंगतः॥नररत्नमिदंसुभ्रूविश्रब्धापरिपालय॥पराशरउवाच॥नारदेनैवमुक्तासापालयामासतंशिशुं॥बा
देवा॥तिरागेणरूपातिशयमोहिता॥सयदायौवनाभोगभूषितोभून्महामुने॥साभिलाषातदासातिबभूवगजगामिनी॥
मायावतीददौचास्मैमायांसर्वांमहामुने॥प्रद्युम्नायानुरागंचसंन्यस्तहृदयेक्षणा॥प्रसज्जंतींतुतामाहसकार्ष्णिःकमले
क्षणेः॥मातृभावंविवाहात्वयोकिमेवंवर्त्तसेन्यथा॥साचास्मैकथयामासनपुत्रस्त्वंममेतिवै॥तनयंत्वामयंविष्णोर्हृतवान्कालशं
वरः॥क्षिप्तःसमुद्रेमत्स्यस्यसंप्राप्तोजठरान्मया॥सातुरोदितितेमाताकांताद्याप्यतिवत्सला॥पराशरउवाच॥इत्युक्तःशंबरंयुद्धे
प्रद्युम्नःसममाह्वयत्॥क्रोधाकुलीकृतमनायुयुधेसमहाबलः॥हत्वासैन्यमशेषंचतस्यदैत्यस्ययादवः॥सप्तमायाव्यतिक्रम्य
मायांसंयुयुजेष्टमीं॥तयाजघानतंदैत्यंमाययाकालशंबरं॥उत्पत्यचतयासार्द्धमाजगामपितुःपुरं॥अंतःपुरेनिपतितंमाया
वत्यासमन्वितं॥तंदृष्ट्वाकृष्णसंकल्पाबभूवुःकृष्णयोषितः॥रुक्मिणीचावदत्सेम्नासाश्रुदृष्टिरनिंदिता॥धन्यायाखल्वयं
पुत्रोवर्त्ततेनवयौवने॥अस्मिन्वयसिपुत्रोमेप्रद्युम्नोयदिजीवति॥सौभाग्यजननीवत्सत्वयाकापिविभूषिता॥अथवाया
दृशःस्नेहोममयादृग्विधस्तव॥हरेरपत्यंसुव्यक्तंभवान्वत्सभविष्यति॥श्रीपराशरउवाच॥एतस्मिन्नंतरेवत्सप्राप्तः

सहकृष्णेननारदः॥अंतःपुरचरांदेवींरुक्मिणींप्राहहर्षयन्॥एषतेतनयःसुभ्रुहत्वाशंबरमागतः॥हृतोयेनाभवद्बालोभवत्या
सूतिकागृहात्॥इयंमायावतीभार्यातनयस्यचतेसती॥शंबरस्यनभार्येयंश्रूयतामत्रकारणं॥मन्मथेतुगतेनाशंतदुद्भवपराय
णा॥शंबरंमोहयामासमायारूपेणरूपिणी॥विवाहाद्युपभोगेषुरूपंमायामयंशुभं॥दर्शयामासदैत्यस्यतस्येयंमदिरेक्षणा॥
कामोवतीर्णःपुत्रस्तेतस्येयंदयितारतिः॥विशंकानात्रकर्त्तव्यास्नुषेयंतवशोभने॥ततोहर्षसमाविष्टौरुक्मिणीकेशवौतथा॥
नगरीचसमस्तासासाधुसाध्वितिभाषत॥चिरनष्टेनपुत्रेणरुक्मिणींप्रेक्ष्यसंगतां॥अवापविस्मयंसर्वोद्वारवत्यांजनस्तदा॥
इतिश्रीविष्णुपुराणेपंचमेंशे॥२७॥ ॥छ॥श्रीपराशरउवाच॥चारुदेष्णंसुदेष्णंच चारुदेहंचवैद्विज॥सुखेणंचारुभद्रंचचारु
गुप्तंतथापरं॥चारुविंदुंसुचारुंचबलिनांबलिनंवरं॥रुक्मिण्यजनयत्पुत्रान्कन्यांचारुमतींतथा॥अन्याश्चभार्याःकृष्णस्यब
भूवुःसप्तशोभनाः॥कालिंदीमित्रवृंदाचसत्यानाग्नजितीतथा॥देवीजांबुवतीचापिरोहिणीकामरूपिणी॥मद्रराजसुताचान्या
सुशीलाशीलमंडना॥सात्राजितीसत्यभामालक्ष्मणाचारुहासिनी॥षोडशासन्सहस्राणिस्त्रीणामन्यानिचक्रिणः॥प्रद्युम्नो
पिमहावीर्योरुक्मिणस्तनयांशुभां॥स्वयंवरस्थांजग्राहसाचतंतनयंहरेः॥तस्यामस्याभवत्पुत्रोमहाबलपराक्रमः॥अनिरुद्धो
रणेह्ययोद्धावीर्योदधिररिंदमः॥तस्यापिरुक्मिणःपौत्रींवरयामासकेशवः॥दोहित्रायददौरुक्मीस्वसुतस्यसुतांतदा॥तस्या
विवाहेरामाद्याःयादवाहरिणासह॥रुक्मिणोनगरंजग्मुर्नाम्नाभोजकटंमुने॥विवाहेतत्रनिर्वृत्तेप्राद्युम्नेःसुमहात्मनः॥कलिं

कै॥गराजप्रमुखारुक्मिणंवाक्यमब्रुवन्॥अनक्षज्ञोहलीद्यूतेतथास्यव्यसनंमहत्॥नजयामोबलंकस्माद्द्यूतेनसुमहामुने॥
श्रीपराशरउवाच॥तथेतितानाहनृपान्रुक्मीबलमदान्वितः॥सभायांसहरामेणचक्रेद्यूतंचवैतदा॥सहस्रमेकंनिष्काणांरु
क्मिणाविजितोबलः॥द्वितीयेपिपणेचान्यत्सहस्रंरुक्मिणाजितः॥ततोदशसहस्राणिनिष्काणांपणमाददे॥बलभद्रोजयत्तानि
रुक्मीद्यूतविदांवरः॥ततोजहासस्वनवत्कलिंगाधिपतिर्द्विज॥दंतान्विदर्शयन्मूढोरुक्मीचाहमुदान्वितः॥अविद्योयंमयाद्यूतेबल
देवःपराजितः॥मुधैवाक्षावलेपांधोजीयतेवाक्षकोविदैः॥दृष्ट्वाकलिंगराजानंप्रकाशदशनाननं॥रुक्मिणंचापिदुर्वाक्यंकोपं
चक्रेहलायुधः॥ततःकोपपरीतात्माकोटिंकोटिंहलायुधः॥ग्लहंजग्राहरुक्मीचतदर्थेक्षानपातयत्॥अजयद्बलदेवस्तंप्रा
होच्चैस्त्वंजितोमया॥ममेतिरुक्मीप्राहोच्चैरलीकोक्तेरलंबल॥त्वयोक्तोयंग्लहःसम्यक्नमयैषोनुमोदितः॥एवंत्वयाचेद्विजि
तंनमयाविजितंकथं॥ततोंतरिक्षेवागुच्चैःप्राहगंभीरनादिनी॥बलदेवस्यतंकोपंवर्द्धयंतीमहात्मनः॥जितंबलेनधर्मेणरुक्मिणोभा
षितंमृषा॥अनुक्त्वापिवचःकिंचित्कृतंभवतिकर्मणा॥ततोबलःसमुत्थायकोपसंरक्तलोचनः॥जघानाष्टापदेनैवरुक्मि
णंसुमहाबलः॥जघानयेच्येतत्रक्षाभूभृतःकुपितोबलः॥ततोहाहाकृतंसर्वंपलायनपरंद्विज॥तद्राजमंडलंसर्वंब
भूवकुपितेबले॥बलेननिहतंश्रुत्वारुक्मिणंमधुसूदनः॥नोवाचकिंचिन्मैत्रेयरुक्मिणीबलयोर्भयात्॥ततोनिरुद्धमा
दायकृतोद्वाहोद्विजोत्तम॥द्वारकामाजगामाथद्विजचक्रंचकेशवः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२८॥ ॥छ॥ ॥

श्रीपराशरउवाच॥ द्वारवत्यांततःशौरींशक्रस्त्रिभुवनेश्वरः॥ आजगामाथमैत्रेयमत्तैरावतपृष्ठगः॥ प्रविश्यद्वारकांसोथस
मेत्यहरिणाततः॥ कथयामासदैत्यस्यनरकस्यविचेष्टितं॥ त्वयानाथेनदेवानांमानुष्येपिहितेभुना॥ त्वयितिष्ठताप्रशमंस
र्वदुःखानिनीतानिपरमेश्वर॥ चाणूरोमुष्टिकःकेशीतेसर्वेनिहतास्त्वया॥ कंसःकुवलयापीडःपूतनाबालघातिनी॥ नाशंनी
तास्त्वयासर्वेयेऽन्येकेचिदुपप्लवाः॥ युष्मद्दोर्दंडसंबुद्धिपरीतास्तेजगत्त्रये॥ यज्ञयज्ञांशसंप्राप्त्यात्तृप्तिंयांतिदिवौकसः॥ सोहं
सांप्रतमायातोयन्निमित्तंजनार्दन॥ तच्छ्रुत्वातत्प्रतीकारप्रयत्नंकर्तुमर्हसि॥ भौमोयंनरकोनामप्राग्ज्योतिषपुरेश्वरः॥ करो
तिसर्वभूतानामपकारमरिंदम॥ सुरादीनांचसिद्धानांनृपाणांचजनार्दन॥ हत्वाहिसोऽसुरःकन्यारुरोधनिजमंदिरे॥ छत्रंचस
लिलश्रावितज्जहारप्रचेतसः॥ मंदरस्यतथाशृंगंहृतवान्मणिपर्वतं॥ अमृतश्राविणीदिव्येमन्मातुःकुंडलेशुभे॥ जहारसोसु
रोदित्यावांछत्यैरावतंगजं॥ दुर्नीतमेतद्गोविंदमयातस्यतवोदितं॥ यदत्रप्रतिपत्तव्यंतत्स्वयंप्रविमृश्यतां॥ पराशरउवाच॥
इतिश्रुत्वास्मितंकृत्वाभगवान्देवकीसुतः॥ गृहीत्वावासवंहस्तेसमुत्तस्थौवरासनात्॥ संचिंत्यतमुपारुह्यगरुडंगगनेच
रं॥ सत्यभामांसमारोप्यययौप्राग्ज्योतिषंपुरं॥ आरुह्यैरावतंनागंशक्रोपित्रिदशालयं॥ ततोजगाममैत्रेयपश्यतांद्वारकौ
कसां॥ प्राग्ज्योतिषपुरस्यासीत्समंताच्छतयोजनात्॥ आवितामौरवैःपाशैःक्षुरांतैर्भूर्द्विजोत्तम॥ तांश्चिक्षेपहरिःपाशान्क्षि
प्त्वाचक्रंसुदर्शनं॥ ततोमुरःसमुत्तस्थौतंजघानचकेशवः॥ मुरोस्तुतनयान्सप्तसहस्राणिततोहरिः॥ चक्रधाराग्निनिर्दग्धान्

चकारशलभानिव॥ हत्वामुरंहयग्रीवंतथापंचजनंद्विज॥ प्राग्ज्योतिषपुरंचैवत्वरयासमुपाव्रजेत्॥ नरकेनास्यतत्राभून्महासैन्येन
संयुगं॥ कृष्णस्ययत्रगोविंदोजघ्नेदैत्यान्सहस्रशः॥ शस्त्रास्त्रवर्षंमुंचंतंभौमंतंनरकंबली॥ क्षिप्त्वाचक्रंद्विधाचक्रेचक्रीदैतेयचक्र
हा॥ हतेतुनरकेभूमिर्गृहीत्वादितिकुंडले॥ उपतस्थेजगन्नाथंवाक्यंचेदमथाब्रवीत्॥ यदाहमुद्धृतानाथत्वयासूकरमूर्तिना॥
त्वस्पर्शसंभवांपुमैत्रस्तवायंमेव्यजायत॥ सोयंत्वयैवदत्तोमेत्वयैवविनिपातितः॥ गृहाणकुंडलेचेमेपालयास्यचसंततिं॥ भा
रावतारणार्थायममैवभगवानिमं॥ अंशेनलोकमायातःप्रसादसुमुखःप्रभो॥ त्वंकर्ताचविकर्ताचसंहर्ताप्रभवोव्ययः॥ यततो
तत्वरूपश्चस्तूयतेच्युतकिंतव॥ व्यापीव्याप्यःक्रियाकर्ताकार्यंचभगवान्यदा॥ सर्वभूतात्मभूतस्यस्तूयतेतवकिंतदा॥ परमा
त्मात्वमात्माचभूतात्माचाव्ययोभवान्॥ यदातदास्तुतिर्नाथकिमर्थातेप्रवर्तते॥ प्रसीदसर्वभूतात्मन्नरकेणकृतंहियत्॥ तत्क्ष
म्यतामदोषायत्वत्सुतायजगत्पते॥ श्रीपराशरउवाच॥ तथेत्युक्त्वाचधरणींभगवान्भूतभावनः॥ रत्नानिनरकावासाज्जग्राह
मुनिसत्तम॥ कन्यापुरेसकन्यानांषोडशातुलविक्रमः॥ शताधिकानिददृशेसहस्राणिमहामुने॥ चतुर्दंतान्गजांश्चान्यान्षट्
सहस्राणिदृष्टवान्॥ कांबोजानांतथाश्वानांनियुतान्येकविंशति॥ ताःकन्यास्तथानागांस्तानश्वांस्तान्द्वारकांपुरीं॥ प्रापयामास
गोविंदःसद्योनरककिंकरैः॥ ददृशेवारुणंछत्रंतथैवमणिपर्वतं॥ आरोपयामासहरिःगरुडेपतगेश्वरे॥ आरुह्यचस्वयंकृष्णः
सत्यभामासहायवान्॥ अदित्याःकुंडलेदातुंजगामत्रिदशालयं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥२९॥ ॥पराशरउवाच॥ ॥

वि॰पु॰
३१

गरुडोवारुणंछत्रंतथैवमणिपर्वतं॥सभार्यंचहृषीकेशंलीलयेववहन्ययौ॥ततःशंखमुपाध्मासीत्स्वर्गद्वारगतोहरिः॥उपतस्थु
स्तदादेवाःसार्घपात्राजनार्दनं॥सदेवैरर्चितःकृष्णोदेवमातुर्निवेशनं॥सिताभ्रशिखराकारंप्रविश्यददृशेदितिं॥सतांप्रणम्यश
क्रेणसहतेकुंडलोत्तमे॥ददौनरकनाशंचशशंसास्यैजनार्दनः॥ततःप्रीताजगन्माताधातारंजगतांहरिं॥तुष्टावादितिरव्यग्राकृ
त्वातत्प्रवणंमनः॥अदितिरुवाच॥नमस्तेपुंडरीकाक्षभक्तानामभयंकर॥सनातनात्मन्सर्वात्मन्भूतात्मन्भूतभावन॥प्रणेतामन
सोबुद्धेरिंद्रियाणांगुणात्मक॥त्रिगुणातीतनिर्द्वंद्वशुद्धःसर्वहृदिस्थितः॥सितदीर्घादिनिःशेषकल्पनापरिवर्जितः॥जन्मादिभिर
संस्पृष्टःस्वप्नादिपरिवर्जितः॥संध्यारात्रिरहोभूमिर्गगनंवायुरंबुच॥हुताशनोमनोबुद्धिर्भूतादिस्त्वंतथाच्युत॥सृष्टिस्थितिवि
नाशानांकर्त्ताकर्तृपतिर्भवान्॥ब्रह्मविष्णुशिवाख्याभिरात्ममूर्तिभिरीश्वरः॥देवायक्षास्तथादैत्याराक्षसाःसिद्धपन्नगाः॥कूष्मां
डाश्चपिशाचाश्चगंधर्वामनुजास्तथा॥मेध्याःपशवोमृगमातंगास्तथैवचसरीसृपाः॥वृक्षगुल्मलतावल्ल्यःसमस्तास्तृणजातयः॥
स्थूलसूक्ष्मास्तथामध्याःसूक्ष्मसूक्ष्मतराश्चये॥देहभेदाभवान्सर्वेयेकेचित्पुद्गलाश्रयाः॥मायातवेयमज्ञातपरमार्थातिमोहिनी॥
अनात्मन्यात्मविज्ञानंययामूढोनिरुध्यति॥अहंममेतिभावोत्रयत्पुंसामभिजायते॥संसारमातुर्मायायास्तवैतन्नाथचेष्टितं॥
यैःस्वधर्मपरैर्नाथनरैराराधितोभवान्॥तेतरन्त्यखिलामेतांमायामात्मविमुक्तये॥ब्रह्माद्याःसकलादेवामनुष्याःपशवस्तथा॥ पंच॰
विष्णुमायामहावर्त्तमोहांधतमसावृताः॥आराध्यत्वामभीप्संतिकामानात्मभवक्षयं॥यदेतेपुरुषामायासैवेयंभगवंस्तव॥मया ३१

त्वंपुत्रकामिन्यावैरिपक्षक्षयायच॥आराधितोनमोक्षायमायाविलसितंहितत्॥कौपीनाच्छादनप्रायावांछाकल्पद्रुमादपि॥
जायतेयदपुण्यानांसोपराधःस्वदोषजः॥तत्प्रसीदाखिलजगन्मयामोहकराच्युत॥अज्ञानंज्ञानसद्भावभूतभूतेशनाशय॥न
मस्तेचक्रहस्तायशार्ङ्गहस्तायतेनमः॥गदाहस्तायतेविष्णोशंखहस्तायतेनमः॥एतत्पश्यामितेरूपंस्थूलचिह्नोपलक्षितं॥नजा
नामिपरंयत्तेप्रसीदपरमेश्वर॥श्रीपराशरउवाच॥अदित्यैवंस्तुतोविष्णुःप्रहस्याहमुदादितिं॥मातादेवित्वमस्माकंप्रसीदवरदा
भव॥अदितिरुवाच॥एवमस्तुयथेच्छातेत्वमशेषैःसुरासुरैः॥अजेयःपुरुषव्याघ्रमर्त्यलोकेभविष्यति॥ततोनंतरमेवास्यश
क्राणीसहितादितिं॥सत्यभामाप्रणम्याहप्रसीदेतिपुनःपुनः॥अदितिरुवाच॥मत्प्रसादान्नतेसुभ्रुजरावैरूप्यमेववा॥भविष्य
त्यनवद्यांगीसर्वःकामोभविष्यति॥श्रीपराशरउवाच॥अदित्यातुकृतानुज्ञोदेवराजोजनार्दनं॥यथावत्पूजयामासप्रणिपात
पुरःसरं॥ततोददर्शकृष्णोपिसत्यभामासहायवान्॥देवोद्यानानिहृद्यानिनंदनादीनिसत्तम॥ददर्शचसुगंधाढ्यंमंजरीपुंजधारि
णं॥सत्याल्हादकरंताम्रबालपल्लवशोभितं॥मथ्यमानेमृतेजातंजातरूपसमत्वचं॥पारिजातंजगन्नाथःकेशवःकेशिसूद
नः॥तंदृष्ट्वाप्राहगोविंदंसत्यभामाद्विजोत्तम॥कस्मान्नद्वारकामेषनीयतेकृष्णपादपः॥यदितत्त्वद्वचःसत्यंसत्यात्यंतंप्रियेतिच॥म
द्गेहनिष्कुटार्थायतदयंनीयतांतरुः॥नमेजांबवतीतादृगभीष्टानचरुक्मिणी॥सत्येयथात्वमित्युक्तंत्वयाकृष्णासकृत्प्रियं॥
सत्येयथात्वमित्युक्तंसत्यंतद्यदिगोविंदनोपचारकृतंमम॥तदस्तुपारिजातोयंममगेहविभूषणं॥बिभ्रतीपारिजातस्यके

शपक्षेणमंजरी॥सपत्नीनांसदामध्येशोभयेयमितिकामये॥श्रीपराशरउवाच॥इत्युक्तःसंप्रहस्यैनंपारिजातंगरुत्मति॥आ
रोपयामासहरिस्तमूचुर्वनरक्षिणः॥हेशचीदेवराजस्यमहिषीतत्परिग्रहे॥पारिजातंनगोविंदहर्तुमर्हसिपादपं॥शचीवि
भूषणार्थायदेवैरमृतमंथने॥उत्पादितोनक्षेमेनगृहीत्वैनंगमिष्यसि॥देवराजोमुखप्रेक्ष्योयस्यास्तस्याःपरिग्रहः॥मौढ्या
त्प्रार्थयसेक्षेमीगृहीत्वैनंतुकोव्रजेत्॥अवश्यमस्यदेवेंद्रोनिःकृतितत्रयास्यति॥वज्रोदितकरंशक्रमनुयास्यतिचामराः॥तद
लंसकलैर्देवैर्विग्रहेणतवाच्युत॥विपाककटुयत्कर्मतन्नशंसंतिपंडिताः॥इत्युक्तेतैरुवाचैतान्सत्यभामातिकोपिना॥काश
चीपारिजातस्यकोवाशक्रःसुराधिपः॥सामान्यःसर्वलोकानांयद्येकोमृतमंथने॥समुत्पन्नःपुराकस्मादेकोगृह्णातिवासवः॥यथा
सुरायथैवेंदुर्यथाश्रीर्वनरक्षणः॥सामान्यःसर्वलोकस्यपारिजातस्तथाद्रुमः॥भर्तृबाहुमहागर्वःरुणद्ध्येनंयथाशची॥तत्कथ्य
तामलंक्षांत्यासत्याहारयतिद्रुमं॥कथ्यतांचद्रुतंगत्वापौलोम्यावचनंमम॥सत्यभामावदत्येतदतिगर्वोद्धुताक्षरं॥यदितंदयिताभ
र्तुर्यदिवश्यःपतिस्तव॥मद्भर्तुर्हरतोवृक्षंतत्कारयनिवारणं॥जानामितेपतिंशक्रंजानामित्रिदशेश्वरं॥पारिजातंतथाप्येनंमानु
षीहारयामिते॥इत्युक्तारक्षिणोगत्वाशच्याऊचुर्यथोदितं॥शचीचोत्साहयामासश्रुतार्थंत्रिदशाधिपं॥ततःसमस्तदेवानांसैन्यैः
परिवृतोहरिं॥प्रययौपारिजातार्थमिंद्रोयोधयितुंद्विज॥ततोपरिघनिस्त्रिंशगदाशूलधृतायुधाः॥बभूवुस्त्रिदशाःसर्वेश
क्रेवज्रधरेस्थिते॥ततोनिरीक्ष्यगोविंदोनागराजोपरिस्थितं॥ततोदिशोनभश्चैव(व)शक्रदेवपरीवारंयुद्धायसमुपस्थितं॥

चकारशंखनिर्घोषंदिशःशब्देनपूरयन्॥मुमोचचशरव्रातंसहस्रायुतसंमितं॥ततोदिशोनभश्चैवदृष्ट्वाशरशतान्वितं॥मुमु
चुस्त्रिदशाःसर्वेस्वास्त्रशस्त्राण्यनेकशः॥एकैकशोमस्त्रंशस्त्रंचदेवैर्मुक्तंसहस्रधा॥चिच्छेदलीलयैवेशोजगतांमधुसूदनः॥
पाशंसलिलराजस्यसमाकृष्योरगाशनः॥चकारखंडशश्चंच्वाबालपन्नगदेहवत्॥यमेनप्रहितंदंडंगदाविक्षेपताडितं॥पृ
थिव्यांपातयामासभगवान्देवकीसुतः॥शिबिकांचधनेशस्यचक्रेणतिलशोभुवि॥चकारशौरिरर्कंचदृष्टिदृष्टहतौजसं॥नी
तोग्निःशतधाबाणैर्द्राविताबसवोदिशः॥चक्रविच्छिन्नशूलाग्रारुद्राभुविनिपातिताः॥साध्याविश्वेथमरुतोगंधर्वाश्चैवकिन्नराः॥
शार्ङ्गस्यप्रेरितैरस्त्रैर्व्योम्निशाल्मलितूलवत्॥गरुत्मानपिचक्रेणपक्षाभ्यांनखरांकुरैः॥भक्षयंस्ताडयन्देवान्दारयंश्चच
चारवै॥ततःशरसहस्रेणदेवेंद्रमधुसूदनौ॥परस्परंववर्षातेधाराभिरिवतोयदौ॥ऐरावतोनयुयुधेगरुडस्तत्रसंकुले॥
देवैःसमस्तैर्युयुधेचक्रेणचजनार्दनः॥छिन्नेष्वशेषबाणेषुशस्त्रेष्वस्त्रेषुचचरन्॥जग्राहवासवोवज्रंकृष्णश्चक्रंसुदर्श
नं॥ततोहाहाकृतंसर्वंत्रैलोक्यंद्विजसत्तम॥चक्रवज्रधरौदृष्ट्वादेवराजजनार्दनौ॥क्षिप्तंवज्रमथेंद्रेणजग्राहसभगवान्हरिः॥
नमुमोचतदाचक्रंतिष्ठतिष्ठेतिचाब्रवीत्॥प्रनष्टवज्रंदेवेंद्रंगरुडक्षतवाहनं॥सत्यभामाब्रवीद्धास्यंपलायनपरायणं॥त्रैलो
क्येश्वरनोयुक्तंशचीभर्तुःपलायनं॥पारिजातस्रगाभोगात्वामुपस्थास्यतेशची॥कीदृशंदेवराज्यंतेपारिजातस्रगुज्ज्वलां॥
अपश्यतोयथापूर्वंप्रणयाभ्यागतांशची॥अलंशक्रप्रियातेननव्रीडांकर्तुमर्हसि॥नीयतांपारिजातोयंदेवाःसंतुगतव्यथाः॥
पतिगर्वावलेपेनबहुमानपुरःसरं॥नददर्शगृहायातामुपचारेणमांशची॥स्त्रीत्वादगुरुचित्ताहंस्वभर्तृश्लाघनापरा॥अ

तःकृतवतीशक्रभवतासहविग्रहं॥ तदलंपरितापेनपरस्वेनाहतेननः॥ रूपेणगर्वितासातुभर्त्राकास्त्रीनगर्विता॥ श्रीपराश
रउवाच॥ इत्युक्तोवैनिववृतेदेवराजस्तदाद्विज॥ प्राहचैनामलंचंडिसखिखेदातिविस्तरैः॥ नचापिसर्गसंहारस्थितिकर्त्ताखि
लस्ययः॥ जितस्यतेनमेव्रीडाजायतेविश्वरूपिणा॥ यस्मिन्जगत्सकलमेतदनादिमध्ययस्माद्यतश्चनभविष्यतिसर्वभूत॥ ते
नोद्भवप्रलयपालनकारणेनव्रीडाकथंभवतिदेविनिराकृतस्य॥ सकलभुवनसूतेर्मूर्तिरल्पाणुसूक्ष्माविदितसकलवेदै
र्ज्ञायतेयस्यनाद्यैः॥ तमजमकृतमीशंशाश्वतंस्वेच्छयैनंजगदुपकृतिमर्त्यंकोविजेतुंसमर्थः॥ ॥इतिश्रीविष्णुपुराणेपंच
मेंशे॥३०॥ ॥श्रीपराशरउवाच॥ संस्तुतोभगवानित्थंदेवराजेनकेशवः॥ प्रहस्यभावगंभीरमुवाचेदंद्विजोत्तम॥ देवराजोभ
वानिंद्रोवयंमर्त्याजगत्पते॥ क्षंतव्यंभवताचैतदपराधकृतंमम॥ पारिजाततरुश्चायंनीयतामुचितास्पदं॥ गृहीतोयंमयाश
क्रसत्यावचनकारणात्॥ वज्रंचेदंगृहाणत्वंयदत्रप्रहितंत्वया॥ तवैवैतत्प्रहरणंशक्रवैरिविनाशनं॥ इंद्रउवाच॥ विमोह
यसिमामीशमर्त्योहमितिकिंवदन्॥ जानीमस्त्वांभगवतोनतुसूक्ष्मविदोवयं॥ योसियोसिजगत्त्राणप्रवृत्तोनाथसंस्थि
तः॥ जगतःशल्यनिःकर्षंकरोषिसुरसूदन॥ नीयतांपारिजातोयंकृष्णद्वारवतींपुरीं॥ मर्त्यलोकेत्वयामुक्तेनायंसंस्थास्य
तेभुवि॥ आगमिष्यतिदेवेशस्वयमेवत्रिविष्टपं॥ श्रीपराशरउवाच॥ तथेत्युक्त्वाचदेवेंद्रमाजगामभुवंहरिः॥ समस्तसु
रगंधर्वैःस्तूयमानस्तथार्षिभिः॥ ततःशंखमुपाध्मायद्वारकामुपरिस्थितः॥ हर्षमुत्पादयामासद्वारकावासिनांद्विज॥ अव

तीर्याथगरुडात्सत्यभामासहायवान्॥ निष्कुटेस्थापयामासपारिजातंमहातरुं॥ यमभ्येत्यजनःसर्वोजातिंस्मरतिपौर्विकीं॥ वास्यतेय
स्यपुष्पोत्थगंधेनोर्वीत्रियोजनं॥ ततस्तेयादवाःसर्वेदेहबंधानमानुषान्॥ ददृशुःपादपेतस्मिन्कुर्वंतोमुखदर्शनं॥ किंकरैःस
मुपानीतंहस्त्यश्वादिततोधनं॥ स्त्रियश्चकृष्णोजगृहेनरकस्यपरिग्रहात्॥ ततःकालेशुभेप्राप्तेउपयेमेजनार्दनः॥ ताःकन्यानर
केणासन्सर्वतोयाःसमाहृताः॥ एकेनैवतुगोविंदःकालेनासांमहामुने॥ जग्राहविधिवत्पाणींपृथक्धर्मतः॥ षोडशस्त्रीसहस्रा देहेषु
णिशतमेकंततोधिकं॥ तावंतिचक्रेरूपाणिभगवान्मधुसूदनः॥ एकैकशश्चताःकन्यामेनिरेमधुसूदनं॥ ममैवपाणिग्रहणंमैत्रेय
कृतवानिति॥ निशासुचजगत्स्रष्टातासांगेहेषुकेशवः॥ उवासविप्रसर्वासांविश्वरूपधरोहरिः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥
॥३१॥ ॥श्रीपराशरउवाच॥ प्रद्युम्नाद्याहरेःपुत्रारुक्मिण्याःकथितास्तव॥ स्वभानुप्रभृतिंश्चैवसत्यभामाव्यजायत॥ दीप्ति
मत्ताम्रपात्राद्यारोहिण्यांतनयाहरेः॥ बभूवुर्जांबवत्यांचसांबाद्याबाहुशालिनः॥ तनयाभद्रविंदाद्यानाग्निजित्यांमहाबलाः॥ संग्रा
मजित्प्रधानास्तुशैब्यायामभवन्सुताः॥ वृकाद्यास्तुसुतामाद्र्यांगात्रवत्प्रमुखान्सुतान्॥ अवापलक्ष्मणापुत्रान्कालिंद्यास्तुश्रु
तादयः॥ अन्यासांचैवभार्याणांसमुत्पन्नानिचक्रिणः॥ अष्टायुतानिपुत्राणांसहस्राणांशतंतथा॥ प्रद्युम्नःप्रथमस्तेषांसर्वेषांरु
क्मिणीसुतः॥ प्रद्युम्नादनिरुद्धोभूद्वज्रस्तस्मादजायत॥ अनिरुद्धोरणेरुद्धोबलेःपौत्रींमहाबलः॥ बाणस्यतनयामूषामुपयेमे
द्विजोत्तम॥ अत्रयुद्धमभूद्घोरंहरिशंकरयोर्महान्॥ छिन्नंसहस्रंबाहूनांयत्रबाणस्यचक्रिणा॥ मैत्रेयउवाच॥ कथंयुद्धमभूद्ब्र

वि॰पु॰
३४

न्तुषार्थेहरकृष्णयोः॥ कथंक्षयंचबाहूनांबाणस्यकृतवान्हरिः॥ एतत्सर्वंमहाभागममाख्यातुमर्हसि॥ महत्कौतूहलंजातंकथांश्रो
तुमिमांहरेः॥ श्रीपराशरउवाच॥ उषाबाणसुताविप्रपार्वतींसहशंभुना॥ क्रीडंतिमुपलक्ष्योच्चैःस्पृहांचक्रेतदाश्रयां॥ ततःसकल
चित्तज्ञागौरीतामाहभामिनीं॥ अलमत्यर्थतापेनभर्त्रात्वमपिरंस्यसे॥ इत्युक्तेसातदाचक्रेकदेतिमितिमात्मनः॥ कोवाभर्त्ताममेत्येनांपु
नरप्याहपार्वती॥ वैशाखशुक्लद्वादश्यांस्वप्नेयोभिभवंतव॥ करिष्यतिसतेभर्त्ताराजपुत्रीभविष्यति॥ श्रीपराशरउवाच॥ यस्यांतिथौ
पुमान्स्वप्नेयथादेव्यातदीरितं॥ तथैवाभिभवंचक्रेरागंचक्रेचतत्रसा॥ ततःप्रबुद्धापुरुषमपश्यंतीतमुत्सुका॥ क्वगतोसीतिनिर्लज्ज
मैत्रेयोक्तवतीसखीं॥ बाणस्यमंत्रीकुंभांडश्चित्रलेखाचतत्सुता॥ तस्याःसख्यभवत्साथप्राहकोयंत्वयोच्यते॥ यदालज्जाकुला
नास्यैकथयामाससासखी॥ तदाविश्वासमानीयसर्वमेवाभ्यवेदयत्॥ विदितार्थांतुतामाहपुनःपूषायथोदितं॥ देव्यातथैवतत्प्राप्तौ
योभ्युपायःकुरुष्वतं॥ श्रीपराशरउवा॥ ततःपाटेसुरान्देत्यान्गंधर्वांश्चप्रधानतः॥ मनुष्यांश्चापिविख्यातांश्चित्रलेखाव्यदर्शयत्॥
अपास्यसातुगंधर्वांस्तथोरगसुरासुरान्॥ मनुष्येषुददौदृष्टिंतेष्वपंधकवृष्णिषु॥ कृष्णरामौविलोक्यासीत्सुभ्रुर्व्रीडाजडेवसा॥ प्रद्यु
म्नदर्शनेव्रीडादृष्टिंनिन्येन्यतोद्विज॥ दृष्टमात्रेततःकांतेप्रद्युम्नतनयेद्विज॥ दृष्ट्वात्यर्थविकाशिन्यालज्जाक्वापिनिराकृता॥ सोयंसोय
मितीत्युक्तेतयासायोगगामिनी॥ ययौद्वारवतीमूषांसमाश्वास्यततःसखी॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥३२॥ ॥श्रीपरा
शरउवाच॥ बाणोपिप्रणिपत्याग्रेमैत्रेयाहत्रिलोचनं॥ देवबाहुसहस्रेणनिर्विण्णोहंविनाहवं॥ कश्चिन्ममैषबाहूनांसफल्यजनको

पंच॰
३२
२४

रणः॥ भविष्यतिविनायुद्धंभारायममकिंभुजैः॥ रुद्रउवाच॥ मयूरध्वजभंगस्तेयदाबाणभविष्यति॥ पिशिताशिजनानंदंप्राप्स्यसेत्वं
तदारणं॥ ततःप्रणम्यमुदितःशंभुमभ्यागतोगृहान्॥ भग्नंतंध्वजमालोक्यहृष्टोहर्षांतरंययौ॥ एतस्मिन्नेवकालेतुयोगमायाबले
नते॥ अनिरुद्धमथानिन्येचित्रलेखावराप्सरा॥ कन्यांतःपुरमध्येरममाणंसहोषया॥ विज्ञायरक्षिणोगत्वाशशंसुर्दैत्यभूपतेः॥ व्या
दिष्टंकिंकरणांतुसैन्यंतेनमहात्मना॥ जघानपरिघंलोहमादायपरवीरहा॥ हतेषुतेषुबाणोपिरथस्थस्तद्वधोद्यतः॥ युद्धमानोयथा
शक्तियदावीरेणनिर्जितः॥ मायययुयुधेतेनसतदामंत्रिनोदितः॥ ततश्चपन्नगास्त्रेणबबंधयदुनंदनं॥ द्वारवत्यांक्वयातोसावनिरुद्धे
तिजल्पतां॥ यदूनामाचचक्षेतंबद्धंबाणेननारदः॥ तंशोणितपुरेश्रुत्वानीतंविद्याविदग्धया॥ योषिताप्रत्ययंजग्मुर्यादवानामरे
रिति॥ ततोगरुडमारुह्यस्मृतमात्रागतंहरिः॥ बलप्रद्युम्नसहितोबाणस्यप्रययौपुरीं॥ पुरीप्रवेशेप्रमथैर्युद्धमासीन्महात्मनः॥
ययौबाणपुराभ्यासंनीतांस्तान्संक्षयंहरिः॥ ततस्त्रिपादस्त्रिशिराज्वरोमाहेश्वरोमहान्॥ बाणरक्षार्थमत्यर्थंयुयुधेशार्ङ्गधन्व
ना॥ तद्भस्मस्पर्शसंभूततापःकृष्णांगसंगमात्॥ अवापबलदेवोपिश्रममामीलितेक्षणः॥ ततस्तुयुध्यमानस्तुसहदेवेनचक्रिणा॥
वैष्णवेनज्वरेणाशुकृष्णदेहान्निराकृतः॥ नारायणभुजाघातपरिपीडनविह्वलं॥ तंवीक्ष्यक्षम्यतामस्येत्याहदेवःपितामहः॥ ततश्चक्षां
तमेवेतिप्रोक्त्वातंवैष्णवंज्वरं॥ आत्मन्येवलयंनिन्येभगवान्मधुसूदनः॥ त्रिपाद्भस्मप्रहरणस्त्रिशिरारक्तलोचनः॥ समेप्रीतःसु
भंदद्यात्सर्वामयपतिर्ज्वरः॥ ततोग्नीन्भगवानाजौजित्वानीत्वाक्षयंतथा॥ दानवानांबलंविष्णुश्चूर्णयामासलीलया॥ ततःसम

स्तसैन्येनदैतेयानांबलेःसुतः।।युयुधेशंकरश्चैवकार्त्तिकेयश्चशौरिणा।।हरिःशंकरयोर्युद्धमतीवासीत्सुदारुणं।।चुक्षुभुःसकलालो
काःशस्त्रास्त्रैश्चप्रतापिताः।।प्रलयोयमशेषस्यजगतोनूनमागतः।।मेनिरेत्रिदशाःसर्वेवर्त्तमानेमहाहवे।।जृंभणास्त्रेणगोविं
दोजृंभयामासशंकरं।।ततःप्रणेशुर्दैतेयाःप्रमथाश्चसमंततः।।जृंभाभिभूतस्तुहरोरथोपस्थउपाविशत्।।नशशाकततोयोद्धुं
कृष्णेनाक्लिष्टकर्मणा।।गरुडक्षतबाहुश्चप्रद्युम्नास्त्रनिपीडितः।।कृष्णहुंकारनिर्धूतशक्तिश्चप्रययौगुहः।।जृंभितेशंकरेनष्टेदैत्य
सैन्येगुहेजिते।।नीतेप्रमथसैन्येचसंक्षयंशार्ङ्गधन्विना।।नंदीशसंगृहीताश्वमधिरूढोमहारथं।।बाणस्तदाययौयोद्धुंकृष्णंसर्वै
बलैःसह।।बलभद्रोमहावीर्योबाणसैन्यमनेकधा।।विव्याधबाणैःप्रभ्रस्यधर्मतश्चापलायितं।।आकृष्यलांगलाग्रेणमुशले
नात्रपातितं।।बलंबलेनददृशेबाणोबाणैश्चचक्रिणा।।ततःकृष्णस्यबाणस्ययुद्धमासीत्समस्यतोः।।परस्परमिषून्दीप्तान्का
यत्राणविभेदिनः।।कृष्णश्चिच्छेदबाणांस्तान्बाणस्तुसहितान्शरान्।।विव्याधकेशवंबाणोबाणंबाणैश्चचक्रभृत्।।मुमोचा
नेतथास्त्राणिबाणकृष्णौजिगीषया।।परस्परक्षतिपरौपरमाण्यनिशंद्विज।।छिद्यमानेष्वशेषेषुशरेष्वस्त्रेचसीदति।।प्राचुर्येणहरि
र्बाणंचक्रेततोमनः।।ततार्कशतसंकाशंभूततेजसःसदृशद्युतिः।।जग्राहदैत्यचक्रारिर्हरिश्चक्रंसुदर्शनं।।मुंचतोबाणनाशायतच्च
क्रंमधुविद्विषः।।नग्नादैतेयविद्याभूत्कोटवीपुरतोहरेः।।तामग्रतोहरिर्दृष्ट्वामीलिताक्षःसुदर्शनं।।मुमोचबाणमुद्दिश्यछेत्तुंबाहुवनं
रिपोः।।क्रमेणतत्तुबाहूनांबाणस्याच्युतनोदितं।।छेदंचक्रेसुरापास्तशस्त्रौघक्षपणादृतं।।छिन्नेबाहुवनेतत्तुकरस्थंमधुसूदनः।।मुमु

क्षुर्बाणनाशायविज्ञातस्त्रिपुरद्विषा।।उपेत्याहचगोविंदंसामपूर्वमुमापतिः।।विलोक्यबाणंदोर्दंडछेदासृक्स्राववर्षिणं।।रुद्रउ
वाच।।कृष्णकृष्णजगन्नाथजानेत्वांपुरुषोत्तम।।परेशंपरमात्मानमनादिनिधनंपरं।।देवतिर्यग्मनुष्येषुशरीरग्रहणात्मिका।
लीलेयंसर्वभूतस्यतवचेष्टोपलक्षणा।।तत्प्रसीदाभयंदत्तंबाणस्यास्यमयाप्रभो।।तत्त्वयानानृतंकार्यंयन्मयाव्याहृतंवचः।।
अत्संस्मेश्रयबद्धोयमपराधस्तवाव्यय।।मयादत्तवरोदैत्यस्ततस्त्वांक्षामयाम्यहं।।पराशरउवाच।।इत्युक्तःप्राहगोविंदःशू
लपाणिमुमापतिं।।प्रसन्नवदनोभूत्वागतामर्षोसुरंप्रति।।श्रीभगवानुवाच।।युष्मद्दत्तवरोबाणोजीवतामेषशंकरः।।त्वद्वाक्य
गौरवादेतन्मयाचक्रंनिवारितं।।त्वयायदभयंदत्तंतद्दत्तमखिलंमया।।मत्तोविभिन्नमात्मानंद्रष्टुंनार्हसिशंकर।।योयंमत्तंजग
च्चेदंसदेवासुरमानुषं।।अविद्यामोहितात्मानःपुरुषाभिन्नदर्शिनः।।इत्युक्त्वाप्ययौकृष्णःप्राद्युम्निर्यत्रतिष्ठति।।तद्बंधफणि
नोनेशुर्गरुडानिलपोथिताः।।ततोनिरुद्धमारोप्यसपत्नीकंगरुत्मति।।आजग्मुर्द्वारकांरामकार्ष्णिदामोदराःपुरीं।। ।।इतिश्री
विष्णुपुराणेपंचमेंशे।।३३।।मैत्रेयउवाच।।चक्रेकर्ममहत्शौरिर्बिभ्राणोमानुषींतनुं।।जिगायशक्रंशर्वंचसर्वदेवांश्चलीलया।।
यच्चान्यदकरोत्कर्मदिव्यचेष्टाविघातवित्।।तत्कथ्यतांमहाभागपरंकौतूहलंमम।।पराशरउवाच।।गदतोममविप्रर्षेश्रू
यतामिदमादरात्।।नरावतारेकृष्णेनदग्धावाराणसीयथा।।पौंड्रकोवासुदेवस्तुवासुदेवोभवद्विभुः।।भुवि।।अवतीर्णइ
तीत्युक्तोजनैरज्ञानमोहितैः।।समेनेवासुदेवोहमवतीर्णोमहीतले।।नष्टस्मृतिःततःसर्वंविष्णुचिन्हमचीकरत्।।दूतंचपौ

षयामासकृष्णायासुमहात्मने॥त्यक्त्वाचक्रादिकंचिन्हंमदीयेनामचात्मनः॥वासुदेवात्मकंमूढत्यक्त्वासर्वमशेषतः॥आत्मनो
जीवितार्थायततोमेप्रणितंव्रज॥इत्युक्तःसप्रहस्यैनंदूतंप्राहजगत्पतिः॥निजचक्रमहंचिन्हंसमुत्स्रक्ष्येत्वयीतिवै॥वाच्यश्च
पौंड्रकोगत्वात्वयादूतवचोमम॥ज्ञातस्त्वद्वाक्यसद्भावोयत्कार्यंतद्वितीयतां॥गृहीतचक्रएवाहमागमिष्यामितेपुरीं॥उत्स्रक्ष्या
मिचतेचक्रंनिजचिन्हमसंशयं॥आज्ञापूर्वंचयदिदमागच्छेतित्वयोदितं॥संपादयिष्येतच्छ्वस्त्वंतदप्येषोविलंबितं॥शरणंतेस
मभ्येत्यकर्त्तास्मिन्नृपतेतथा॥यथात्वत्तोममेभूयोभयंकिंचिद्भविष्यति॥पराशरउवाच॥इत्युक्तेपगतेदूतेसंस्मृतोपगतंह
रिः॥गरुत्मंतमथारुह्यत्वरितस्तत्पुरंययौ॥सचापिकेशवोद्योगंश्रुत्वाकाशिपतिस्तदा॥सर्वसैन्यपरीवारःपार्ष्णिग्राहउपा
ययौ॥ततोबलेनमहताकाशिराजबलेनच॥पौंड्रकोवासुदेवोसौकेशवाभिमुखंययौ॥तंददर्शहरिर्दूरादुदारस्यंदनेस्थि
तं॥चक्रंहस्तगदाशार्ङ्गबाहुंपाणिगतांबुजं॥स्रग्धरंकृतशोभाढ्यंसुपर्णरचितध्वजं॥वक्षस्थलेकृतेचास्याश्रीवत्संदद
र्शहरिः॥किरीटकुंडलधरंपीतवाससमुच्छ्रितं॥दृष्ट्वातंभावगंभीरंजहासगरुडध्वजः॥युयुधेचबलेनास्यहस्त्यश्वबलि
नाद्विज॥निस्त्रिंशर्ष्टिगदाशूलशक्तिकार्मुकशालिना॥क्षणेनशार्ङ्गनिर्मुक्तैःशरैररिविदारणैः॥गदाचक्रनिपातैश्चसूदयामा
सतद्बलं॥काशिराजबलंचैवक्षयंनीत्वाजनार्दनः॥उवाचपौंड्रकंमूढमात्मचिन्होपलक्षणं॥श्रीकृष्णउवाच॥पौंड्रकोक्तंत्व
यायत्तदूतवक्रेणमांप्रति॥समुत्सृजेतिचिन्हानितत्तेसंपादयाम्यहं॥चक्रमेतत्सृष्टंगदेयंतेविसर्जिता॥गरुत्मानेषनिर्दिष्टःसमा

रोहतुतेध्वजं॥इत्युच्चार्यविमुक्तेनचक्रेणासौविदारितः॥पोथितोगदयाभग्नोगरुत्मांश्चगरुत्मता॥ततोहाहाकृतेलोकेकाशीनामधिपो
बली॥युयुधेवासुदेवेनमित्रस्यापचितौस्थितः॥ततःशार्ङ्गधनुर्मुक्तैश्छित्वातस्यशरैःशिरः॥काशिपुर्यांसचिक्षेपकुर्वन्लोकस्यविस्म
यं॥हत्वातंपौंड्रकंशौरिःकाशिराजंचसानुगं॥पुनर्द्वारवतींप्राप्तोरेमेस्वर्गगतोयथा॥तच्छिरःपतितंदृष्ट्वातत्रकाशिपतेःपुरे॥जनःकि
मेतदित्याहकेनेत्यसंतविस्मितः॥ज्ञात्वातंवासुदेवेनहतंतस्यसुतंस्ततः॥पुरोहितेनसहितस्तोषयामासशंकरं॥अविमुक्तेमहाक्षे
त्रेतोषितस्तेनशंकरः॥वरंवृणीष्वेतितदातंप्रोवाचनृपात्मजः॥सवव्रेभगवान्कृत्यापितृहंतुर्वधायवै॥समुत्तिष्ठतुकृष्णस्यत्व
त्प्रसादान्महेश्वर॥एवंभविष्यतीत्युक्तेदक्षिणाग्नेरनंतरं॥महाकृत्यासमुत्तस्थौतस्यैवात्मविनाशिनी॥ततोज्वालाकरालास्योज्वल
त्केशकपालिका॥कृष्णकृष्णेतिकुपिताकृत्याद्वारवतींययौ॥तामवेक्ष्यजनस्त्रासविचलल्लोचनोमुने॥ययौशरण्यंजगतांशरणंमधुसू
दनं॥काशिराजसुतेनेयमाराध्यवृषभध्वजं॥उत्पादितामहाकृत्येत्यवगम्याथचक्रिणा॥जहिकृत्यामिमामुग्रांवन्हिज्वालाजटालकां॥
चक्रमुत्सृष्टमक्षेषुक्रीडासक्तेनलीलया॥तदग्निमालाजटिलज्वालोद्गारातिभीषणं॥कृत्यामनुजगामाशुविष्णोश्चक्रंसुदर्श
नं॥चक्रप्रतापविध्वस्ताकृत्यामाहेश्वरीतदा॥ननाशवेगिनीवेगात्तदप्यनुजगामतं॥कृत्यावाराणसीमेवप्रविवेशत्वरान्विता॥
विष्णुश्चक्रप्रतिहताप्रभावान्मुनिसत्तम॥ततःकाशिबलंभूरिप्रमथानांमहाबलं॥समस्तशस्त्रास्त्रयुतंचक्रस्याभिमुखंययौ॥श
स्त्रास्त्रमोक्षचतुरंदग्ध्वातद्बलमोजसा॥कृत्यागर्भामशेषांतांतदावाराणसींपुरीं॥सभूभृत्यपौरांतांसाश्वमातंगमानवां॥अशेष

कोष्टकोशांतांदुर्निरीक्षांसुरैरपि॥ज्वालापरिवृताशेषगृहप्राकारचत्वरो॥ददाहतद्धरेश्चक्रंसकलामेवतांपुरीं॥अक्षीणासारमत्य
ल्पसाध्यसाधनसस्पृहं॥तच्चक्रंप्रस्फुरद्दीप्तिविष्णोरभ्याययौकरं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥३४॥मैत्रेयउवाच॥भूयए
वाहमिच्छामिबलभद्रस्यधीमतः॥श्रोतुंपराक्रमंब्रह्मंस्तन्ममाख्यातुमर्हसि॥यमुनाकर्षणादीनिश्रुतानिभगवन्मया॥तत्कथ्यतांम
हाभागयदन्यत्कृतवान्बलः॥पराशरउवाच॥मैत्रेयश्रूयतांकर्मयद्रामेणाभवत्कृतं॥अनंतेनाप्रमेयेनशेषेणधरणीभृता॥दुर्यो
धनस्यतनयांस्वयंवरकृतेक्षणां॥बलादादत्ततांवीरःसांबोजांबुवतीसुतः॥ततःक्रुद्धामहावीर्याःकर्णदुर्योधनादयः॥भीष्मद्रोणा
दयश्चैवबबंधुर्युधिनिर्जितं॥तत्श्रुत्वायादवाःसर्वेक्रोधंदुर्योधनादिषु॥मैत्रेयश्चक्रुश्चक्रुश्चतान्निहंतुंमहोद्यमान्॥तान्निवार्य
रं बलःप्राहमदलोलकलाक्षरं॥मोक्ष्यंतितेमद्वचनाद्यास्याम्येकोहिकौरवान्॥बलदेवस्ततोगत्वानगरंनागसाह्वयं॥बाह्योपवनम
ध्येभून्नविवेशाचतत्पुरं॥तस्यागमनमाज्ञायभूपादुर्योधनादयः॥गामर्घमुदकंचैवरामायप्रत्यवेदयत्॥गृहीत्वाविधिवत्सर्वंत
तस्तानाहकौरवान्॥आज्ञापयत्युग्रसेनःसांबमाशुविमुंचत॥ततस्तुतद्वचःश्रुत्वाभीष्मद्रोणादयोन्नृपाः॥कर्णदुर्योधनाद्यास्तुचु द्विज॥
क्रुधुर्द्विजसत्तम॥ऊचुश्चकुपिताःसर्वेबाल्हीकाद्याश्चकौरवाः॥आज्यार्हंयदोर्वंशामवेक्ष्यमुशलायुधं॥भोभोकिमेतद्भवताबल
भद्रेरितंवचः॥आज्ञांकुरुकुलोत्थानांयादवःकःकरिष्यति॥उग्रसेनोपिययाज्ञांकौरवाणांप्रदास्यति॥तदलंपांडुरैश्छत्रैःनृपयोग्यै
र्विडंबिभिः॥तद्गच्छबलदेवत्वंसांबमन्यायविचेष्टितं॥विमोक्ष्यामोनभवतोनोग्रसेनस्यशासनात्॥प्रणतिर्याकृतास्माकंमन्यानां

कुकुरांतकैः१

नतामसाकृताकेयंआज्ञास्वामिनिभृत्यतः॥गर्वमारोपितायूयंसन्मानासनभोजनैः॥कोदोषोभवतांनीतिर्यत्प्रीत्यानावलोकितां॥
अस्माभिर्भवतोयोयमर्थोबलनिवेदितः॥प्रेम्णेतन्नैतदस्माकंकुलाद्युष्मत्कुलोचितं॥श्रीपराशरउ०॥इत्युक्त्वाकुरवःसर्वेनमु
चमोहरेःसुतं॥कृतैकनिश्चयास्तूर्णंविविशुर्गजसाह्वयं॥मत्तःकोपेनचाचूर्णन्ततोधिक्षेपजन्मना॥उत्थायपार्ष्ण्यावसुधांज
घानसहलायुधः॥ततोविदारितापृथ्वीपार्ष्णिपातान्महात्मनः॥आस्फोटयामाससतदादिशःशब्देनपूरयन्॥उवाचचातित
म्राक्षोभ्रुकुटीकुटिलाननः॥अहोमदावलेपोयमसाराणांदुरात्मनां॥कौरवाणांमहीपत्वमस्माकंकिलकालजं॥उग्रसे
नस्ययेनाज्ञांमन्यतेद्यापिलंघनं॥आज्ञाप्रतीक्षोधर्मेणसहदेवैःशचीपतिः॥उग्रसेनःसमध्यास्तेसुधर्माख्यांशचीपतेः॥धि
ग्मानुष्यजनोच्छिष्टेपुष्टिरेषांनृपासने॥पारिजाततरोःपुष्पमंजरीर्वनिताजनः॥बिभर्तिर्यस्यभृत्यानांसोप्येषांनमहीपतिः॥
समस्तभूभुजांनाथउग्रसेनःसतिष्ठतु॥अद्यनिष्कौरवीकृत्वायास्यामितांपुरीं॥कर्णदुर्योधनंभीष्मंद्रोणंभद्रंसबाल्हिकं॥
दुःशासनादीन्भूरिंचभूरिश्रवसमेवच॥सोमदत्तंशलंभीममर्जुनंसयुधिष्ठिरं॥यमजौकौरवांश्चान्यान्हत्वासाश्वरथ
द्विपान्॥वीरमादायतंसांबंसपत्नीकंततःपुरीं॥द्वारकामुग्रसेनादीन्गत्वाद्रक्ष्यामियादवान्॥अथवाकौरवावासंसमस्तैः
कौरवैःसह॥भारावतारणेशीघ्रंदेवराजेननोदितः॥भागीरथ्यांक्षिपाम्याशुनगरंनागसाह्वयं॥श्रीपराशरउवाच॥इत्यु
क्त्वामदरक्ताक्षश्चकाराधोमुखंहलं॥प्रा— कारवप्रेविन्यस्यचकर्षमुशलायुधः॥आघूर्णितंतत्सहसाततोवैहस्तिनापुरं॥दृष्ट्वा

संक्षुब्धहृदयाश्चुक्रुशुःसर्वकौरवाः॥रामराममहाबाहो क्षम्यतांक्षम्यतांत्वया॥उपसंह्रियतांकोपः प्रसीदमुशलायुध॥एष
सांबसपत्नीकोस्तवनिर्यातितोबलः॥अविज्ञातप्रभावानांक्षम्यतामपराधिनां॥पराशरउवाच॥ततोनिर्यातयामासुःसांबं
पत्न्यासमन्वितं॥निष्क्रम्यचपुरात्तूर्णंकौरवामुनिसत्तम॥भीष्मद्रोणकृपादीनांप्रणम्यवदतांप्रियं॥क्षांतमेवमयेत्याहबलो
बलवतांवरः॥अद्याप्याघूर्णिताकारंलक्ष्यतेतत्पुरंद्विज॥एषप्रभावोरामस्यबलशौर्योपसमन्वितं॥ ॥इतिश्रीविष्णुपु
राणेपंचमेंशे॥३५॥ ॥श्रीपराशरउवाच॥मैत्रेयश्रूयतांतस्यबलस्यबलशालिनः॥कृतंयदन्यत्तेनाभूत्तदपिश्रूय
तांद्विज॥नरकस्यासुरेंद्रस्यदेवपक्षविरोधिनः॥सखाभवन्महावीर्योद्विविदोनामवानरः॥वैरानुबंधंबलवान्सचका
रसुरान्प्रति॥नरकंहतवान्कृष्णोदेवराजेननोदितः॥करिष्येसर्वदेवानांतस्मादेषप्रतिक्रियां॥यज्ञविध्वंसनंकुर्वन्मर्त्य
लोकक्षयंतथा॥ततोविध्वंसयामासयज्ञानज्ञानमोहितः॥बिभेदसाधुमर्यादांक्षयंचक्रेचदेहिनां॥ददाहचपलोदेश
पुरग्रामांतराणिच॥क्वचिच्चपर्वताक्षेपैःग्रामादीन्समचूर्णयत्॥शैलानुत्पाट्यतरसामुमोचांबुनिधौतथा॥पुनश्चार्णवम
ध्यःक्षोभयामाससागरं॥तेनविक्षोभितश्चाब्धिरुद्वेलाद्विजजायते॥प्लावयंस्तीरजान्ग्रामान्पुरादीनतिवेगवान्॥का
मरूपीमहारूपंकृत्वासस्यान्यशेषतः॥लुठन्भ्रमणसंमर्दैःसंचूर्णयतिवानरः॥तेनविप्रकृतंसर्वंजगदेतद्दुरात्मना॥नि
स्वाध्यायवषट्कारंमैत्रेयासीत्सुदुःखितं॥एकदारैवतोद्यानेपपौपानंहलायुधः॥रेवतीचमहाभागातथैवान्याचरस्त्रि

यः॥उपगीयमानोविलसल्ललनामौलिमध्यगः॥रेमेयदुवरःश्रेष्ठःकुबेरइवमंदिरे॥ततःसवानरोभ्येत्यगृहीत्वाशीरिणोहलं॥मु
सलंचचकारास्यसन्मुखःसविडंबनं॥तथैवयोषितांतासांजहासाभिमुखंकपिः॥पानपूर्णांश्चकरकान्क्षिप्ताहत्यवैपदा॥
ततःकोपपरीतात्माभर्त्सयामासतंबलः॥तथापितमवज्ञायचक्रेकिलकिलाध्वनिं॥ततःसमुत्थायबलोजगृहेमुशलंरुषा॥सोपि
शैलशिलांभीमांजग्राहप्लवगोत्तमः॥चिक्षेपचसतांक्षिप्तांमुशलेनसहस्रधा॥बिभेदयादवश्रेष्ठःसापपातमहीतले॥अप
तन्मुशलंचासौसमुल्लंघ्यप्लवंगमः॥वेगेनागम्यरोषेणतलेनोरस्यताडयत्॥ततोबलेनकोपेनमुष्टिनामूर्ध्निताडितः॥पपा
तरुधिरोद्गारीद्विविदःक्षीणजीवितः॥पततातच्छरीरेणगिरिशृंगमशीर्यत॥मैत्रेयशतधावज्रिवज्रेणेवविदारितं॥पुष्पवृष्टिं
ततोदेवारामस्योपरिचिक्षिपुः॥प्रशशंसुस्तथाभ्येत्यसाध्विदंतेमहत्कृतं॥अनेनदुष्टकपिनादैत्यपक्षोपकारिणा॥जगन्नि
राकृतंवीरदिष्ट्यांतःक्षयमागतः॥इत्युक्त्वादिवमाजग्मुर्देवाहृष्टाःसगुह्यकाः॥पराशरउवाच॥एवंविधान्यनेकानिबलदेव
स्यधीमतः॥कर्माण्यपरिमेयानिशेषस्यधरणीभृतः॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशे॥३६॥ ॥पराशरउवाच॥एवंदैत्य
वधंकृष्णोबलदेवसहायवान्॥चक्रेदुष्टक्षितीशानांतथैवजगतःकृते॥क्षितेश्चभारंभगवान्फाल्गुनेनसमंविभुः॥अ
वतारयामासहरिःसमस्ताक्षौहिणीवधात्॥कृत्वाभारावतरणंभुवोहत्वाखिलान्नृपान्॥शापव्याजेनविप्राणामुपसंहृ

विष्णु॰
३९

तवान्कुले ॥ उत्सृज्य द्वारकां कृष्णः त्यक्त्वा मानुष्यमात्मभूः ॥ सांशो विष्णुमयं स्थानं प्रविवेश मुने निजं ॥ मैत्रेय उवाच ॥ स विप्रशा
पव्याजेन स संजह्रे स्वकुलं कथं ॥ कथं च मानुषं देहमुत्ससर्ज जनार्दनः ॥ पराशर उवाच ॥ विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः ॥
पिंडारके महातीर्थे दृष्टा यदुकुमारकैः ॥ ततस्ते यौवनोन्मत्ता भाविकार्यप्रनोदिताः ॥ सांबं जांबवतीपुत्रं भूषयित्वा स्त्रियं यथा ॥
प्राश्रितास्तान्मुनीन्प्रोचुः प्रणिपातपुरःसरं ॥ इयं स्त्री पुत्रकामा तु ब्रह्मन्किं जनयिष्यति ॥ पराशर उवाच ॥ दिव्यज्ञानोपपन्ना
स्ते विप्रलब्धाः कुमारकैः ॥ मुनयः कुपिताः प्रोचुर्मुशलं जनयिष्यति ॥ येनाखिलकुलच्छेदो यादवानां भविष्यति ॥ इत्युक्तास्तैः कुमा
रास्ते आचचक्षुर्यथातथं ॥ उग्रसेनाय मुशलं जज्ञे सांबस्य चोदरात् ॥ तमुग्रसेनो मुशलमयश्चूर्णमकारयत् ॥ जज्ञे स चैरका
चूर्णः प्रक्षिप्तस्तैर्महोदधौ ॥ मुशलस्याथ लोहस्य चूर्णितस्यापि यादवैः ॥ खंडं चूर्णयितुं शेकुर्नैके ते तोमराकृति ॥ तदप्यंबु
निधौ क्षिप्तं मत्स्यो जग्राह जालिभिः ॥ घातितस्योदरात्तस्य लुब्धो जग्राह तं जरा ॥ विज्ञापयति यच्छक्रस्तदिदं श्रूयतां विभो ॥ भा
रावतारणार्थाय वर्षाणामधिकं शतं ॥ भगवानवतीर्णोत्र त्रिदशैः संप्रसादितः ॥ दुर्वृत्ता निहता दैत्या भुवो भारोवतारितः ॥ त्व
या सनाथास्त्रिदशा भवंति त्रिदिवे पुनः ॥ तदतीतं जगन्नाथ वर्षाणामधिकं शतं ॥ इदानीं गम्यतां स्वर्गो भवता यदि रोचते ॥
देवैर्विज्ञाप्यते चेदं अथात्रैव रतिस्तव ॥ तत्स्थीयतां यथाकालं आख्येयमनुजीविभिः ॥ श्रीभगवानुवाच ॥ यत्त्वमाहाखि

पंच॰
३९

लं दूत वेद्म्येतदहमप्युत ॥ प्रारब्ध एव हि मया यादवानामपि क्षयः ॥ भुवो नाद्यापि भारोयं यादवैरनिबर्हितैः ॥ अवतार्य करोम्येतत्स
प्तरात्रेण सत्वरं ॥ यथागृहीतामंभोधेर्दत्वाहं द्वारकां भुवं ॥ यदेवमुपसंहृत्य यास्ये च त्रिदिवालयं ॥ मानुषं देहमुत्सृज्य संकर्ष
णसहायवान् ॥ भार एवास्मि मंतव्यो देवेंद्रेण तथासुरैः ॥ जरासंधादयो येन्ये निहता भारहेतवः ॥ क्षितेस्तेभ्यः कुमारोपि यदूनां नाप
चीयते ॥ तदेनं सुमहाभारमवतार्य क्षितेरहं ॥ यास्याम्यमरलोकस्य पालनाय ब्रवीहि तान् ॥ पराशर उवाच ॥ इत्युक्तो वासुदेवेन
देवदूतः प्रणम्य तं ॥ मैत्रेय दिव्यया गत्या देवराजांतिकं ययौ ॥ भगवानप्यथोत्पातान् दिव्यान्भौमांतरिक्षजान् ॥ ददर्श द्वारकापुर्यां
विनाशाय दिवानिशं ॥ तान्दृष्ट्वा यादवानाह पश्यध्वमतिदारुणं ॥ महोत्पातान् शमायैतान्प्रभासं याम माचिरं ॥ पराशर उ॰
एवमुक्ते यदुश्रेष्ठेन यादवप्रवरस्ततः ॥ महाभागवतः प्राह प्रणिपत्योद्धवो हरिं ॥ भगवन्यन्मया कार्यं तदाज्ञापय माचिरं ॥ म
न्ये कुलमिदं सर्वं भगवान्संहरिष्यति ॥ नाशायास्य निमित्तानि कुलस्याच्युत लक्षये ॥ श्रीभगवानुवाच ॥ गच्छ त्वं दिव्यमागत्य म
प्रसादसमुत्थया ॥ बदरीकाश्रमं पुण्यं गंधमादनपर्वते ॥ नरनारायणस्थाने तत्पावितमहीतले ॥ मन्मना मत्प्रसादेन तत्र सिद्धि
मवाप्स्यसि ॥ अहं स्वर्गं गमिष्यामि उपसंहृत्य वै कुलं ॥ द्वारकां च मया त्यक्तां समुद्रः प्लावयिष्यति ॥ इत्युक्तः प्रणिपत्यैनं स जगा
म तदोद्धवः ॥ नरनारायणस्थानं केशवेनानुमोदितः ॥ ततस्ते यादवाः सर्वे रथानारुह्य शीघ्रगान् ॥ प्रभासं प्रययुः शूरैः राम
कृष्णादिभिः सह ॥ प्राप्ताः प्रभासं प्रयताः स्नातास्ते कुकुरांधकाः ॥ चक्रुस्तत्र महापानं वासुदेवानुमोदिताः ॥ पिबतां तत्र चैतेषां

संघर्षेणपरस्परं॥ अतिपानमदाज्झलेकलहाग्निक्षयावहः॥ जघ्नुःपरस्परंतेतुशस्त्रैर्दैवबलात्कृताः॥ क्षीणशस्त्राश्चजगृहुः
प्रत्यासन्नामथैरकां॥ एरकानुगृहीतावैवज्रभूतेवलक्ष्यते॥ तथापरस्परंजघ्नुःसंप्रहारैःसुदारुणैः॥ प्रद्युम्नसांबप्रमुखाःकृत
वर्मोघसात्यकिः॥ अनिरुद्धादयश्चान्येपृथिवीपृथुरेवच॥ चारुवर्माचारुकश्चतथाक्रूरादयोद्विज॥ एरकारूपिभिर्वज्रैस्तेहि
जघ्नुःपरस्परं॥ निवारयामासहरिर्यादवांस्तेचकेशवं॥ सहायंमेनिरेप्राप्तंतेचजघ्नुःपरस्परं॥ कृष्णोपिकुपितस्तेषामेरकामु
ष्टिमाददे॥ वधायसोपिमुशलंमुष्टिर्लोहमभूत्तदा॥ जघानतेननिःशेषान्यादवानाततायिनः॥ जघ्नुश्चसहसाभ्येत्यतथा
न्येवैपरस्परं॥ ततश्चार्णवमध्येनजैत्रोसौचक्रिणोरथः॥ पश्यतोदारुकस्याशुहृतोश्वैर्द्विजसत्तम॥ चक्रंतदागदाशार्ङ्गं
तूणौशंखोऽसिरेवच॥ प्रदक्षिणंहरिंकृत्वाजग्मुरादित्यवर्त्मना॥ क्षणेननाभवत्कश्चिद्यादवानामघातितः॥ ऋतेकृष्णंमहा
त्मानंदारुकंचमहामुने॥ चंक्रम्यमाणौतौरामंवृक्षमूलकृतासनं॥ ददृशातेमुखाच्चास्यनिःक्रामंतंमहोरगं॥ निःक्रम्यसमु
खात्तस्यमहाभोगोभुजंगमः॥ प्रययावर्णवंसिद्धैःपूज्यमानस्तथोरगैः॥ तदर्घमादायजलधिःसन्मुखंसययौ॥ प्रविवेशचतत्
तोयंपूजितःपन्नगोत्तमैः॥ दृष्ट्वाबलस्यनिर्याणंदारुकंप्राहकेशवः॥ इदंसर्वंसमाच+तदा^क्ष्ववसुदेवोग्रसेनयोः॥ निर्याणंब
लदेवस्ययादवानांतथाक्षयं॥ योगेस्थित्वाहमप्येतत्परित्यक्ष्येकलेवरं॥ वाच्यश्चद्वारकावासीजनःसर्वस्तथाहुकः॥ यथे
मांनगरींरम्यांसमुद्रःप्लावयिष्यति॥ तस्माद्भवद्भिःसज्जैश्चप्रतीक्ष्योह्यर्जुनागमः॥ नस्थेयंद्वारकामध्येनिःक्रांतेतत्रपांडवे॥

तेनैवसहगंतव्यंयत्रयातिसकौरवः॥ गत्वाचब्रूहिकौंतेयमर्जुनंवचनान्मम॥ पालनीयस्त्वयाशक्त्याजनोयंमत्परिग्रहः॥ इत्यर्जु
नेनसहितोद्वारवत्याभवंजनं॥ गृहीत्वायातुवज्रश्चयदुराजोभविष्यति॥ पराशरउवाच॥ इत्युक्तोदारुकःकृष्णंप्रणिपत्यपु
नःपुनः॥ प्रदक्षिणंचबहुशःकृत्वाप्रायाद्यथोदितः॥ सतुगत्वातथाचक्रेद्वारकायांतथार्जुनं॥ आनिनायमहाबुद्धिर्वज्रंचक्रेतथा
नृपं॥ भगवानपिगोविंदोवासुदेवात्मकंपरं॥ ब्रह्मात्मनिसमारोप्यसर्वभूतेष्वधारयत्॥ समानयन्द्विजवचोदुर्वासायदुव
चह॥ योगयुक्तोभ- सादौकृत्वाजानुनिसत्तम॥ आययौचजरानामसतदातत्रलुब्धकः॥ मुशलावशेषलोहैकसायकन्य
स्ततोमरः॥ सतत्पादंमृगाकारमवेक्ष्यारादवस्थितः॥ तलेविव्याधतेनैवतोमरेणद्विजोत्तम॥ ततश्चददृशेतत्रचतुर्बाहुधरं
नरं॥ प्रणिपत्याहचैवैनंप्रसीदेतिपुनःपुनः॥ प्रदक्षिणंचबहुशःकृत्वापादप्रणामवत्॥ अजानताकृतमिदंमयाहरिणश
ङ्कया॥ क्षम्यतामात्मपापेनदग्धंमांदग्धुमर्हसि॥ पराशरउवाच॥ ततस्तंभगवानाहनतेस्तिभयमण्वपि॥ गच्छत्वंमत्प्र
सादेनलुब्धस्वर्गंसुरास्पदं॥ पराशरउवाच॥ विमानमागतंसद्यस्तद्वाक्यसमनंतरं॥ आरुह्यप्रययौस्वर्गंलुब्धकस्तत्प्र
सादतः॥ गतेतस्मिन्सभगवान्संयोज्यात्मानमात्मनि॥ ब्रह्मभूतेऽव्ययेऽचिंत्येवासुदेवमयेमले॥ अजन्मन्यजनाशि
न्यप्रमेयेऽखिलात्मनि॥ तत्याजमानुषंदेहमानीयत्रिविधांगतिं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेसप्तत्रिंशोध्यायः॥ ॥
पराशरउवाच॥ अर्जुनोपितदान्विष्यकृष्णरामकलेवरं॥ संस्कारंलंभयामासतथान्येषामनुक्रमात्॥ अष्टौमहिष्यः

DR. BHAU DAJI MEMORIAL

कथिताःरुक्मिणीप्रमुखास्तुयाः॥उपगुह्यहरेर्देहंविविशुस्ताहुताशनं॥रेवतीचैवरामस्यदेहमाश्लिष्यसत्वरं॥विवेशज्वलितंवह्निंसत्संगाल्हादशीतलं॥उग्रसेनस्तुतच्छ्रुत्वातथैवानकदुंदुभिः॥देवकीरोहिणीचैवविविशुर्जातवेधसं॥ततोर्जुनःप्रेतकार्यंकृत्वातेषांयथाविधिः॥निश्चिक्रमजनंसर्वंगृहीत्वावज्रमेवच॥द्वारवत्याविनिःक्रांताःकृष्णपत्न्यःसहस्रशः॥वज्रंजनंचकौंतेयःपालयन्शनकैर्ययौ॥सभासुधर्माकृष्णेनमर्त्यलोकेसमुज्झिते॥स्वर्गंजगाममैत्रेयपारिजातश्चपादपः॥यस्मिन्दिनेहरिर्यातोदिवंसंत्यज्यमेदिनीं॥तस्मिन्नेवावतीर्णोयंकालकायोबलीकलिः॥प्लावयामासतांशून्यांद्वारकांचमहोदधिः॥वासुदेवगृहंत्वेकंनप्लावयतिसागरः॥नातिक्रांतमलंब्रह्मंस्तदद्यापिमहोदधिः॥नित्यंसंनिहितस्तत्रभगवान्केशवोयतः॥तदतीवमहापुण्यंसर्वपातकनाशनं॥कृष्णक्रीडान्वितंस्थानंदृष्ट्वापापात्प्रमुच्यते॥पार्थःपंचनदेदेशेबहुधनधान्यसमन्विते॥चकारवासंसर्वस्यजनस्यमुनिसत्तम॥ततोलोभःसमभवत्पार्थेनैकेनधन्विना॥दृष्ट्वास्त्रियोनीयमानादस्यूनांनिहतेश्वराः॥ततस्तेपापकर्माणोलोभोपहतचेतसः॥आभीरामंत्रयामासुःसमेत्यात्यंतदुर्मदाः॥अयमेकोर्जुनोधन्वीस्त्रीजनंनिहतेश्वरं॥नयत्यस्मानतिक्रम्यधिगेतद्भवतांबलं॥हत्वागर्वसमारूढोभीष्मद्रोणजयद्रथान्॥कर्णादींश्चनजानातिबलंग्रामनिवासिनां॥यष्टिहस्तानवेक्ष्यास्मान्धनुष्पाणिःसदुर्मतिः॥सर्वानेवावजानातिकिंवोबाहुभिरुन्नतैः॥ततोयष्टिप्रहरणादस्यवोलोप्त्रहारिणः॥सहस्रशोभ्यधावंततंजानंतिहतेश्वरं॥ततोनिवृत्तःकौंतेयःप्राहाभीरान्हसन्निव॥निवर्त्तध्वमधर्मज्ञायदिनस्युर्नमुमूर्षवः॥

अवज्ञायवचस्तस्यजगृहुस्तेतदाधनं॥स्त्रीजनंचैवकौंतेयात्विष्वक्सेनपरिग्रहं॥ततोर्जुनोधनुर्दिव्यंगांडीवमजरंयुधि॥आरोपयितुमारेभेनशशाकचवीर्यवान्॥चकारकृच्छ्रात्सज्जंचतच्चाभूच्छिथिलंपुनः॥नसस्मारतथास्त्राणिचिंतयानोपिपांडवः॥शरान्मुमोचचैतेषुपार्थोवैरिष्वमर्षितः॥त्वक्भेदंवैपरंचक्रुर्यस्तागांडीवधन्वना॥वन्हिनायेक्षयादत्ताःशरास्तेपिक्षयंययुः॥युध्यतःसहगोपालैरर्जुनस्यभवक्षये॥अचिंतयच्चकौंतेयःकृष्णस्येनहितद्बलं॥यन्मयाशरसंघातैःसकलाभूभृतोजिताः॥मिषतःपांडुपुत्रस्यततस्ताःप्रमदोत्तमाः॥अभीरैरपकृष्यंतेकामाच्चान्याःप्रवव्रजुः॥ततःशरेषुक्षीणेषुधनुःकोट्याधनंजयः॥जघानदस्यूंस्तेचास्यप्रहासंजहस्तुर्मुने॥प्रेक्षतस्त्वेवपार्थस्यवृष्ण्यंधकवरस्त्रियः॥जग्मुरादायतेम्लेच्छाःसमस्ताःमुनिसत्तम॥ततःसुदुःखितोजिष्णुःकष्टंकष्टमितिब्रुवन्॥अहोभगवतातेनमुक्तोस्मीतिरुरोदवै॥तद्धनुस्तानिचास्त्राणिसरथस्तेचवाजिनः॥सर्वमेकपदेनष्टंदानमश्रोत्रियेयथा॥अहोतिबलवद्दैवंविनातेनमहात्मना॥यदसामर्थ्ययुक्तेपिनीचवर्गेजयप्रदं॥तौबाहूसचमेमुष्टिःस्थानंतत्सोस्मिचार्जुनः॥पुण्येनेवविनातेनगतंसर्वमसारतां॥ममार्जुनत्वंभीमस्यभीमत्वंतत्कृतंध्रुवं॥विनातेनकृताभीरैर्जितोहंकथमन्यथा॥इत्थंवदन्ययौजिष्णुरिंद्रप्रस्थंपुरोत्तमं॥चकारतत्रराजानंवज्रंयादवनंदनं॥सददर्शततोव्यासंफाल्गुनःकाननाश्रयं॥तमुपेत्यमहाभागंविनयेनाभ्यवादयत्॥तंवंदमानंचरणाववलोक्यमुनीश्वरं॥उवाचपार्थविछायःकथमत्यंतमीदृशः॥अवीरजानुगमनंब्रह्महत्याथवाकृता॥दृढाशाभंगदुःखीवानष्टछायोसिसांप्रतं॥सांतानिकादयोवातेयाच

मानानिराकृताः॥आगम्यस्त्रीरतिर्वात्वंतेनासिविगतःप्रभः॥भुंक्तेप्रदायविप्रेभ्योमृष्टमन्नमथोभवान्॥किंवाकृपणवित्तानि
हृतानिभवतार्जुनः॥कृकच्चित्वंसूर्यवातस्यगोचरत्वंगतोर्जुन॥दुष्टचक्षुर्हतोवापिनिःश्रीकःकथमन्यथास्पृष्टोनखां
भसावाचंघटतोयेसितोपिवा॥तेनातीवसिविच्छायोन्यूनैर्वायुधिनिर्जितः॥पराशरउवाच॥ततःपार्थोविनिःश्वस्यश्रूयतां
भगवन्निति॥प्रोक्तायथावदाचष्टव्यासायात्मपराभवं॥अर्जुनउवाच॥यद्बलंयच्चनस्तेजोयद्वीर्यंयःपराक्रमः॥याश्रीः
छायाचनःसोस्मान्परित्यज्यहरिर्गतः॥इतरेणेवमहतास्मितपूर्वाभिभाषिणा॥हीनामुनेवयंतेनजातास्तृणमयाइव॥
अस्त्राणांसायकाश्चैवनांचगांडीवस्यतथामम॥सारतायाभवन्मूर्त्तासगतःपुरुषोत्तम॥यस्यावलोकनादस्मान्श्रीर्जयः
संपदुन्नतिः॥नतत्याजसगोविंदःत्यक्त्वास्मान्भगवान्गतः॥भीष्मद्रोणांगराजाद्यास्तथादुर्योधनादयः॥यत्प्रभावेननिर्दग्धा
भष्टछ :सकृष्णस्त्यक्तवान्भुवं॥निर्यौवनागतछायायेवमेमही॥विभातितातनेनैषाविरहेतस्यचक्रिणः॥यस्यानुभावाद्भीष्माद्यै
र्मय्यग्नौशलभाइतिं॥विनातेनाद्यकृष्णेनगोपालैरस्मिनिर्जितः॥गांडीवंत्रिषुलोकेषुख्यातिंयदनुभावतः॥गतंतेनविनाभी
रलकुटैस्तंनिराकृतं॥स्त्रीसहस्राण्यनेकानिमन्नाथानिमहामुने॥यततोममनीतानिदस्युभिर्लकुटायुधैः॥आनीयमान
माभीरैःकृष्णकृष्णावरोधनं॥हृतंयष्टिप्रहरणैःपरिभूयबलंमम॥निःश्रीकतानमेचित्रंयज्जीवामितदद्भुतं॥नीचावमा
तपंकांकीनिर्लज्जोस्मिपितामह॥व्यासउवाच॥अलंतेव्रीडयापार्थनत्वंशोचितुमर्हसि॥अवेहिसर्वभूतेषुकालस्यगति

रीदृशी॥कालोभवायभूतानामभावायचपांडव॥कालमूलमिदंज्ञात्वाभवस्थैर्यपरोर्जुन॥नद्यःसमुद्रागिरयःसकलाचवसुंध
रा॥देवामनुष्याःपशवःस्तरवश्चसरीसृपाः॥सृष्टाःकालेनकालेनपुनर्यास्यंतिसंक्षये॥कालात्मकमिदंसर्वंज्ञात्वाशममवा
प्नुहि॥यच्चाहकृष्णमाहात्म्यंतत्तथैवधनंजय॥भारावतारकार्यार्थमवतीर्यःसमेदिनी॥भाराक्रांताधरायातादेवानांसमितिंपु
रा॥तदर्थमवतीर्णोसौकालरूपीजनार्दनः॥तच्चनिष्पादितंकार्यमशेषाभूभुजोहताः॥वृष्ण्यंधककुलंसर्वंतथापार्थोपसं
हृतं॥नकिंचिदन्यत्कर्त्तव्यमस्यभूमितलेप्रभोः॥ततोगतःसभगवान्कृतकृत्योयथेच्छया॥सृष्टिंसर्गेकरोत्येषदेवदेवः
स्थितौस्थितिं॥अंतेतायसमर्थोयःसांप्रतंतेयथाकृतं॥तस्मात्पार्थनसंतापस्त्वयाकार्यःपराभवान्॥भवंतिभवकाले
षुपुरुषाणांपराक्रमाः॥त्वयैकेनहताभीष्मद्रोणाकर्णादयोनृपाः॥तेषामर्जुनकालोत्थःकिंन्यूनाभिभवोनसः॥वि
ष्णोस्तस्यानुभावेनयथातेषांपराभवः॥त्वत्तस्तथैवभवतोदस्युभ्योंतेतदुद्भवः॥सदेवोन्यशरीराणिसमाविश्यज
गत्स्थितिं॥करोतिसर्वभूतानांनाशंचांतेजगत्पतिः॥भवोद्भवेनकौंतेयसहायोभूज्जनार्दनः॥भवांतेचद्विपक्षास्तेकेश
वेनाविलोकिताः॥कःश्रद्दध्यात्सगांगेयान्हन्यास्त्वंकौरवानिति॥अभीरेभ्यश्चभवतःकःश्रद्दध्यात्पराभवं॥पार्थैतत्स
र्वभूतस्यहरेर्लीलाविचेष्टितं॥त्वयायत्कौरवाध्वस्तायदाभीरैर्भवान्जितः॥गृहीतादस्युभिर्याश्चभवान्शोचतिताः
स्त्रियः॥तदप्यहंयथावृत्तंकथयामितवार्जुन॥अष्टावक्रःपुराविप्रोजलवासपरोभवत्॥बहून्वर्षगणान्पार्थगृणन्

ब्रह्मसनातनं॥जिघसुरसंघेषुमेरूपृष्ठेमहोत्सवं॥बभूवतत्रगच्छंत्योददृशुस्तंसुरस्त्रियः॥रंभातिलोत्तमाद्यास्तुशतशोथस
हस्रशः॥तुष्टुवुस्तंमहात्मानंप्रशशंसुश्चपांडव॥आकंठमग्नंसलिलेजटाभारधरंमुनिं॥विनयावनताश्चैनंप्रणेमुःस्तोत्र
तत्पराः॥यथायथाप्रसन्नोसौतुष्टुवुस्तास्तथातथा॥सर्वास्ताःकौरवश्रेष्ठवरिष्ठंतंद्विजन्मनां॥अष्टावक्रउवाच॥प्रसन्नो
हंमहाभागाभवतीनांयदिष्यते॥मत्तस्तद्व्रियतांसर्वंप्रदास्याम्यतिदुर्लभं॥रंभातिलोत्तमाद्यास्तंवेदिन्योऽप्सरसोऽब्रुव
न्॥प्रसन्नेत्वय्यसंप्राप्यंकिमस्माकमितिद्विज॥इतरास्त्वब्रुवन्विप्रप्रसन्नोभगवान्यदि॥तदिच्छामपतिंप्राप्तुंविप्रेंद्रपुरुषोत्त
मं॥व्यासउवाच॥एवंभविष्यतीत्युक्त्वाउत्ततारजलान्मुनिं॥समुत्तीर्णंचददृशुर्विरूपंवक्रमष्टधा॥तंदृष्ट्वागूहमानानांया
सांहासःस्फुटोभवत्॥ताःशशापमुनिःकोपमवाप्यकुरुनंदन॥यस्माद्विरूपरूपंमांमत्वाहासावमानना॥भवतीभिःकृता
तस्मादेषशापंददाम्यहं॥मत्प्रसादेनभर्त्तारंलब्ध्वातुपुरुषोत्तमं॥मच्छापोपहताःसर्वाःदस्युहस्तंगमिष्यथ॥व्यासउवाच॥
इत्युदीरितमाकर्ण्यमुनिस्ताभिःप्रसादितः॥पुनःसुरेंद्रलोकेवैप्राहभूयोगमिष्यथ॥एवंतस्यमुनेःशापादष्टावक्रस्यकेश
वं॥भर्त्तारंप्राप्यतायातादस्युहस्तंसुरांगनाः॥तत्त्वयानात्रकर्त्तव्यःशोकोल्पोपिहिपांडव॥तेनैवाखिलनाथेनसर्वंतदुप
संहृतं॥भवतांचोपसंहारमासन्नंतेनकुर्वता॥बलंतेजस्तथावीर्यंमहात्म्यंचोपसंहृतिं॥जातस्यनियतोमृत्युःपतनंचतथो
न्नतेः॥विप्रयोगावसानेचसंयोगःसंचयात्क्षयः॥विज्ञायविबुधाःशोकेनहर्षमुपयांतिये॥तेषामेवेतरेचेष्टांशिक्षंतःसंति

तादृशः॥तस्मात्त्वयानरश्रेष्ठज्ञात्वैतत्भ्रातृभिःसह॥परित्यज्याखिलंतत्रगंतव्यंतपसेवनं॥तद्गच्छधर्मराजायनिवेद्यैतद्व
चोमम॥परश्वोभ्रातृभिःसार्द्धंयथायासितथाकुरु॥श्रीपराशरउवाच॥इत्युक्तोभ्येत्यपार्थाभ्यांयमाभ्यांचतदार्जुनः॥दृष्ट
चैवानुभूतंचकथयामाससर्वशः॥व्यासवाक्यंचतेश्रुत्वासर्वेऽर्जुनसमीरितं॥राज्येपरिक्षितंकृत्वाययुःपांडुसुतावनं॥इत्ये
तत्तवमैत्रेयविस्तरेणमयोदितं॥जातस्ययद्यदोर्वंशेवासुदेवस्यचेष्टितं॥ ॥इतिश्रीविष्णुपुराणेपंचमेंशेअष्टत्रिंशत्तमो
ध्यायः॥ ॥छ॥ ॥श्रीसमाप्तश्चायंपंचमांशः॥ श्रीरुक्मिणि॥छ॥ नृसिंहब्रसी॥छ॥ द अंसे॥छ॥ श्री ॥छ॥

॥ श्रीरुक्मिणि ॥ सिंहब्रसीय ॥ श्रीरामचंद्र ॥ प्रसीदि अंसे ॥

८०
१२४

THE ASIATIC SOCIETY OF BOMBAY

॥ विष्णुपुराण पंचमांश ॥

॥ विष्णुपुराण षष्ठांश ॥

ॐनमःश्रीविष्णवे॥मैत्रेयउवाच॥व्याख्यातावतासर्गवंशमन्वंतरस्थितिः॥वंशानुचरितंचैवविस्तरेणमहामुने॥श्रोतुमि
च्छाम्यहंत्वत्तोयथावदुपसंहृतिः।कल्पांतेप्राकृतेचैवप्रलयेजायतेयथा॥महाप्रलयसंज्ञांचकल्पांतेचमहामुने॥पराशर
उवाच॥मैत्रेयश्रूयतांमत्तोयथावदुपसंहृतिः।कल्पांतेप्राकृतेचैवप्रलयेजायतेयथा॥अहोरात्रंपितॄणांतुमासोब्दस्त्रिदि
वौकसां॥चतुर्युगसहस्रेतुब्रह्मणोहद्विजोच्यते॥कृतत्रेताद्वापरंचकलिश्चैवचतुर्युगं॥दिव्यैर्वर्षसहस्रैस्तुतद्द्वादशभिरु
च्यते॥चतुर्युगान्यनेकानिसहस्राणिस्वरूपतः।आद्यंकृतयुगंमुक्त्वामैत्रेयांतंतथाकलिं॥आद्येकृतयुगेसर्गोब्रह्मणा
क्रियतेयतः।क्रियतेचोपसंहारस्तथाचांतेकलौयुगे॥मैत्रेयउ०॥कलेःस्वरूपंभगवन्विस्तराद्वक्तुमर्हसि॥धर्मश्चतुष्पा
द्भगवान्यस्मिन्विप्लवमृच्छति॥श्रीपराशरउ०॥कलेःस्वरूपंमैत्रेययद्भवान्प्रष्टुमर्हति।तन्निबोधसमासेनवर्त्ततेय
न्महामुने॥वर्णाश्रमाचारवतीप्रवृत्तिर्नकलौनृणां॥नसामऋक्यजुर्धर्मविनिष्पादनहेतुकी।विवाहान्नकलौधर्मो
नशिष्यगुरुसंस्थितिः।नदीपत्यक्रमोनैववन्हिदेवात्मकःक्रमः॥यत्रतत्रकुलेजातोबलीसर्वेश्वरःकलौ॥सर्वेभ्यएवव
र्णेभ्योयोग्यंकन्यावरोधनी॥येनकेनैवयोगेनद्विजातीदीक्षितःकलौ॥यैवसैवतुमैत्रेयप्रायश्चित्तक्रियाकलौ॥सर्वमेवक
लौशास्त्रंयस्ययद्वचनंद्विज॥देवताश्चकलौसर्वाःसर्वःसर्वस्यचाश्रमाः॥उपवासस्तथायासोवित्तोत्सर्गस्तथाकलौ॥धर्मो
यथाभिरुचितैरनुष्ठानैरनुष्ठितः॥वित्तेनभवितापुंसांस्वल्पेनाढ्यमदःकलौ॥स्त्रीणांरूपमदश्चैवकेशैरेवभविष्यति॥सु

वर्णमणिरत्नाद्यैर्देवस्त्रेचोपक्षयंगते॥कलौस्त्रियोभविष्यंतिकेशैरेवस्वलंकृताः॥परित्यक्ष्यंतिभर्त्तारंवित्तहीनंनस्त्रियः॥
भर्त्ताभविष्यतिकलौवित्तवानेवयोषितां॥योयोददातिबहुलंससस्वामीतदानृणां॥स्वामित्वहेतुसंबंधोभविताभि
जनस्तथा॥गृहांताद्रव्यसंघाताद्रव्यांताचतथामतिः॥अर्थाश्चात्मोपभोगांताभविष्यंतिकलौयुगे॥स्त्रियःकलौभविष्यं
तिस्वैरिण्योललितस्पृहाः॥अन्यायावाप्तवित्तेषुपुरुषाश्चस्पृहालवः॥अभ्यर्थितोपिसुहृदास्वार्थहानिंनमानवः॥पणा
र्धार्धार्धमात्रेपिभविष्यंतितदाद्विज।समानपौरुषंचेतोभाविविप्रेषुवैकलौ॥क्षीरप्रदानसंबंधिभाविगोषुनगौरवं॥अ
नावृष्टिभयाप्रायःप्रजाःक्षुद्भयकातराः॥भविष्यंतितदासर्वागगनासक्तदृष्टयः॥कंदपर्णफलाहारास्तापसाइवमानवाः
आत्मानंघातयिष्यंतितदावृष्ट्यादिदुःखिताः॥दुर्भिक्षमेवसततंतदाक्लेशमनीश्वराः॥प्राप्स्यतिव्याहतसुखप्रमोदामान
वाःकलौ॥अस्नानभोजिनोनाग्निदेवतातिथिपूजनं॥करिष्यंतिकलौप्राप्तेनाचोपित्र्योदकक्रियां॥लोलुपाह्रस्वदेहाश्च
बह्वाशनादनतत्पराः॥बहुप्रजाल्पभाग्याश्चभविष्यंतिकलौस्त्रियाः॥उभाभ्यामपिपाणिभ्यांशिरःकंडूयनंस्त्रियः॥
कुर्वंतोगुरुभर्तॄणांआज्ञांभेत्स्यंत्यनादृताः॥स्वपोषणपराःक्षुद्रादेहसंस्कारवर्जिताः॥परुषानृतभाषिण्योभविष्यंति
कलौस्त्रियः॥दुःशीलादुष्टशीलेषुकुर्वंत्यःसततंस्पृहां॥असद्वृत्ताभविष्यंतिपुरुषेषुकुलांगनाः॥वेदादानंकरिष्यंतिब
टवश्चतथाव्रताः॥गृहस्थाश्चनहोष्यंतिनदास्यंत्युचितान्यपि॥वनवासिनोभविष्यंतिग्राम्याहारपरिग्रहाः॥भिक्षवश्चा

पिमित्रादिदेहसंबंधयंत्रिताः॥ अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः॥ हारिणो जनवित्तानां संप्राप्ते तु कलौ युगे॥ यो यो ऽश्वर
थनागाढ्यः स स स्वामी भविष्यति॥ यश्च यश्चाबलः सर्वः स स भृत्यः कलौ युगे॥ वैश्याः कृषिवणिज्यादि संत्यज्य निजकर्म यत्॥ शू
द्रवृत्त्या प्रवर्त्स्यंति कारुकर्मोपजीविनः॥ भैक्ष्यवृत्त्यास्तथा शूद्राः प्रव्रज्यालिंगिनो ऽधमाः॥ पाषंडसंश्रयां वृत्तिमाश्रयिष्यंति सत्कृ
ताः॥ दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः॥ गोधूमान्नयवान्नाढ्यं देशं यास्यंति दुःखिताः॥ वेदमार्गे प्रलीने च पाषंडाढ्ये ततो जने॥
अधर्मवृद्ध्या लोकानां स्वल्पमायुर्भविष्यति॥ अशास्त्रविहितं घोरं तप्यमानेषु वै तपः॥ नरेषु नृपदोषेण बालमृत्युर्भविष्यति॥
भवित्री योषितां सूतिः पंचषट्सप्तवार्षिकी॥ नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ॥ पलितोद्भवश्च भविता तदा द्वादशवर्षिकः॥
नातिजीवति चैकश्चित्तु कलौ वर्षाणि विंशति॥ अल्पप्रज्ञा वृथालिंगा दुष्टांतःकरणाः कलौ॥ यतस्ततो विनंक्ष्यंति कालेनाल्पेन मान
वाः॥ यदा यदा हि मैत्रेय वृद्धिः पाषंडिषूद्भवेत्॥ तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥ यदा यदा सतां हानिर्वेदमार्गानुसारिणां॥
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥ प्रारंभाश्चावसीदंति यदा धर्मकृतां नृणां॥ तदानुमेयं प्राधान्यं कलेर्मैत्रेय पंडितैः॥ यदा
यदा न यज्ञानामीश्वरः पुरुषोत्तमः॥ ईज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलं॥ न प्रीतिर्वेदवाक्येषु पाषंडेषु यदा रतिः॥ कलेर्वृद्धि
स्तदा ज्ञेया प्राज्ञैर्यास्त्र द्विजोत्तम॥ कलौ यज्ञपतिं विष्णुं सर्वस्रष्टारमीश्वरं॥ नार्चयिष्यंति मैत्रेय पाषंडोपहता नराः॥ किं देवैः किं
द्विजैर्वेदैः किं शौचेनांबुजन्मना॥ इत्येवं प्रविवक्ष्यंति पाषंडोपहता नराः॥ स्वल्पांबुवृष्टिः पर्जन्यः स्वल्पसस्यफलं तथा॥ फलं तथा

ल्पसारं च विप्र प्राप्ते कलौ युगे॥ शाणीप्रायाणि वस्त्राणि शमीप्राया महीरुहाः॥ शूद्रप्रायास्तथा वर्णाः भविष्यंति कलौ युगे॥ अणु
प्रायाणि धान्यानि अजाप्रायं तथा पयः॥ भविष्यति कलौ प्राप्ते उशीरं चानुलेपनं॥ श्वश्रूश्वसुरभूयिष्ठा गुरवश्च नृणां कलौ॥ शा
लाद्याः शालभार्याश्च सुहृदो मुनिसत्तम॥ कस्य माता पिता कस्य यदा कर्मात्मकः पुमान्॥ इति चोदाहरिष्यंति श्वसुरानुगता नराः॥
वाङ्मनःकायिकैर्दोषैरभिभूताः पुनः पुनः॥ नराः पापान्यनुदिनं करिष्यंत्यल्पमेधसः॥ निःस्वाध्याये सत्वानामशौचानां निर्ह्रीकानां
तथा नृणां॥ यद्यद्दुःखाय तत्सर्वं कलिकाले भविष्यति॥ निःस्वाध्यायवषट्कारे स्वधास्वाहाविवर्जिते॥ तदा प्रविरले विप्रः क्वचिल्लोके वि
वत्स्यते॥ तत्राल्पेनैव यत्नेन पुण्यस्कंधमनुत्तमं॥ करोति तं कृतयुगे क्रियते तपसा हि यः॥ ॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे प्रथमोऽध्या
यः॥ छ॥ ॥ पराशर उ०॥ व्यासश्चाह महाबुद्धिर्यदत्रैव हि जन्मनि॥ तत् श्रूयतां महाभाग गदतो मम तत्वतः॥ तस्मिन्काले ऽल्पके
धर्मो ददाति सुमहत्फलं॥ मुनीनामप्यभूद्वादः कैश्चासौ क्रियते सुखं॥ संदेहनिर्णयार्थाय वेदव्यासं महामुनिं॥ ययुस्ते संश
यं प्रष्टुं मैत्रेय मुनिपुंगवाः॥ ददृशुस्ते मुनिं तत्र जान्हवीसलिले द्विज॥ वेदव्यासं महाभागमर्द्धस्नातं सुतं मम॥ स्नानावसानं ते
तस्य प्रतीक्षंतो महर्षयः॥ तस्थुस्तटे महानद्यास्तरुखंडमुपाश्रिताः॥ मग्नोऽथ जान्हवीतोयादुत्थायाह सुतो मम॥ व्यासः साधुः
कलिः साधुरित्येवं शृणुतां वचः॥ तेषां मुनीनां भूयश्च ममज्ज स नदीजले॥ उत्थाय साधु साध्वीति शूद्र धन्योऽसि चाब्रवीत्॥ नि
मग्नश्च समुत्थाय पुनः प्राह महामतिः॥ योषितः साधु धन्यास्तास्ताभ्यो धन्यतरोऽस्ति कः॥ ततः स्नात्वा यथान्यायमाचांतं

कृतसत्क्रियां।।उपतस्थुर्महाभागेमुनयस्तंसुतंमम।।कृतसंवंदनांश्चाह कृतासनपरिग्रहान्।।किमर्थमागतायूयमितिसत्य
वतीसुतः।।तमूचुःसंशयंप्रष्टुंभवंतंवयमागताः।।अलंतेनास्तुतावत्तत्कथ्यतामपरंत्वया।।कलिःसाध्वितियत्प्रोक्तंशूद्रः
साध्वितियोषितः।।यच्चाहभगवान्साधुधन्याश्चेतिपुनःपुनः।।तत्सर्वंश्रोतुमिच्छामोनचेद्गुह्यंमहामुने।।तत्कथ्यतांततोहृत्स्थं
प्रक्ष्यामस्त्वांप्रयोजनं।।इत्युक्तोमुनिभिर्व्यासःप्रहस्येदमथाब्रवीत्।।श्रूयतांभोमुनिश्रेष्ठायदुक्तंसाधुसाध्विति।।यत्कृतेदश
भिर्वर्षैःत्रेतायांहायनेनतत्।।द्वापरेयच्चमासेनअहोरात्रेणतत्कलौ।।तपसोब्रह्मचर्यस्यजपादेश्चफलंद्विज।।प्राप्नोतिपु
रुषस्तेनकलिःसाध्वितिभाषितं।।ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन्।।यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेश
वं।।धर्मोत्कर्षमवाप्नोतिह्यतीवपुरुषःकलौ।।स्वल्पायासेनधर्मज्ञास्तेनतुष्टोस्म्यहंकलेः।।व्रतचर्यापरैर्ग्राह्यावेदाःपूर्वंद्वि
जातिभिः।।ततःस्वधर्मसंप्राप्तैर्यष्टव्यंविधिवद्धनैः।।वृथाकथावृथाभोज्यंवृथेज्याचद्विजन्मनां।।पतनायतथाभाव्यंतैस्तुसं
यमितिसदा।।असम्यक्करणेदोषस्तेषांसर्वेषुवस्तुषु।।भोज्यपेयादिकंचैषांनेच्छाप्राप्तिकरंद्विजाः।।पारतंत्र्यंसमस्ते
षुतेषांकार्येषुवैपुनः।।यजंतितेनिजाल्लोकान्क्लेशेनमहताद्विजाः।।द्विजशुश्रूषयैवैषपाकयज्ञाधिकारवान्।।निजान्जय
तिवैलोकान्शूद्रोधन्यतरस्ततः।।भक्ष्याभक्ष्येषुनास्यास्तिपेयापेयेषुवैयतः।।नियमोमुनिशार्दूलास्तेनासौसाध्वितीरि
तं।।स्वधर्मस्याविरोधेननरैर्लब्धंधनंसदा।।संपादनीयंविप्रेषुयष्टव्यंचयथाविधि।।तस्यार्जनेमहान्क्लेशःपालनेच

द्विजोत्तमाः।।तथासद्विनियोगायविज्ञेयंगहनंनृणां।।एभिरन्यैर्महाक्लेशैःपुरुषोद्विजसत्तमाः।।निजान्जयतिवैलोकान्प्राजाप
त्यादिकान्क्रमात्।।योषित्शुश्रूषणंभर्तुःकर्मणामनसागिरा।।तद्धितासमवाप्नोतितत्सालोक्यंयतोद्विजाः।।नातिक्लेशेनमहताता
नेवपुरुषोयथा।।तृतीयंव्याहृतंतेनमयासाध्वितियोषितां।।एतद्वःकथितंविप्रायन्निमित्तमिहागतः।।तत्पृच्छध्वंयथाकाममअ
हंवक्ष्यामिवस्फुटं।।पराशरोवाच।।ततस्तेमुनयःप्रोचुर्यत्प्रष्टव्यंमहामुने।।अन्यस्मिन्नेवतत्प्रश्नेयथावत्कथितंत्वया।।ततःप्र
हस्यतान्प्राहकृष्णद्वैपायनोमुनिः।।विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान्।।मयैषभवतांज्ञातःप्रश्नोदिव्येनचक्षुषा।।ततो
हिवःप्रसंगेनसाधुसाध्वितिभाषितं।।स्वल्पेनहिप्रयत्नेनधर्मःसिध्यतिवैकलौ।।नरैरात्मगुणांभोभिःक्षालिताखिलकल्मषैः
शूद्रैश्चद्विजशुश्रूषातत्परैर्मुनिसत्तमाः।।तथास्त्रीभिरनायासात्पतिशुश्रूषयैवहि।।ततस्त्रितयमप्येतन्ममधन्यतमंमतं।।
धर्मसंसाधनेक्लेशोद्विजातीनांकृतादिषु।।भवद्भिर्यदभिप्रेतंतदेतत्कथितंमया।।अपृष्टेनापिधर्मज्ञाःकिमेतत्क्रियतांद्विजाः।।
पराशरोवाच।।ततःसंपूज्यतेव्यासंप्रशशंसुःपुनःपुनः।।यथागतंद्विजाजग्मुर्व्यासोक्तिकृतनिश्चयाः।।भवतोपिमहाभागर
हस्यंकथितोमया।।अत्यंतदुष्टस्यकलेरयमेकोमहान्गुणः।।कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेत्।।यच्चाहंभवतापृष्टोज
गतामुपसंहृतिं।।प्राकृतामंतरालांचतामप्येषवदामिते।। ।।इतिश्रीविष्णुपुराणेषष्ठेंशेद्वितीयोध्यायः।। ।।पराशरोवाच।।
सर्वेषामेवभूतानांत्रिविधःप्रतिसंचरः।।नैमित्तिकःप्राकृतिकस्तथैवात्यंतिकोमतः।।ब्राह्मोनैमित्तिकस्तेषांकल्पांतेप्रतिसं

वि०पु०
४

चरः॥आत्यंतिकश्चमोक्षाख्यःप्राकृतोद्विपरार्धिकः॥मैत्रेयउवाच॥परार्धसंख्यांभगवान्ममाचक्ष्वयथातुसः।द्विगुणीकृतया
ज्ञेयःप्राकृतःपरिसंचरः॥स्थानात्स्थानंदशगुणंएकस्माद्गण्यतेद्विज।ततोऽष्टादशमेस्थानेपरार्द्धमभिधीयते।परार्धंद्विगु
णंयत्तुप्राकृतःप्रलयोद्विज।तदाव्यक्तेऽखिलंव्यक्तंस्वहेतौलयमेतिवै॥निमिषोमानुषोयोयंमात्रामात्रप्रमाणतः॥तैःपंचदश
भिःकाष्ठाताभिस्त्रिंशतिभिःकला।नाडिकातुप्रमाणेनकलादशचपंचच॥उन्मानेनांभसःसातुपलान्यर्धत्रयोदश।हेममाषैः
कृतच्छिद्रश्चतुर्भिश्चतुरंगुलैः॥मागधेनतुमानेनजलप्रस्थस्तुसस्मृतः।नाडिकाभ्यामथद्वाभ्यांमहूर्त्तास्तुत्रिंशन्मासस्तुवैत
था॥मासैर्द्वादशभिर्वर्षंअहोरात्रंतुयद्दिवि॥त्रिभिर्वर्षशतैर्वर्षंषष्ट्याचैवासुरद्विषां॥तैस्तुद्वादशसाहस्रैश्चतुर्युगमुदाहृतं॥
चतुर्युगसहस्रंतुकथ्यतेब्रह्मणोदिनं॥सकल्पस्तत्रमनवश्चतुर्दशमहामुने।तदंतेचैवमैत्रेयब्राह्मोनैमित्तिकोलयः॥तस्य
स्वरूपमत्युग्रंमैत्रेयगदतोमम॥शृणुष्वप्राकृतंभूयस्तववक्ष्याम्यहंलयं॥चतुर्युगसहस्रांतेक्षीणप्रायेमहीतले।अनावृ
ष्टिरतीवोग्राजायतेशतवार्षिकी॥ततोयान्यल्पसाराणितानिसत्वान्यशेषतः।क्षयंयांतिमुनिश्रेष्ठपार्थिवान्यनुपीडनात्॥
ततःसभगवान्कृष्णोरुद्ररूपधरोव्ययः।क्षयाययततेकर्तुमात्मस्थाःसकलाःप्रजाः।ततःसभगवान्विष्णुर्भानोःसप्तसुर
श्मिषु॥स्थितःपिबत्यशेषाणिजलानिमुनिसत्तम॥पीत्वांभांसिसमस्तानिप्राणिभूमिगतानिवै।शोषयन्नितिमैत्रेयसमस्तं
पृथिवीतलं॥समुद्रान्सरितःशैलान्शैलप्रस्रवणानिच॥पातालेषुचयत्तोयंतत्सर्वंनयतिक्षयं।ततस्तस्यानुभावेनतोया

वि०ष९
४

हारोपबृंहिताः॥तएवरश्मयःसप्तजायंतेसप्तभास्कराः।अधश्चोर्ध्वंचतेदीप्तास्ततःसप्तदिवाकराः।दहंत्यशेषंत्रैलोक्यंसपाता
लतलंद्विज॥दह्यमानंतुतैर्दीप्तैस्त्रैलोक्यंद्विजभास्करैः॥साद्रिनद्यर्णवाभोगंनिःस्नेहमुपजायते॥ततोनिर्दग्धवृक्षांबुत्रैलो
क्यमखिलंद्विज॥भवत्येषाचवसुधाकर्मपृष्ठोपमाकृतिः।ततःकाग्निरुद्रोसौभूत्वासर्वहरोहरिः॥शेषाहिश्वाससंभूतःपा
तालानिदहत्यधः।पातालानिसमस्तानिसदग्ध्वादहनोमहावर्त्तस्तन्॥भूमिमभ्येत्यसकलंनिर्दहेद्वसुधातलं॥भुवर्लोकं
ततःसर्वंस्वर्लोकंचसुदारुणः॥ज्वालामालामहावर्त्तस्तत्रैवपरिवर्त्तते॥अंबरीषमिवाभातित्रैलोक्यमखिलंतदा॥ज्वा
लावर्त्तपरीवारमुपक्षीणचराचरं॥ततस्तापरीतास्तुलोकद्वयनिवासिनः॥हताधिकारागछंतिमहर्लोकंमहामुने॥तस्माद
पिमहातापतप्तालोकास्ततःपरं॥गछंतिजनलोकंतेदशावृत्त्यापरैषिणः॥ततोदग्ध्वाजगत्सर्वंरुद्ररूजनार्दनः॥मुखनिःश्वा
सजान्मेघान्करोतिमुनिसत्तम॥ततोगजकुलप्रख्यास्तडित्वंतोतिनादिनः॥उत्तिष्ठंतितदाव्योम्निघोराःसंवर्त्तकाघनाः॥के
चिन्नीलोत्पलश्यामाकेचित्कुमुदसन्निभाः॥धूम्रवर्णाघनाःकेचित्केचित्पीताःपयोधराः॥केचिद्रासभवर्णाभामाक्षारस ला
न्निभास्तथा॥केचिद्वैदूर्यसंकाशाइंद्रनीलनिभाःक्वचित्॥शंखकुंदनिभाश्चान्येजात्यंजननिभास्तथा॥इंद्रगोपनिभाःकेचि
न्मनःशीलनिभाश्चास्तथा॥चाषपत्रनिभाःकेचिदुत्तिष्ठंतिघनाघनाः॥केचित्पुरवराकाराःकेचित्सर्वतसन्निभाः॥कूटा
गारनिभाश्चान्येकेचित्स्थलनिभाघनाः॥महारवामहाकायाःपूरयंतिनभस्तलं॥वर्षंतस्तेमहासारास्तमग्निम

तिभेरवे॥ शमयंत्यखिलंकंविप्रत्रैलोक्यांतरविस्तृतं॥ नष्टेचाग्नौशमेतंतेपिवर्षाणामनिवारणं॥ प्लावयंतोजगत्सर्वंवर्षंतिमुनिसत्तम॥ धाराभिरक्षमात्राभिःप्लावयित्वाखिलांभुवं॥ भुवर्लोकंतथैवोर्ध्वंप्लावयंतिदिवंद्विज॥ अंधकारीकृतेलोकेनष्टेस्थावरजंगमे॥ वर्षंतितेमहामेघावर्षाणामधिकंशतं॥ ॥इतिश्रीविष्णुपुराणेषडंशेतृतीयोध्यायः॥ छ॥ पराशरउवाच॥ सप्तर्षिस्थानमाक्रम्यस्थितेंभसिमहामुने॥ एकार्णवंभवत्येतत्त्रैलोक्यमखिलंततः॥ मुखनिश्वासजोविष्णोर्वायुस्तान्जलदांस्ततः॥ नाशंनयतिमैत्रेयवर्षाणामपरंशतं॥ सर्वभूतमयोचिंत्योभगवान्भूतभावनः॥ अनादिरादिर्विश्वस्यपीत्वावायुमशेषतः॥ एकार्णवेजगत्यस्मिन्शेषशय्यास्थितःप्रभुः॥ ब्रह्मरूपधरःशेतेभगवानादिकृद्धरिः॥ जनलोकगतैःसिद्धैःसनकाद्यैरभिष्टुतः॥ ब्रह्मलोकगतैश्चैवचिंत्यमानोमुमुक्षुभिः॥ आत्ममायामयींदिव्यांयोगनिद्रांसमाश्रितः॥ आत्मानंवासुदेवाख्यंचिंतयन्परमेश्वरः॥ एषनैमित्तिकोनाममैत्रेयप्रतिसंचरः॥ निमित्तंतत्रयच्छेतेब्रह्मरूपधरोहरिः॥ यदाजागर्तिसर्वात्मासतदाचेष्टतेजगत्॥ निमीलत्येतदखिलंमायाशय्यागतेच्युते॥ पद्मयोनेर्दिनंयत्तुचतुर्युगसहस्रवत्॥ एकार्णवप्लुतेलोकेतावतीरात्रिरिष्यते॥ ततःप्रबुद्धोरात्र्यंतेपुनःसृष्टिंकरोत्यजः॥ ब्रह्मस्वरूपधृक्विष्णुयथामेकथितंपुरा॥ इत्येषकल्पसंहारंअंतरप्रलयोद्विज॥ नैमित्तिकस्तेकथितःप्राकृतंशृण्वतःपरं॥ अनावृष्ट्यग्निसंपर्कात्कृतेसंख्याजनेमुने॥ समस्तेष्वेवलोकेषुपातालेष्वखिलेषुच॥ महदादेर्विकारस्यविशेषांतस्यसंक्षये॥ कृष्णेच्छाकारितेतस्मि

न्प्रवृत्तेप्रतिसंचरे॥ आग्नेयसंतिवैपूर्वंभूमेर्गंधात्मकंगुणं॥ आत्तगंधाततोभूमिःप्रलयत्वायकल्पते॥ प्रनष्टेगंधतन्मात्रेभवत्युर्वीजलात्मिका॥ आपस्तदाप्रवृद्धास्तुवेगवत्योमहास्वनाः॥ सर्वमापूरयंतीदंतिष्ठंतिविचरंतिच॥ सलिलेनैवोर्मिमताव्योलोकांतेसमंततः॥ व्याप्तमेवाभवःसर्वंजगदेतत्द्विजोत्तम॥ अपामपिगुणोयस्तुज्योतिरवादीयतेतुसः॥ नश्यंत्यापस्ततस्ताश्चरसतन्मात्रसंक्षयात्॥ ततश्चापोहृतरसाज्योतिष्ट्वंप्राप्नुवंतिवै॥ अग्न्यवस्थेतुसलिलेतेजसासर्वतोवृते॥ सवाग्निःसर्वतोव्याप्यआदत्तेचजलंतदा॥ सर्वमापूर्यतेतेनतथाजगदिदंशनैः॥ अर्चिभिसंवृतेतस्मिन्तिर्यगूर्ध्वमधस्तथा॥ ज्योतिषोपिपरंरूपंवायुरत्तिप्रभाकरं॥ प्रलीनेचततस्तस्मिन्वायुभूतेखिलात्मनि॥ प्रनष्टेरूपतन्मात्रेहृतरूपोविभावसु॥ ततःसम्मूलमासाद्यवायुःसंभवमात्मनः॥ उर्ध्वश्चेतितिर्यश्वदोधवीतिदिशोदश॥ वायोरपिगुणंस्पर्शमाकाशंग्रसतेततः॥ प्रशाम्यतितदावायुस्तंतुतिष्ठत्यनावृतं॥ अरूपमरसस्पर्शगंधमपरमूर्त्तिमान्॥ सर्वमापूरयच्चैवसुमहत्तत्प्रकाशते॥ परिमंडलंतत्सुषिरंआकाशंशब्दलक्षणं॥ शब्दमात्रंतदाकाशंसर्वमावृत्यसंक्षयं॥ ततःशब्दगुणंतस्यभूतादिर्ग्रसतेततः॥ भूतेंद्रियेषुयुगपद्भूतादौसंस्थितेषुवै॥ अभिमानात्मकोह्येषभूतादिस्तामसःस्मृतः॥ भूतादिंग्रसतेचापिमहान्वैबुद्धिलक्षणः॥ उर्वीमहांश्चजगतःप्रांतेंतर्बाह्यमस्तथा॥ एवंसप्तमहाबुध्येक्रमात्प्राकृतयस्तुवै। प्रत्याहारेणताःसर्वाःप्रविशंतिपरस्परं॥ येनेदमावृतंसर्वमप्सुयत्रप्रजायते॥ सप्तद्वीपसमुद्रांतंसप्तलोकंसपर्वतं॥ उदकावरणंयत्रया

तिषादीर्यतेनुतत्॥ज्योतिर्वायौलयंयातियात्याकाशेसमीरणः॥आकाशंचैवभूतादिर्ग्रसतेतंतथामहान्॥महांतमेभिःसहि
तंप्रकृतिर्ग्रसतेद्विज॥गुणसाम्यमनुद्रिक्तंअन्यूनंचमहामुने॥प्रोच्यतेप्रकृतिर्हेतुःप्रधानंकारणंपरं॥इत्येषाप्रकृतिःसर्वाव्य
क्ताव्यक्तस्वरूपिणी॥व्यक्तस्वरूपमव्यक्तेतस्यांमैत्रेयलीयते॥एकःशुद्धोक्षरोनित्यःसर्वव्यापीतथापुमान्॥सोप्यंशःसर्व
भूतस्यमैत्रेयपरमात्मनः॥नसंतियत्रदेवेशेनामजात्यादिकल्पना॥सत्तामात्रात्मकेज्ञेयाज्ञानात्मनिपरेश्वरे॥तद्ब्रह्मपरमंधाम
परमात्मासचेश्वरः॥सविष्णुःसर्वमेवेदंयतोनावर्त्ततेयतिः॥प्रकृतिर्यामयाख्याताव्यक्ताव्यक्तस्वरूपिणी॥पुरुषश्चाप्युभावे
तौलीयतेपरमात्मनि॥परमात्माचसर्वेषामाधारःपरमेश्वरः॥सविष्णुनाम्नावेदेषुवेदांतेषुचगीयते॥प्रवृत्तंचनिवृत्तंचद्वि
विधंकर्मवैदिकं॥ताभ्यामुभाभ्यांपुरुषःसर्वमूर्त्तिःसईज्यते॥ऋग्यजुःसामभिर्मार्गैःप्रवृत्तैरिज्यतेश्चसो॥यज्ञेश्वरोय
ज्ञपुमान्पुरुषैःपुरुषोत्तमः॥ज्ञानात्माज्ञानयोगेनज्ञानमूर्त्तिःसईज्यते॥निवृत्तेयोगिभिर्मार्गेविष्णुर्मुक्तिफलप्रदः॥ह्रस्वदी
र्घप्लुतैर्यत्तुकिंचिद्वस्त्वभिधीयते॥यच्चवाचामविषयेतत्सर्वंविष्णुरव्ययः॥व्यक्तेसएववाव्यक्तंसएवपुरुषोत्तमः॥परमा
त्मासविश्वात्माविश्वरूपधरोहरिः॥व्यक्ताव्यक्तात्मिकातस्मिन्प्रकृतिःसंप्रलीयते॥पुरुषश्चापिमैत्रेयव्यापिन्यव्याहतात्म
नि॥द्विपरार्ध्यात्मकःकालःकथितोयोमयातव॥तदहस्तस्यमैत्रेयविष्णोरीशस्यकथ्यते॥व्यक्तेचप्रकृतौलीनेप्रकृत्यां
पुरुषेतथा॥तत्रस्थितेनिशाचान्यातत्प्रमाणामहामुने॥नैवाहस्तस्यननिशानित्यस्यपरमात्मनः॥उपचारस्तथाप्येषतस्यें

BHAU DAJI

शस्यद्विजोच्यते॥इत्येषतवमैत्रेयकथितःप्राकृतोलयः॥आत्यंतिकमथोब्रह्मन्निबोधप्रतिसंचरं॥ ॥इतिश्रीविष्णुपुराणेष
ष्ठेंशेचतुर्थोध्यायः॥४॥ ॥पराशरोवाच॥आध्यात्मिकादिमैत्रेयज्ञात्वातापत्रयेबुधः॥उत्पन्नज्ञानवैराग्यःप्राप्नोत्यात्यंतिकंल
यं॥आध्यात्मिकोवैद्विविधःशारीरोमानसस्तथा॥शारीरोबहुभिर्भेदैर्भिद्यतेश्रूयतांचसः॥शिरोरोगप्रतिश्यायज्वरशूलभगंदरैः॥
गुल्मार्शोवेपथुश्वासछर्द्यादिभिरनेकधा॥तथाक्षिरोगातीसारकुष्ठांगामयसंज्ञकैः॥भिद्यतेदेहजस्तापोमानसंश्रोतुमर्हसि॥
कामक्रोधभयद्वेषलोभमोहविषादजः॥शोकासूयावमानेर्ष्यामात्सर्यादिमयस्तथा॥मानसोपिद्विजश्रेष्ठतापोभवतिनैकधा॥इ
त्येवमादिभिर्भेदैस्तापोह्याध्यात्मिकःस्मृतः॥मृगपक्षिमनुष्याद्यैःपिशाचोरगराक्षसैः॥सरीसृपाद्यैश्चनृणांजायतेचाधिभौ
तिकः॥शीतोष्णवातवर्षांबुवैद्युतादिसमुद्भवः॥तापोद्विजवरश्रेष्ठकथ्यतेचाधिदैविकः॥गर्भजन्मजराज्ञानमृत्युनारकजंतथा
दुःखंसहस्रशोभेदैर्भिद्यतेमुनिसत्तम॥सुकुमारतनुर्गर्भेजंतुर्बहुमलावृत॥उल्बसंवेष्टितोभुग्नपृष्ठग्रीवास्थिसंहतिः॥
अत्यम्लकटुशीतोष्णलवणैर्मातृभोजनैः॥अतितापिभिरत्यर्थंवर्धमानातिवेदनः॥प्रसारणाकुंचनादौनांगानांप्रभुरात्मनः॥
शकृन्मूत्रमहापंकशायीसर्वत्रपीडितः॥निरुच्छ्वासःसचैतन्यःस्मरन्जन्मशतान्यथ॥आस्तेगर्भेतिदुःखेननिजकर्मनिबं
धनः॥जायमानःपुरीषासृङ्मूत्रशुक्राविलाननः॥प्राजापत्येनवातेनपीड्यमानास्थिबंधनः॥अधोमुखोवैक्रियतेप्रबलैःसूति
मारुतैः॥क्लेशान्निष्क्रांतिमाप्नोतिजठरान्मातुरातुरः॥मूर्छामवाप्यमहतींसंस्पृष्टोबाह्यवायुना॥विज्ञानभ्रंशमाप्नोतिजातश्च

मुनिसत्तम॥ कंटकैरिव तुन्नांगः क्रकचैरिव दारितः॥ पूतिव्रणान्निष्पतितो धरित्र्यां कृमिको यथा॥ कंडूयने चाप्यशक्तः परिवर्त्तेप्यनीश्व
रः॥ स्नानपानादिकाहारमप्याप्नोति परेच्छया॥ अशुचिप्रस्तरे सुप्तः कीटदंशादिभिस्तथा॥ भक्ष्यमाणोपि नैवैषां समर्थो विनिवारणे॥
जन्मदुःखान्यनेकानि जन्मनोनंतराणि च॥ बालभावे यदाप्नोति आधिभूतादिकानि च॥ अज्ञानतमसाछन्नो मूढांतःकरणो नरः॥ न
जानाति कुतः कोहं क्वाहं गंता किमात्मकः॥ केन बंधेन बंधोहं कारणं किमकारणं॥ किं कार्यं किमकार्यं वा किं वाच्यं किं च नोच्यते॥ को धर्मः
कश्च वै धर्मः कस्मिन्वर्त्तेत वा कथं॥ किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत्॥ एवं पशुसमैर्मूढैरज्ञानप्रभवं महत्॥ अवाप्यते न
रैर्दुःखं शिश्नोदरपरायणैः॥ आज्ञानं तामसो भावः कार्यारंभप्रवृत्तयः॥ अज्ञानिनां प्रवर्त्तंते कर्मलोपास्ततो द्विज॥ नरकं कर्मणां लो
पात् फलमाहुर्महर्षयः॥ तस्मादज्ञानिनां दुःखमिह चामुत्र वोत्तमं॥ जराजर्जरदेहश्च शिथिलावयवः पुमान्॥ विगलछीर्णवदनो
वलीस्नायुषिरावृतः॥ दूरप्रनष्टनयनो व्योमांतर्गततारकः॥ नासाविवरनिर्यातरोमपुंजश्चलद्वपुः॥ प्रकटीकृतसर्वास्थिनतपृष्ठा
स्थिसंहतिः॥ उत्सन्नजठराग्नित्वादल्पाहारोल्पचेष्टितः॥ कृछ्राच्चंक्रमणोत्थानशयनासनचेष्टितः॥ मंदीभवछ्रोत्रनेत्रश्चवल्लाला
विलाननः॥ अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः॥ तत्क्षणेप्यनुभूतानामस्मर्त्ताखिलकर्मणां॥ सकृदुच्चारिते वाक्ये समुद्भूतम
हाश्रमः॥ श्वासकासमहायाससमुद्भूतप्रजागरः॥ अन्येनोत्थाप्यतेन्येन तथा संवेश्यते जरी॥ भृत्यात्मपुत्रदाराणामवमानास्पदी
कृतः॥ प्रक्षीणाखिलशौचश्च विहाराहारसस्पृहः॥ हास्यः परिजनस्यापि निर्विण्णाशेषबांधवः॥ अनुभूमिवान्यस्मिन्जन्मन्यात्म
त

विचेष्टितं॥ संस्मरन्यौवने दीर्घं निःश्वसत्यतितापितः॥ एवमादीनि दुःखानि जरायामनुभूय वै॥ मरणे यानि दुःखानि प्राप्नोति शृ
णु तान्यपि॥ श्लथग्रीवांघ्रिहस्तोथ व्याप्तो वेपथुना भृशं॥ मुहुर्ग्लानिपरवशो मुहुर्ज्ञानलवान्वितः॥ हिरण्यधान्यतनयभार्याभृ
त्यगृहादिषु॥ एते कथं भविष्यंतीत्यतीव ममताकुलः॥ मर्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः॥ शरैरिवांतकस्योग्रैश्छिद्यमानास्थि
बंधनः॥ विवर्त्तमानताराक्षिहस्तपादं समुत्क्षिपन्॥ संशुष्यमाणताल्वोष्ठकंठो घुरघुरायते॥ निरुद्धकंठो दोषौघैरुदानश्वासपीडि
तः॥ तापेन महता व्याप्तस्तृषा व्याप्तस्तथा क्षुधा॥ क्लेशादुत्क्रांतिमाप्नोति याम्यकिंकरपीडितः॥ ततश्च यातनादेहं क्लेशेन प्रतिपद्यते॥
एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणां॥ शृणुष्व नरके यानि प्राप्यंते पुरुषैर्मृतैः॥ याम्यकिंकरपाशादिग्रहणं दंडपातनं॥ यम
स्य दर्शनं चोग्रमुग्रमार्गावलोकनं॥ करंभवालुकामिश्रयंत्रशस्त्राग्निभीषणे॥ प्रत्येकं नरके याश्च यातना द्विज दुःसहाः॥ क्रकचैः
पाट्यमानानां मूषायां चापि धम्यतां॥ कुठारैः कृत्यमानानां भूमौ चापि निखन्यतां॥ शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यतां॥
गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यतां॥ क्वाथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमे॥ उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयं
त्रकैः॥ नरके यानि दुःखानि पापहेतूद्भवानि वै॥ प्राप्यंते नारकैर्विप्र तेषां संख्या न विद्यते॥ न केवलं द्विजश्रेष्ठ नरके दुःखपद्ध
तिः॥ स्वर्गेपि पापभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः॥ पुनश्च गर्भे भवति जायते च पुनर्नरः॥ गर्भे विलीयते भूयो जायमानोऽस्त
मेति च॥ यावज्जीवति तावच्च बालभावेऽथ यौवने॥ मध्यमं वा वयः प्राप्य वार्द्धके वा ध्रुवा मृतिः॥ यावज्जीवति तावच्च दुःखैर्नो
नाविधैः प्लुतः॥ तंतुकारणपक्ष्मौघैरास्ते कार्पासबीजवत्॥ द्रव्यनाशे तथोत्पन्ने पालने च तथा नृणां॥ भवंत्यनेकदुःखानि

तथैवेष्टविपत्तिषु॥यद्यत्प्रीतिकरंपुंसांवस्तुमैत्रेयजायते।तदेवदुःखवृक्षस्यबीजत्वमनुगच्छति॥कलत्रभृत्यैपुत्राभृत्यादि
गृहक्षेत्रधनादिकैः॥क्रियतेनतथाभूरिसुखंपुंसांयथासुखं॥इतिसंसारदुःखार्कतापतापितचेतसां॥विमुक्तिपादपछाया
ऋतेकुत्रसुखंनृणां॥तदस्यत्रिविधस्यापिदुःखजातस्यपंडितैः॥गर्भजन्मजराद्येषुस्थानेषुप्रभविष्यतः।निरस्तातिशयाह्ला
दसुखभावैकलक्षणा॥भेषजंभगवत्प्राप्तिरेकांतात्यंतिकीमता॥तस्मात्तत्प्राप्तयेयत्नःकर्त्तव्यःपंडितैर्नरैः॥तत्प्राप्तिहेतुर्ज्ञा
नंचकर्मचोक्तंमहामुने॥आगमोत्थंविवेकाच्चद्विधाज्ञानंतथोच्यते॥शब्दब्रह्मागममयंपरंब्रह्मविवेकजं॥अंधंतमइवाज्ञानंदी
पवच्चेंद्रियोद्भवं॥यथासूर्यस्तथाज्ञानंयद्विप्रर्षेविवेकजं॥मनुरप्याहवेदार्थंस्मृत्वायद्द्विजसत्तम॥तदेतच्छ्रूयतामत्रसंबंधेग
दतोमम॥द्वेब्रह्मणीवेदितव्येशब्दब्रह्मपरंचयत्॥शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति॥द्वेविद्येवेदितव्येवैइतिचा
थर्वणीश्रुतिः।परयात्वक्षरप्राप्तिरृग्वेदादिमयापरा॥यत्तदव्यक्तमजरमचिंत्यमजमव्ययं॥अनिर्देश्यमरूपंचपाणिपा
दायसंयुतं॥विभुंसर्वगतंनित्यंभूतयोनिरकारणं॥व्याप्यव्याप्तंयतःसर्वंतद्वैपश्यंतिसूरयः।तद्ब्रह्मपरमंधामतद्ध्येयंमो
क्षकांक्षिणां॥श्रुतिवाक्योदितंसूक्ष्मंतद्विष्णोःपरमंपदं॥तदेवभगवद्वाच्यंस्वरूपंपरमात्मनः॥वाचकोभगवच्छब्द
स्याद्यस्याक्षयात्मनः॥एवंनिगदितार्थस्यसतत्त्वंतस्यतत्त्वतः॥ज्ञायतेयेनतज्ज्ञानंपरमन्यत्त्रयीमयं॥अशब्दगोचरस्या
पितस्यवैब्रह्मणोद्विज॥पूजायांभगवच्छब्दःक्रियतेह्युपचारतः॥शुद्धेमहाविभूत्याख्येपरेब्रह्मणिवर्त्तते॥मैत्रेयभगवच्छ

ब्दःसर्वकारणकारणे॥संहर्त्तेतितथाभर्त्ताभकारोर्थद्वयान्वितः।नेतौगमयितास्रष्टागकारार्थस्ततोमुने॥ऐश्वर्यस्यसमग्र
स्यधर्मस्ययशसःश्रियः॥ज्ञानवैराग्ययोश्चैवषण्णांभगइतीगना॥वसंतितत्रभूतानिभूतात्मन्यखिलात्मनि।सचभूतेष्वशे
षेषुवकारार्थस्ततोव्ययः॥एवमेषमहाशब्दोभगवानितिसत्तम॥परमब्रह्मभूतस्यवासुदेवस्यनान्यगः॥तत्रपूज्य
पदार्थोक्तिपरिभाषासमन्वितः॥शब्दोयंनोपचारेणअन्यत्रह्युपचारतः॥उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं॥वेत्ति
विद्यामविद्यांचसवाच्योभगवानिति॥ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः॥भगवच्छब्दवाच्यानिविनाहेयैर्गुणादिभिः॥
सर्वाणितत्रभूतानिवसंतिपरमात्मनि॥भूतेषुचससर्वात्मावासुदेवस्ततःस्मृतः॥खांडिक्योजनकायाहपृष्टःकेशिध्वजः
पुरा॥नामव्याख्यामनंतस्यवासुदेवस्यतत्त्वतः॥भूतेषुवसतेसोऽंतर्वसंत्यत्रचतानियत्॥धाताविधाताजगतांवासुदेव
स्ततःप्रभुः॥ससर्वभूतःप्रकृतिंविकारान्गुणांश्चदोषांश्चमुनेव्यतीतः॥अतीतसर्वावरणोखिलात्मातेनास्तृतंयद्भुवनां
तराले॥समस्तकल्याणगुणात्मकोहिस्वशक्तिलेशाद्धृतभूतवर्गः॥इच्छागृहीताभिमतोरुदेहःसंसाधिताशेषजगद्धि
तोसौ॥तेजोबलैश्वर्यमहावबोधःस्ववीर्यशक्त्यादिगुणैकराशिः॥परःपराणांसकलानयत्रक्लेशादयःसंतिपरापरे
शे॥सईश्वरोव्यष्टिसमष्टिरूपोव्यक्तःस्वरूपःप्रकटःस्वरूपः॥सर्वेश्वरःसर्वगसर्ववेत्तासमस्तशक्तिःपरमेश्वराख्यः॥
संज्ञायतेयेनतदस्तदोषंशुद्धंपरंनिर्मलमेकरूपं॥संदृश्यतेवाप्यवगम्यतेवातज्ज्ञानमज्ञानमतोन्यदुक्तं॥७९॥ ॥७॥

इतिश्रीविष्णुपुराणेषष्ठेंशेपंचमोध्यायः॥ ॥श्रीपराशरउवाच॥स्वाध्यायसयमाभ्यांसदृश्यतेपुरुषोत्तमः॥तत्प्राप्तिकार
णंब्रह्मतदेमितिचपठ्यते॥स्वाध्यायाद्योगमासीतयोगात्स्वाध्यायमेवच॥स्वाध्याययोगसंपत्त्यापरमात्माप्रकाशते॥
तदीक्षणायस्वाध्यायश्चक्षुर्योगस्तथापरं॥नमांसचक्षुषाद्रष्टुंब्रह्मभूतःसशक्यते॥मैत्रेयउवाच॥भगवंस्तमहंयोगं
ज्ञातुमिच्छामितंवद॥ज्ञातेयत्राखिलाधारंपश्येयंपरमेश्वरं॥श्रीपराशरउवाच॥यथाकेशिध्वजःप्राहखांडिक्यायमहा
त्मने॥जनकायपुरायोगंतथाहंकथयामिते॥मैत्रेयोवाच॥खांडिक्यःकोभवद्ब्रह्मन्कोवाकेशिध्वजोभवत्॥कथंतयोश्चसंवा
दोयोगसंबंधवानभूत्॥पराशरउवाच॥धर्मध्वजोवैजनकःतस्यपुत्रोमितध्वजः॥कृतध्वजश्चनामासीत्सदाध्यात्मरतिर्नृ
पः॥कृतध्वजस्यपुत्रोभूत्ख्यातःकेशिध्वजोद्विजः॥पुत्रोमितध्वजस्यापिखांडिक्यजनकोभवत्॥कर्ममार्गेतिखांडिक्यः
पृथिव्यामभवत्कृती॥केशिध्वजोप्यतीवासीदात्मविद्याविशारदः॥तावुभावपिचैवास्तांविजिगीषूपरस्परं॥केशिध्व
जेनखांडिक्यःस्वराज्यादवरोपितः॥पुरोधसामंत्रिभिश्चसममेवोल्पसाधनः॥राज्यान्निराकृतसोथदुर्गारण्यचरोभवे
त्॥इयाजसोपिसुबहून्यज्ञान्ज्ञानव्यपाश्रयः॥ब्रह्मविद्यामधिष्ठायतर्त्तुंमृत्युमविद्यया॥एकदावर्त्तमानस्ययोगेयो
गविदांवरः॥धर्मधेनुंजघानोग्रःशार्दूलोविजनेवने॥ततोराजाहतांज्ञात्वाधेनुंव्याघ्रेणऋत्विजः॥प्रायश्चित्तंसपप्रच्छकिमत्रे
तिविधीयते॥तेचोचुर्नवयंविद्मःकशेरुःपृच्छतामिति॥कशेरुरपितेनोक्तस्तथैवप्राहभार्गवं॥शुनकंपृच्छराजेंद्रनाहंवेद्मि

सवेत्स्यति॥सगत्वातमपृच्छच्चसोप्याहशृणुयन्मुने॥नकशेरुर्नचैवाहंनचान्यःसांप्रतंभुवि॥वेत्त्येकएवचछत्रुःखांडिक्योयो
जितस्त्वया॥सचाहतंव्रजाम्येषप्रष्टुमात्मरिपुंमुने॥नकशेरुर्नचैवाहंप्राप्तएवमयायज्ञोयदिमांसहनिष्यति॥प्रायश्चित्तंसचेत्पृ
ष्टोवदिष्यतिरिपुर्मम॥ततश्चाविकलोयोगोमुनिश्रेष्ठभविष्यति॥पराशरोवाच॥इत्युक्त्वारथमारुह्यकृष्णाजिनधरोनृपः॥
वनंजगामयत्रास्तेखांडिक्यःसमहामतिः॥तमापतंतमालोक्यखांडिक्योरिपुमात्मनः॥प्रोवाचक्रोधताम्राक्षःसमारोपितकार्मु
कः॥पराशरोवाच॥कृष्णाजिनंचकवचमाबध्यास्मान्निहंस्यसि॥कृष्णाजिनधरेत्वस्मिन्नमयिप्रहरिष्यति॥मृगाणांवतपृष्ठेषुमू
ढकृष्णाजिनंनकिं॥येषांमयात्वयाचोग्राःप्रहिताःसितसायकाः॥सत्वामहंहनिष्यामिनमेजीवन्विमोक्ष्यसे॥आततायसिदुर्बुद्धे
ममराज्यहरोरिपुः॥केशिध्वजउवाच॥खांडिक्यसंशयंप्रष्टुंभवंतमहमागतः॥नत्वाहंतुंविचार्यैतत्कोपंबाणंचमुंचच॥पराश
रउवाच॥ततःसमंत्रिभिःसार्द्धमेकांतेसपुरोहितः॥मंत्रयामाससखांडिक्यःसर्वैरेवमहामतिः॥तमूचुर्मंत्रिणोवध्योरिपुरेषव
शंगतः॥हतेतुपृथिवीसर्वातववश्याभविष्यति॥खांडिक्यश्चाहतान्सर्वानेतदेवनसंशयः॥हतेतुपृथिवीसर्वाममवश्या
भविष्यति॥परलोकजयस्तस्यपृथिवीसकलाममं॥नहन्मिचेल्लोकजयोममतस्यवसुंधरा॥परलोकजयोनंतःस्वल्पका
लोमहीजयः॥तस्मादेनंनहंस्येयत्पृच्छतिवदामितत्॥पराशरउ॰॥ततस्तमभ्युपेत्याहखांडिक्योजनकोरिपुं॥पृष्टव्यंयत्व
यासर्वंतत्पृच्छस्ववदाम्यहं॥पराशरउ॰॥ततःसर्वंयथावृत्तंधर्मधेनुवधंद्विज॥कथयित्वासपप्रच्छप्रायश्चित्तंहितद्गतं॥स

वाचष्टयथान्यायंद्विजकेशि॥ध्वजायतत्॥प्रायश्चित्तमशेषेणयद्धेतत्रविधीयते॥विदितार्थःसतेनैवअनुज्ञातोमहात्मना॥या
गभूमिमुपागम्यचक्रेसर्वाःक्रियाःक्रमात्॥क्रमेणविधिवद्यागंनीत्वासोवभृथायते॥कृतकृत्यस्ततोभूत्वाचिंतयामासपार्थि
वः॥पूजिताऋत्विजःसर्वेसदस्यामानितामया॥तथैवार्थिजनोप्यर्थैर्योजितोभिमतैर्मया॥यथार्हमस्यलोकस्यमयासर्वंविचेष्टि
तं॥अनिष्पन्नक्रियंचेतस्तथापिममकिंयथा॥इत्थंसंचिंतयन्नेवसस्मारसमहीपतिः॥खांडिक्यायनदत्तेतिमयावैगुरुदक्षि
णा॥सजगामततोभूयोरथमारुह्यपार्थिवः॥मैत्रेयदुर्गगहनंखांडिक्योयत्रसंस्थितः॥खांडिक्योपिपुनर्दृष्ट्वातमायांतंधृतायुधः॥
तस्थौहंतुंकृतमतिस्तमाहसपुनर्नृपः॥भोनाहंतेपराधायप्राप्तःखांडिक्यमाक्रुध॥गुरोर्निःष्क्रयदानायमामवेहित्वमागतं॥
निष्पादितोमयायागःसम्यक्त्वदुपदेशतः॥सोहंतेदातुमिच्छामिवृणुस्वंगुरुदक्षिणां॥पराशरोवाच॥भूयःसमंत्रयामासपा
र्थिवःसहमंत्रिभिः॥गुरुनिष्क्रयकामोयंकिमियंप्रार्थितामिति॥तमूचुर्मंत्रिणोराज्यमशेषंप्रार्थितामिति॥कृतिभिःप्राप्यतेरा
ज्यमनायासितसैनिकैः॥प्रहस्यतानाहनृपसखांडिक्योमहामतिः॥स्वल्पकालेमहीराज्यंमादृशैःप्रार्थ्यतेकथं॥एवमेवभवं
तोत्रअर्थसाधनमंत्रिणः॥परमार्थःकथंकोत्रयूयंनात्रविचक्षणाः॥पराशरोवाच॥बाढमित्येवतेनोक्तःखांडिक्यस्तमथाब्र
वीत्॥भवानध्यात्मविज्ञानपरमार्थविचक्षणः॥यदिवैदीयतांमह्यंभवतागुरुनिष्क्रयः॥तत्क्लेशप्रशमायालंयत्कर्मतदु
दीरय॥ ॥इतिश्रीविष्णुपुराणेषष्ठेंशेषष्ठोध्यायः॥ ॥केशिध्वजउवाच॥नप्रार्थितंत्वयाकस्मान्ममराज्यमकंटकं॥राज्य

लाभाद्विनानान्यत्क्षत्रियाणामतिप्रियं॥खांडिक्योवाच॥केशिद्विजनिबोधेदंमयानप्रार्थितंयतः॥राज्यमेतदशेषंतेय
न्नगृध्यंत्यपंडिताः॥क्षत्रियाणामयंधर्मोयत्प्रजापरिपालनं॥वधश्चधर्मयुद्धेनस्वराज्यपरिपंथिनां॥यत्राशक्तस्यमेदोषोनै
वास्त्यपहृतेत्वया॥बंधायैवभवत्येषाह्यविद्याप्यक्रमोज्झिता॥जन्मोपभोगलिप्सार्थमयंराज्यस्पृहामम॥अन्येषांदोषजात
चधर्ममेवावरुध्यते॥नयाज्ञाक्षत्रबंधूनांधर्मायैतत्सतांमतं॥अतोनयाचितंराज्यमविद्यांतर्गतंतव॥राज्येगृध्यंत्यविद्वांसो
ममत्वाहृतचेतसः॥अहंमानमहामानमदमत्तानमादृशाः॥श्रीपराशरोवाच॥ततःप्रहृष्टःसाध्वितिप्राहकेशिध्वजोनृपः॥खां
डिक्यंजनकंप्रीत्याश्रूयतांवचनंमम॥अहमप्यविद्ययामृत्युंतर्त्तुकामःकरोमिवै॥राज्यंयागांश्चविविधान्भोगैःपुण्यक्षयंत
था॥तदिदंतेमनोदिष्ट्याविवेकैश्वर्यतांगतं॥श्रूयतांचाप्यविद्यायाःस्वरूपंकुलनंदन॥अनात्मन्यात्मबुद्धिर्याअस्वेस्वमितियाम
तिः॥अविद्यातरुसंभूतिबीजमेतद्द्विधास्थितं॥पंचभूतात्मकेदेहेदेहीमोहतमोवृतः॥अहमेतदितीत्युच्चैःकुरुतेकुमतिर्म
तिं॥आकाशवाय्वग्निजलपृथिवीभ्यःपृथक्स्थिते॥आत्मन्यात्ममयंभावंकःकरोतिकलेवरे॥कलेवरोपभोग्योहिगृहक्षेत्रा
दिकंचुके॥अदेहेनात्मनिप्राज्ञोममेदमितिमन्यते॥इत्थंचपुत्रपौत्रेषुतदेहोत्पादितेषुकः॥करोतिपंडितःस्वाम्यमनात्मनि
कलेवरे॥सर्वंदेहोपभोगायकुरुतेकर्ममानवः॥देहश्चान्योयदापुंसस्तदाबंधायतत्परं॥मृन्मयंहियथागेहंलिप्यतेवैमृदंभ
सा॥पार्थिवोयंतथादेहोमृदंबालेपनस्थितिः॥पंचभूतात्मकैर्भोगैःपंचभूतात्मकंवपुः॥आप्यायतेयदितदातःपुंसोभोगवो

त्रकिंततः॥ अनेकजन्मसाहस्रींसंसारपदवींव्रजन्॥ मोहश्रमंप्रयातोसौवासनारेणुगुंठितः॥ प्रक्षाल्यतेयदासोस्यरेणुर्ज्ञानोष्णवारिणा॥ तदासंसारपांथस्ययातिमोहश्रमःशमं॥ मोहश्रमेशमंयातेस्वस्थांतःकरणःपुमान्॥ अनन्यातिशयाबाधःपरंनिर्वाणमृच्छति॥ निर्वाणमयएवायमात्माज्ञानमयोमलः॥ दुःखाज्ञानमयाधर्माःप्रकृतेस्तेतुनात्मनः॥ जलस्यनाग्निसंसर्गःस्थालीसंगात्तथापिहि॥ शब्दोद्रेकादिकान्धर्मान्तत्करोतियथामुने॥ तथात्माप्रकृतेःसंगादहंमानादिदूषितः॥ भजतेप्राकृतान्धर्मान् अन्यस्तेभ्योहिसोव्ययः॥ तदेतत्कथितंबीजमविद्यायास्तवप्रभो॥ क्लेशानांचक्षयकरंयोगादन्यंनविद्यते॥ खांडिक्योवाच॥ तंब्रवीहिमहाभागयोगंयोगविदुत्तम॥ विज्ञातयोगशास्त्रार्थस्त्वमस्यांनिमिसंततौ॥ केशिध्वजउवाच॥ योगस्वरूपंखांडिक्यश्रूयतांगदतोमम॥ यत्रस्थितोनच्यवतेप्राप्यब्रह्मलयंमुनिः॥ मनएवमनुष्याणांकारणंबंधमोक्षयोः॥ बंधस्यविषयसंगिमुक्तेर्निर्विषयंतथा॥ विषयेभ्यःसमाहृत्यविज्ञानात्मामनोमुने॥ चिंतयेन्मुक्तयेतेनब्रह्मभूतंपरेश्वरं॥ आत्मभावंनयत्येनंतद्ब्रह्मध्यायिनंमुने॥ विकार्यमात्मनःशक्त्यालोहमाकर्षकोयथा॥ आत्मप्रयत्नसापेक्षाविशिष्टायामनोगतिः॥ तस्यांब्रह्मणिसंयोगोयोगइत्यभिधीयते॥ एवमत्यंतवैशिष्ट्ययुक्तधर्मोपलक्षणः॥ यस्ययोगःसवैयोगीमुमुक्षुरभिधीयते॥ योगयुक्प्रथमंयोगीयुंजमानोभिधीयते॥ विनिष्पन्नसमाधिस्तुपरब्रह्मोपलब्धिमान्॥ यद्यंतरायदोषेणदुष्यतेनास्यमानसं॥ जन्मांतरैरभ्यसतोमुक्तिःपूर्वस्यजायते॥ विनिष्पन्नसमाधिस्तुमुक्तिंतत्रैवजन्मनि॥ प्राप्नोतियोगीयोगाग्निदग्धकर्मचयोऽचिरात्॥

ब्रह्मचर्यमहिंसाचसत्यास्तेयपरिग्रहान्॥ सेवेतयोगीनिःकामोयोग्यतांस्वंमनोनयन्॥ स्वाध्यायशौचसंतोषतपांसिनियतात्मवान्॥ कुर्वीतब्रह्मणितथापरस्मिन्प्रवणंमनः॥ एतेयमाःसनियमाःपंचपंचप्रकीर्तिताः॥ विशिष्टफलदाःकाम्यानिःकामानांविमुक्तिदाः॥ एवंभद्रासनादीनांसमास्थायगुणैर्युतः॥ यमाख्यैर्नियमाख्यैश्चयुंजीतनियतोयतिः॥ प्राणाख्यमनिलंवश्यमभ्यासात्कुरुतेतुयः॥ प्राणायामःसविज्ञेयःसबीजोबीजएवच॥ परस्परेणाभिभवेप्राणायामौयदानिलौ॥ कुरुतःसद्विधानेनतृतीयःसंयमात्तयोः॥ तस्यचालंबनवतःस्थूलंरूपंद्विजोत्तम॥ आलंबनमनंतस्ययोगिनोभ्यसतःस्मृतं॥ शब्दादिष्वनुरक्तानिगृह्याक्षाणियोगवित्॥ कुर्याच्चित्तानुसारीणिप्रत्याहारपरायणः॥ वश्यतापरमातेनजायतेतिचलात्मनां॥ इंद्रियाणामवश्यैस्तैर्नयोगीयोगसाधकः॥ प्राणायामेनपवनैःप्रत्याहारेणचेंद्रियैः॥ वशीकृतैस्ततःकुर्यात्स्थितिंचेतःशुभाश्रये॥ खांडिक्योवाच॥ कथ्यतांमेमहाभागचेतसोयःशुभाश्रयः॥ यदाधारमशेषंतुअभिदोषंफलोद्भवं॥ केशिध्वजोउवाच॥ आश्रयश्चेतसोब्रह्मद्विधातच्चस्वरूपतः॥ यदाधारमशेषंतद्यंतिदोषसमुद्भवं॥ केशिध्वजउवाच॥ आश्रयश्चेतसोब्रह्मद्विधातच्चस्वरूपतः॥ रूपमर्तिममर्तिंचपरंचापरमेवच॥ त्रिविधाभावनाभूपविश्वमेतन्निबोधतां॥ ब्रह्माख्याकर्मसंज्ञाचतथाचैवोभयात्मिका॥ कर्मभावात्मिकाह्येकाब्रह्मभावात्मिकापरा॥ उभयात्मिकातथैवान्यात्रिविधाभावनास्मृता॥ सनंदनादयोब्रह्मभावभावनयायुताः॥ कर्मभावनयाचान्येदेवाद्याःस्थावराश्चराः॥ हिरण्यगर्भादिषुचब्रह्मकर्मात्मिकाद्विधा॥ अधिकारबोधयुक्तेषुविद्य

वि॰पु॰
१२

नेभावभावना॥अक्षीणेषुसमस्तेषुविशेषज्ञानकर्मसु॥विश्वमेतत्परंचान्यत्भेदभिन्नदृशांनृप॥प्रत्यस्तमितभेदंयत्सत्ता
मात्रमगोचरं॥वचसामात्मसंवेद्यंतत्ज्ञानंब्रह्मसंज्ञितं॥तच्चविष्णोःपरंरूपमरूपस्याजमक्षरं॥विश्वस्वरूपंवैरूप्यलक्षणं
परमात्मनः॥नतयोगयुजांशक्यंनृपचिंतयितुंयतः॥ततस्थूलंहरेरूपंचिंतयेद्विश्वगोचरं॥हिरण्यगर्भोभगवान्वासवो
थप्रजापतिः॥मरुतोवसवोरुद्राभास्करास्तारकाग्रहाः॥गंधर्वयक्षदैतेयाःसकलादेवयोनयः॥मनुष्याःपशवःशैलाःस
मुद्राःसरितोद्रुमाः॥भूतभूतान्यनेकानिभूतानांयेचहेतवः॥प्रधानादिविशेषांतंचेतनाचेतनात्मकं॥एकपादंद्विपादंचब
हुपादमपादकं॥मूर्त्तमेतद्धरेरूपंभावनात्रितयात्मकं॥एतत्सर्वमिदंविश्वंजगदेतच्चराचरं॥परंब्रह्मस्वरूपस्यविष्णोःश
क्तिसमन्वितं॥विष्णुशक्तिःपराप्रोक्ताक्षेत्रज्ञाख्यातथापरा॥अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यते॥यथाक्षेत्रज्ञशक्तिः
साचेष्टितानृपसर्वगा॥संसारतापानखिलानवाप्नोत्यनुसंततान्॥मयातिरोहितत्वाच्चशक्तिःक्षेत्रज्ञसंज्ञिता॥सर्वभू
तेषुभूपारतारतम्येनलक्ष्यते॥अप्राणिवस्तुस्वल्पास्थावरेषुततोधिका॥सरीसृपेषुतेभ्योन्याप्यतिशक्तिःपतत्रि
षु॥पतत्रिभ्योमृगांतेभ्यःस्वशक्त्यापशवोधिकाः॥पशुभ्योमनुजाश्चातिशक्त्यापुंसोविभाविताः॥तेभ्योपिनागगंध
र्वायक्षाद्यादेवतानृप॥शक्रःसमस्तदेवेभ्यःततश्चातिप्रजापतिः॥हिरण्यगर्भोपिततःपुंसःशक्त्याशुभान्वितः॥एतान्यशे
षरूपस्यतस्यरूपाणिपार्थिव॥यतस्तत्शक्तियोगेनयुक्तानिनभसायथा॥द्वितीयंविष्णुसंज्ञस्ययोगिध्येयंमहामते॥

७४
१२

अमूर्त्तंब्रह्मणोरूपंयत्सदित्युच्यतेबुधैः॥समस्ताःशक्तयश्चैतानृपयत्रप्रतिष्ठिता॥तद्विश्वविश्वरूपंवैरूपमन्यत्हरेर्महत्॥
समस्तशक्तिरूपाणितत्करोतिजनेश्वर॥देवतिर्यग्मनुष्यादिचेष्टावंतिस्वलीलया॥जगतामुपकारायनसाकर्मनिमित्तजा॥
चेष्टातस्याप्रमेयस्यव्यापिन्यव्याहतात्मिका॥तद्रूपंविश्वरूपस्यतस्ययोगयुजानृप॥चिंत्यमात्मविशुद्ध्यर्थंसर्वकिल्बिषना
शनं॥यथाग्निरुद्धतशिखःकक्षंदहतिसानिलः॥तथाचित्तस्थितोविष्णुर्योगिनांसर्वकिल्बिषं॥तस्मात्समस्तशक्तीनामाधारेत
त्रचेतसः॥कुर्वीतसंस्थितिंसातुविज्ञेयाशुद्धधारणा॥शुभाश्रयःसचित्तस्यसर्वगस्यतथात्मनः॥त्रिभागभावनातीतोमुक्तयेयो
गिनांनृप॥अन्येतुपुरुषव्याघ्रचेतसोयेव्यपाश्रयाः॥अशुद्धास्तेसमस्तास्तुदेवाद्याःकर्मयोनयः॥मूर्त्तंभगवतोरूपंसर्वापाश्र
यनिःस्पृहं॥एषावैधारणाज्ञेयायच्चित्तंतत्रधार्यते॥तच्चमूर्त्तंहरेरूपंयादृक्चिंत्यंनराधिप॥तच्छ्रूयतामनाधाराधारणानोपप
द्यते॥प्रसन्नचारुवदनंपद्मपत्रोपमेक्षणं॥सुकपोलंसुविस्तीर्णललाटफलकोज्ज्वलं॥समकर्णांतविन्यस्तचारुकर्णविभूषणं॥
कंबुग्रीवंसुविस्तीर्णश्रीवत्सांकितवक्षसं॥वलीत्रिभंगिनामग्ननाभिनाचोदरेणवै॥प्रलंबाष्टभुजंविष्णुमथवापिचतुर्भुजं॥स
मस्थितोरुजंघंचसुस्थिरांघ्रिकरांबुजं॥चिंतयेद्ब्रह्मभूतंतुपीतनिर्मलवाससं॥किरीटचारुकेयूरकटकादिविभूषितं॥शार्ङ्ग
शंखगदाखड्गचक्राक्षवलयान्वितं॥चिंतयेत्तन्मनायोगीसमाधायात्ममानसं॥तावत्यावत्दृढीभूतातत्रैवनृपधारणा॥व्रज
तस्तिष्ठतोन्यद्वास्वेच्छयाकर्मकुर्वतः॥नापयातियदाचित्तात्सिद्धांमन्येततांतदा॥ततःशंखगदाचक्रशार्ङ्गादिरहितंबुधः॥चिं

विष्णुपु०
१३

तयेद्भगवद्रूपंप्रशांतंसाक्षसूत्रकं॥सायदाधारणातद्वत्अवस्थानवतीततः॥किरीटकेयूरमुखैर्भूषणैरहितंस्मरेत्॥तदे
कावयवंदेवंचेतसाहिपुनर्बुधः॥कुर्यात्ततोवयविनिप्रणीधानपरोभवत्॥तद्रूपप्रत्ययाचैकसंततिश्चान्यनिःस्पृहः॥तद्ध्यानंप्र
थमैरंगैःषड्भिर्निःपाद्यतेनृप॥तस्यैवकल्पनाहीनंस्वरूपग्रहणंहियत्॥मनसाध्याननिःपाद्यंसमाधिःसोभिधीयते॥विज्ञानंप्रा
पकंप्राप्येपरेब्रह्मणिपार्थिव॥प्रापणीयस्तथैवात्माप्रक्षीणाशेषभावनः॥क्षेत्रज्ञःकरणीज्ञानंकरणंतेनतस्यतत्॥निःपाद्यमु
क्तिकार्यंवैकृतकृत्यंनिवर्तते॥तद्भावभावनापन्नस्ततोसौपरमात्मनः॥भवत्यभेदीभेदश्चतस्याज्ञानकृतोभवेत्॥विभेदजन
केज्ञानेनाशमात्यंतिकंगते॥आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यति॥इत्युक्तस्तेमयायोगःखांडिक्यःपरिपृच्छतः॥संक्षेपवि
स्ताराभ्यांतुकिमन्यत्क्रियतांतव॥खांडिक्यउवाच॥कथितेयोगसद्भावेसर्वमेवकृतंमम॥तवोपदेशेनाशेषोनष्टश्चित्तमनोय
तः॥ममेतियन्मयाचोक्तमसदेतन्नचान्यथा॥नरेंद्रगदितुंशक्यमपिविज्ञेयवेदिभिः॥अहंममेत्यविद्येयंव्यवहारस्तथाम
या॥परमार्थस्त्वसंलापोगोचरोवचसांनसः॥तद्गच्छश्रेयसेसर्वंममैतद्भवताकृतं॥यद्विमुक्तिप्रदोयोगःप्रोक्तःकेशिध्वजा
व्ययः॥पराशरोवाच॥यथार्हंपूजयातेनखांडिक्येनसपूजितः॥आजगामपुरंब्रह्मन्ततःकेशिध्वजोनृपः॥खांडिक्योपिसु
तंकृत्वाराजानंयोगसिद्धये॥वनंजगामगोविंदेविनिवेशितमानसः॥तत्रैकांतमतिर्भूत्वायमादिगुणशोधितः॥विष्ण्वाख्ये
विमलेब्रह्मण्यवापनृपतिर्लयं॥केशिध्वजोपिमुक्त्यर्थंस्वकर्मक्षपणोन्मुखः॥बुभुजेविषयान्कर्मचक्रेचानभिसंधितं॥

षष्ठ
१३

सकल्याणोपभोगैश्चक्षीणपापोमलस्ततः॥अवापसिद्धिमत्यंतांतापक्षयफलांद्विजाः॥ ॥इतिश्रीविष्णुपुराणेषष्ठेंशेसप्तमो
ध्यायः॥ ॥श्रीपराशरउवाच॥इत्येषकथितःसम्यक्तृतीयःप्रतिसंचरः॥आत्यंतिकोविमुक्तिर्योलयोब्रह्मणिशाश्वते॥स
र्गश्चप्रतिसर्गश्चवंशामन्वंतराणिच॥वंशानुचरितंचैवभवतोगदितंमया॥पुराणंवैष्णवंचैतत्सर्वकिल्बिषनाशनं॥वि
शिष्टंसर्वशास्त्रेभ्यःपुरुषार्थोपपादकं॥तुभ्यंयथावन्मैत्रेयप्रोक्तंशुश्रूषवेव्ययं॥यदन्यदपिवक्तव्यंतत्पृच्छाद्यवदामिते॥
मैत्रेयउवाच॥भगवन्कथितंसर्वंयत्पृष्टोसिमहामुने॥श्रुतंचैतन्मयाभक्त्यानान्यत्प्रष्टव्यमस्तिमे॥विच्छिन्नाःसर्वसंदेहावै
मल्यंमनसःकृतं॥त्वत्प्रसादान्मयाज्ञातंउत्पत्तिस्थितिसंलयः॥ज्ञातश्चतुर्विधोराशिःशक्तिश्चत्रिविधागुरो॥विज्ञाताचापि
कार्त्स्न्येनत्रिविधाभावभावना॥त्वत्प्रसादान्मयाज्ञातंज्ञेयैरन्यैरलंद्विज॥यथैतदखिलंविष्णोर्जगन्नात्रव्यतिरिच्यते॥कृ
तार्थोस्म्यपसंदेहःत्वत्प्रसादान्महामुने॥वर्णधर्मादयोधर्माविदितायदशेषतः॥प्रवृत्तंचनिवृत्तंचज्ञातंकर्ममयाखिलं॥
प्रसीदविप्रप्रवरनान्यत्प्रष्टव्यमस्तिमे॥यदस्यकथनायासेयोजितोसिमयागुरो॥तत्क्षम्यतांविशेषोस्तिनसतांपुत्रशि
ष्ययोः॥पराशरोवाच॥एतत्तेयन्मयाख्यातंपुराणंवेदसंमितं॥श्रुतेस्मिन्सर्वदोषोत्थःपापराशिःप्रशाम्यति॥सर्गश्च
प्रतिसर्गश्चवंशामन्वंतराणिच॥वंशानुचरितंकृत्स्नंमयात्रतवकीर्तितं॥अत्रदेवास्तथादैत्यागंधर्वोरगराक्षसाः॥यक्षा
विद्याधराःसिद्धाःकथ्यंतेप्सरसस्तथा॥मुनयोभावितात्मानःकथ्यंतेतपसान्विताः॥चातुर्वर्ण्यंतथापुंसांविशिष्टचरितानराः॥

जपेनदुरितंभक्त्यासहस्रेसप्तसंख्यया २
स२

वि०पु० पुण्याःप्रदेशामेदिन्याःपुण्यानद्योथसागराः॥पर्वताश्चमहापुण्याश्चरितानिचधीमतां॥वर्णधर्मादयोधर्मावेदशास्त्राणिकृत्स्न
१४ शः॥येषांश्रवणात्सद्यःसर्वपापैःप्रमुच्यते॥उत्पत्तिस्थितिनाशानांहेतुर्योजगतोऽव्ययः॥सर्वभूतःसर्वात्माकथ्यतेभगवान्हरिः॥
अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः॥पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव॥यन्नामकीर्तितंभक्त्याविलायनमनुत्तमं॥
मैत्रेयाशेषपापानांधातूनामिवपावकः॥कलिकल्मषमत्युग्रंनरकार्तिहरंनृणां॥प्रलयंविलयंसद्यःसकृद्यत्रानुसंस्मृते॥
हिरण्यगर्भदेवेंद्ररुद्रादित्यादिवायुभिः॥किंनरैर्वसुभिःसाध्यैर्विश्वेदेवादिभिःसुरैः॥रक्षोयक्षोरगैःसिद्धैर्दैत्यगंधर्वदानवैः॥अ
प्सरोभिस्तथातारानक्षत्रैःसकलैर्ग्रहैः॥सप्तर्षिभिस्तथाधिष्ण्यैर्धिष्ण्याधिपतिभिस्तथा॥ब्राह्मणाद्यैर्मनुष्यैश्चतथैवपशुभि
र्मृगैः॥सरीसृपैर्विहंगैश्चप्रेताद्यैःसमहीरुहैः॥वनाद्रिसागरसरित्पातालैःसधरादिभिः॥शब्दादिभिश्चसहितंब्रह्मांडमखि
सर्व लंद्विज॥मेरोरिवाणुर्यस्यैतत्यन्मयंवेद्विजोत्तम॥ससर्ववित्सर्वस्वरूपोरूपवर्जितः॥कीर्त्यतेभगवान्विष्णुरत्रपापप्रणाश
नः॥यदश्वमेधावभृथेस्नातःप्राप्नोतिवैफलं॥सकलंतदवाप्नोतिश्रुत्वैतन्मुनिसत्तम॥प्रयागेपुष्करेचैवकुरुक्षेत्रेतथार्बुदे॥कृ
तोपवासःप्राप्नोतितदस्यश्रवणान्नरः॥यदग्निहोत्रेसुहुतेवर्षेणाप्नोतिवैफलं॥महापुण्यमयंविप्रतदस्यश्रवणात्सकृत्॥
मु येष्टशुक्लद्वादश्यांस्नात्वावैयनाजले॥मथुरायांहरिंदृष्ट्वासर्वपापैःप्रमुच्यते॥तदाप्नोतिफलंसम्यक्समाधानेनकीर्तना षष्ठ
त्॥पुराणस्यास्यविप्रर्षेकेशवार्पितमानसः॥यमुनासलिलेस्नातःपुरुषोमुनिसत्तम॥ज्येष्ठामूलामलेपक्षेद्वादश्यामुपवा १४

ज्येष्ठामूलासितेपक्षेयेनैवंवयमस्तुत॥परामृद्धिमवाप्स्यामस्तारिताःस्वकुलोद्भवैः॥

सकृत्॥समभ्यर्च्याच्युतंसम्यङ्मथुरायांसमाहितः॥अश्वमेधस्ययज्ञस्यप्राप्नोत्यविकलंफलं॥आलोक्यर्द्धिमथोन्येषांउन्नीता
नांस्ववंशजैः॥एतत्किलोचुरन्येषांपितरःसपितामहाः॥कश्चिदस्मत्कुलेजातःकालिंदीसलिलाप्लुतः॥अर्चयिष्यतिगोविंदंम
थुरायामपोषितः॥सितेपक्षेसमभ्यर्च्यतोषयित्वाजनार्दनं॥धान्यानांपिंडनिर्वापंयमुनायांप्रदास्यति॥दत्वापिंडान्पितृभ्यश्च
यमुनासलिलेप्लुतः॥तस्मिन्कालेसमभ्यर्च्यतत्रकृष्णंसमाहितः॥यदाप्नोतिनरःपुण्यंतारयन्स्वपितामहान्॥श्रुत्वाध्यायंतदाप्नो
तिपुराणस्यास्यभक्तिमान्॥एतत्संसारभीरूणांपरित्राणमनुत्तमं॥दुःस्वप्ननाशनंनृणांसर्वदुष्टनिबर्हणं॥इदमर्षंपुराप्राहऋभ
वेकमलोद्भवः॥ऋभुःप्रियव्रतायाहसचभागुरयेऽब्रवीत्॥भागुरिःस्तंबमित्रायदधीचायसचोक्तवान्॥सवैसारस्वतेप्रादाद्भृ
गुःसारस्वतादपि॥गुरुणापुरुकुत्सायनर्मदायैसचोक्तवान्॥नर्मदाधृतराष्ट्रायनागायापूरणायच॥ताभ्यांचनागराजायप्रोक्तं
वासुकयेद्विज॥वासुकिःप्राहवत्सायवत्सश्चाश्वतरायवै॥कंबलायचतेनोक्तमेलपत्रायतेनच॥पातालंसमनुप्राप्ततोवेदशि
रामुनिः॥प्राप्तवानेतदखिलंसवैप्रमतयेददौ॥दत्तंप्रमतिनाचैवजातुकर्ण्यनचैवोक्तंअन्येषांपुण्यशीलिनां॥वसिष्ठवरदानेन
ममाप्येतत्स्मृतिंगतं॥मयापितुभ्यंमैत्रेययथावत्कथितंत्विदं॥तमप्येतच्छमीकायकलेरंतेगदिष्यति॥इत्येतत्परमंगुह्यंकलि
कल्मषनाशनं॥यःशृणोतिनरःसम्यक्सर्वपापैःप्रमुच्यते॥पितृयक्षमनुष्येभ्यःसमस्तामरसंस्तुतिः॥कृतातेनभवेदेतत्
यःशृणोतिदिनेदिने॥कपिलादानजनितंपुण्यमत्यंतदुर्लभं॥श्रुत्वातस्यदशाध्यायानवाप्नोतिनसंशयः॥यस्त्वेतत्सकले

वि॰पु॰
१५

श्टणोतिपुरुषःकृत्वामनस्यच्युतंसर्वंसर्वमयंसमस्तजगतामाधारमात्माश्रयं॥ज्ञानंज्ञेयमयंनंतमादिरहितंसर्वामराणांहितं
सप्राप्नोतिनसंशयोस्त्यविकलंयद्वाजिमेधेफलंयत्रादौभगवांश्चराचरगुरुर्मध्येतथांतेचसब्रह्मज्ञानमयोस्तोखिलजगन्म च्यु
ध्यांतसर्गःप्रभुः॥ततश्टण्वन्पुरुषःपवित्रपरमंभक्त्यापठन्धारयन्प्राप्नोत्यस्तिनतत्समस्तत्रिभुवनेष्वेकांतसिद्धिर्हरिं॥
यस्मिन्न्यस्तमतिर्नयातिनरकेस्वर्गोपियच्चिंतनेविघ्नोयत्रनिवेशितात्ममनसोब्रह्मोपिलोकोऽल्पकः॥मुक्तिंचेतसियःस्थितोम
लधियांपुंसांददात्यव्ययःकिंचित्रंयदघंप्रयातिविलयंतत्राच्युतेकीर्तिते॥यज्ञैर्यज्ञविदोयजंतिसततंयज्ञेश्वरंकर्मिणोयंयंब्रह्म
मयंपरापरमयंध्यायंतियंज्ञानिनः॥यंचप्राप्यनजायतेनम्रियतेनोवर्द्धतेनो येतेनैवासीन्नचसन्निष्पतितःकिंवाहरेःश्रूय
तां॥कव्यंयःपितृरूपधृक्विधिहुतंहव्यंचभुंक्तेप्रभुःदेवत्वेभगवाननादिनिधनस्वाहास्वधासंज्ञितः॥यस्मिन्ब्रह्मणिसर्वशक्ति
निलयेमानानिनोमानिनांनिष्ठायैप्रभवंतिहंतिकलुषंश्रोत्रंसयातोहरिः॥नांतोस्तियायस्यनचयस्यसमुद्भवोऽस्तिवृद्धिर्नय
स्यपरिणामविवर्जितस्य॥नैनायक्षयंचसमपैत्यविकल्पवस्तुयस्तंनतोस्मिन्पुरुषोत्तममाद्यमीड्यं॥तस्यैवयोऽनुगणभु
ग्बहुधैकएवशुद्धोप्यशुद्धइवमर्त्तिविभागभेदैः॥ज्ञानान्वितःसकलभूतविभूतिभर्त्तातस्मिन्नतोस्मिपुरुषायसदाव्य
याय॥ज्ञानप्रवृत्तिनियमैक्यमयायपुंसोभोगप्रदानपटवेत्रिगुणात्मकाय॥अव्यक्तताय भवभावनकारणायवंदेस्वरूप षष्ठ
भवायसदाजराय॥व्योमानिलाग्निजलभूरचनामयायशब्दादिभोगविषयोपनयक्षमाय॥पुंसःसमस्तकरणैरुपका १५

वि॰पु॰
१६

रकायव्यक्तायसूक्ष्मविमलायसदानतोस्मि॥इतिविविधमजस्ययस्यस्वरूपंप्रकृतिपरमात्ममयंसनातनस्य॥
प्रदिशतुभगवानशेषपुंसांहरिरजेपेन्मजरादिकांचसिद्धिं॥१०॥ ॥इतिश्रीविष्णुपुराणेब्रह्मांडेविस्तारेपाराशर्यासं
हितायांषष्ठेंशेअष्टमोध्यायः॥८॥ ॥समाप्तंविष्णुपुराणं॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥छ॥

षष्ठसमाप्त॥
१६

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ब्रह्मांडाविष्णुपुराण

DR BHAU DAJI MEMORIAL